हृल्लेखा, लोकराज, जगदधिपः; लोकपतिः, भुवनेश्वरी, माया, त्रिदेहं, तत्त्वं, शक्तिः, शक्तिप्रणव-मित्यादि ॥ ‘ह्रीँ’ ॥ ”

५. “ ईषत्कर्णोपसेव्यः स्यादुपांशुः स जपः स्मृतः ॥ ”—ह० लि० ‘ब्रह्मविद्याविधि’

त्वां चिन्तयन् श्वेतकरानुकारं, ज्योत्स्नामयीं पश्यति यस्त्रिलोकी(म्) ।
श्रयन्ति तं तत्क्षणतोऽनवद्यविद्याकलाशान्तिकपौष्टिकानि ॥ ४ ॥
त्वामेव बालारुणमण्डलाभं, स्मृत्वा जगत् त्वत्करजालदीप्रम् ।
विलोकते यः किल तस्य विश्वं, विश्वं भवेद् वश्यमवश्यमेव ॥ ५ ॥
यस्तप्तचामीकरचारुदीप्रं, पिङ्गप्रभं त्वां कलयेत् समन्तात् ।
सदा मुदा तस्य गृहे सहेलिं[1], करोति केलिं कमला चलाऽपि ॥ ६ ॥
यः श्यामलं कज्जलमेचकाभं त्वां वीक्षते वा तुषधूमधूम्रम् ।
विपक्षपक्षः खलु तस्य वाताहताऽभ्रवद् यात्यचिरेण नाशम् ॥ ७ ॥
आधारकन्दोद्गततन्तुसूक्ष्मलक्ष्योद्ध्वं ब्रह्मसरोजवासम् ।
यो ध्यायति त्वां स्रवदिन्दुबिम्बामृतं स च स्यात् कविसार्वभौमः ॥ ८ ॥
षड्दर्शनी स्वस्वमतावलेपैः स्वे दैवते त(त्व)न्मयबीजमेव ।
ध्यात्वा तदाराधनवैभवेन भवेदजेयः परवादिवृन्दैः ॥ ९ ॥

---

**श्वेतवर्णी ' ह्रीँ 'कारना ध्याननुं फळ—**

चंद्रसमान उज्ज्वळ वर्णथी तारुं ध्यान करतो जे त्रणे लोकने प्रकाशमय जुए छे तेने निर्दोष एवी विद्याओ, कलाओ तथा शांतिक अने पौष्टिक कर्मो तत्क्षण सिद्ध थाय छे. ॥ ४ ॥

**रक्तवर्णी ' ह्रीँ 'कारना ध्याननुं फळ—**

ऊगता सूर्यना मंडल जेवी कांतिवाळा तने स्मरीने जे तारा किरणोना समूहथी देदीप्यमान जगतने जुए छे तेने खरेखर समग्र विश्व अवश्यमेव वश थाय छे. ॥ ५ ॥

**पीतवर्णी ' ह्रीँ 'कारना ध्याननुं फळ—**

जे पीळी कांतिवाळा तने तप्तसुवर्णनी जेम सुंदर रीते सर्वतः प्रकाशमान जुए तेना घरमां चल एवी लक्ष्मी पण आनंद अने लीलासहित क्रीडा करे छे ॥ ६ ॥

**श्यामवर्णी ' ह्रीँ 'कारना ध्याननुं फळ—**

जे (साधक) काजळ के मेचकमणिसदृश श्यामवर्णरूपे अथवा फोतरांना धूमाडा जेवा धूम्रवर्ण रूपे तने जुए छे (तारुं ध्यान धरे छे), तेनो शत्रुसमूह पवनथी विखेरायेलां वादळांनी जेम खरेखर क्षणवारमां नाश पामे छे. ॥ ७ ॥

**कुंडलिनीस्वरूपे ध्याननुं फळ—**

जे मूलाधार कंद (चक्र)मांथी नीकळती तन्तुसमान सूक्ष्म सुषुम्णा-नाडीमां रहेलां लक्ष्यो (चक्रो)ने भेदीने उपर जता अने अंते सहस्रारकमलमां रहीने (स्थिर थईने) त्यां चंद्रना बिंबसमान अमृत झरावता तारुं ध्यान करे छे ते कविओमां चक्रवर्ती (श्रेष्ठ) थाय छे ॥ ८ ॥

**फलश्रुति—**

षड्दर्शननो जाणकार पोताना इष्टदेवतामां ' ह्रीँ 'कार बीजनुं ध्यान करीने ते आराधनाना वैभवथी, पोतपोताना मतमां गर्विष्ठ एवा वादीओना समूहोथी अजेय बने छे ॥ ९ ॥

---

१. हेलं N. ।

किं मन्त्रयन्त्रैर्विविधागमोक्तैः दुःसाध्यसंशीतिफलाल्पलाभैः ।
सुसेव्यः सद्यः (सद्यः सुसेव्यः) फलचिन्तितार्थाधिकप्रदश्चेद्(त)सि चेत्त्वमेकः[1] ॥ १० ॥

चौरारि-मारि-ग्रह-रोग-लूता-भूतादिदोषानल-बन्धनोत्थाः ।
भियः प्रभावात् तव दूरमेव नश्यन्ति पारीन्द्ररवादिवेभाः ॥ ११ ॥

प्राप्नोत्यपुत्रः सुतमर्थहीनः, श्रीदायते पत्तिरपीशतीह ।
दुःखी सुखी चाऽथ भवेन्न किं किं त(त्व)द्रूपचिन्तामणिचिन्तनेन ॥ १२ ॥

पुष्पादिजापामृतहोमपूजाक्रियाधिकारः सकलोऽस्तु दूरे ।
यः केवलं ध्यायति बीजमेव, सौभाग्यलक्ष्मीर्वृणुते स्वयं तम् ॥ १३ ॥

त्वत्तोऽपि लोकाः सुकृतार्थकाम-, मोक्षान् पुमर्थांश्चतुरो[2] लभन्ते ।
यास्यन्ति याता अथ यान्ति ये ते[3] श्रेयःपदं त्वन्महिमालवः सः ॥ १४ ॥

विधाय यः प्राक् प्रणवं नमोऽन्ते, मध्यैकबीजं[4] ननु जञ्जपीति ।
तस्यैकवर्णा वितनोत्यवन्ध्या, कामार्जुनी कामितमेव विद्या ॥ १५ ॥

---

सुखे सेवी शकाय एवो अने चिंतव्या करतां पण विशेष तेमज शीघ्र फळ देनारो तुं एक जो चित्तमां विद्यमान छे तो पछी भिन्न भिन्न आगमोए निर्देशेला दुःसाध्य तेमज संदिग्धफलवाळा अने अल्प लाभवाळा अन्य मंत्रो अने यंत्रोथी शुं? ॥ १० ॥

सिंहनी गर्जनाथी हाथीओ जेम दूरथी ज नासी जाय छे तेम तारा प्रभावथी चोर, शत्रु, मरकी, ग्रहो, रोग, लूता रोग, तथा भूत वगेरेना दोष, तथा अग्नि अने बंधनथी उत्पन्न थता भयो दूर चाल्या जाय छे ॥ ११ ॥

चिंतामणि समान तारा रूपनुं चिंतन करवाथी शुं शुं प्राप्त थतुं नथी? जेने पुत्र नथी तेने पुत्रनी प्राप्ति थाय छे, जेनी पासे पैसो नथी ते कुबेर समान बने छे, सेवक पण स्वामी बने छे अने दुःखी सुखी थई जाय छे ॥ १२ ॥

पुष्पो वगेरेथी जाप, घीनो होम, पूजा वगेरे क्रियानो समग्र अधिकार दूर रहो, पण केवळ तारा बीजनुं ध्यान करनारने सौभाग्यलक्ष्मी स्वयं वरे छे ॥ १३ ॥

**महिमा—**

तारा प्रभावथी लोको धर्म, अर्थ, काम अने मोक्षरूप चार पुरुषार्थोने प्राप्त करे छे। जेओ श्रेयनुं स्थान (मोक्ष) प्राप्त करशे, प्राप्त करी गया अने प्राप्त करी रह्या छे ते तारा महिमानो अंश मात्र छे ॥ १४ ॥

जे मनुष्य पहेलां प्रणव 'ॐ' अने अंते 'नमः' तेमज मध्यमां अनुपमबीज 'ह्रीँ'कार (वडे बनेल मंत्र) नो पुनः पुनः जाप करे छे, तेनां वांछितोने एकवर्णवाळी, अवंध्य अने कामधेनु समान 'ह्रीँ'कारविद्या विस्तारे छे ॥ १५ ॥

मंत्र :—'ॐ ह्रीँ नमः'

---

१. सुसाध्यः सद्यःफलचिन्तितार्थाऽधिकप्रदश्चेतसि चेत् त्वमेकः N. ।
२. °श्च नरा ल° N. । ३. वा N. । ४. मध्ये च N. ।

मालामिमां स्तुतिमयीं सुगुणां त्रिलोकी-
बीजस्य यः स्वहृदये निधयेत् क्रमात् सः ।
अङ्केऽष्टसिद्धिरवशा लुठतीह तस्य,
नित्यं महोत्सवपदं लभते क्रमात् सः ॥ १६ ॥

॥ इति 'ह्रीँ'कारविद्यास्तवनम् ॥

---

जे मनुष्य त्रैलोक्यबीजनी सारा गुणवाळी स्तुतिरूपी आ मालाने त्रणे संध्याए पोताना हृदयमां धारण करे छे तेना खोळामां आठे सिद्धिओ अवश बनीने नित्य आळोटे छे अने ते क्रमे करीने मोक्षपदने पामे छे ॥ १६ ॥

## परिचय

आ स्तोत्र 'पञ्चनमस्कृतिदीपक' नामक ग्रंथमां संग्रहीत छे। 'ह्रीँकारविद्यास्तव'नी जेम 'पूज्य-पाद'नी कृति तरीके तेनो कर्ताए संग्रह कर्यो छे, छतां स्तोत्रना कर्ता विशे बीजा पुरावानी अपेक्षा रहे ज छे।

आ स्तोत्रमां १६ पद्यो छे, ते पैकी १५ पद्यो उपजातिवृत्तमां छे अने छेल्लुं १६ मुं पद्य वसंततिलकावृत्तमां छे।

ह्रीँकारविद्याने अन्य तंत्रोए पण खूब महत्त्व आप्युं छे। तंत्रनो कोई पण ग्रंथ-प्रायः एना उल्लेख विनानो नहीं होय। आ स्तोत्रनी रचना उपरथी एम लागे छे के आ स्तोत्र कोई जैनेतर संप्रदायनुं होवुं जोईए। तेथी अमे एने परिशिष्ट तरीके प्रगट कर्युं छे। अभ्यासीओने ए उपयोगी थशे।

जुदा जुदा वर्णोमां तेम ज आधारादि चक्रोमां ह्रीँकारना ध्याननो निर्देश पण आ स्तोत्रमां छे।



---

१. सगुणां N.। २. कुरुते त्रिसंध्यं N.। ३. महोदयपदं N.।




ॐ ह्रीँ वाच्यार्थस्वरूपदर्शक चित्रम् (ॐ ह्रीँ अर्हँनी पाटली)

# मायाबीजस्तुतिः

'स'वर्णपार्श्वे ल-यमध्यसिद्धमधीश्व(स्व)रं भास्वरवर्णभासम् ।
खण्डेन्दुनादस्फुटबिन्दुयुक्तं, त्वां शक्तिबीजं (ज!) प्रमनाः प्रणौमि ॥ १ ॥
श्वेतं रक्तं तथा पीतं, नीलं ध्यानं चतुर्विधम् ।
विधिना ध्यायमानं च, फलं भवति नान्यथा ॥ २ ॥
श्वेते मुक्तिर्भवेत् पुंसो, रक्ते वश्यं परं स्मृतम् ।
पीते लक्ष्मीर्भवत्येव, नीले च शत्रुमारणम् ॥ ३ ॥
मन्त्राः सहस्रशः सन्ति, शिवशक्तिनिवेदिताः ।
अन्यथा ते च विज्ञेया, मायाबीजाग्रतो यथा ॥ ४ ॥
लक्षसंख्ये कृते जापे, दशांशेन तु होमयेत् ।
पृथ्वीपतित्वं जायेत, सत्यं सत्यं च नान्यथा ॥ ५ ॥
रणे राजकुले वह्नौ, दुर्ग-शस्त्रविसङ्कटे ।
शतमष्टोत्तरं जापं, कणवीर-सगुग्गुलम् ॥ ६ ॥
जयमाप्नोति शत्रुभ्यः, पृथिवीपतिवल्लभः ।
अपुत्रो लभते पुत्रान्, सौभाग्यं दुर्भगो लभेत् ॥ ७ ॥
अष्टम्यां चतुर्दश्यां वा, पर्वणि ग्रहणेषु च ।
हूयते वाऽनले सम्यग्, नात्र कार्या विचारणा ॥ ८ ॥

---

## अनुवाद

**प्रारंभिक मंगल—**

जेनी पार्श्वमां 'स' वर्ण छे (एवो 'ह'), जे 'ल' अने 'य'ना मध्यमां सिद्ध (निश्चित) छे (एवो 'र्'), अंतमां 'ई' स्वरवाळा, देदीप्यमान वर्णनी कांतिवाळा, अर्धचंद्र(कला), नाद अने स्पष्ट एवा बिन्दुथी युक्त एवा हे शक्तिबीज ! ('ह्रीं' कार !) हुं तने उल्लासभेर (भावपूर्वक) स्तवुं छुं ॥ १ ॥

**वर्णोमां ध्यान अने तेनुं फळ—**

श्वेत, रक्त, पीत अने नील ए चार प्रकारनुं ध्यान छे अने ते विधिपूर्वक कराय तो इष्टफळ आपे छे, अन्यथा (विधि विना) ते फळ आपतुं नथी ॥ २ ॥

श्वेतध्यानथी मुक्ति थाय छे, रक्तध्यानथी वशीकरण थाय छे, पीतध्यानथी लक्ष्मीनी प्राप्ति थाय छे अने नील ध्यानथी शत्रुनुं मारण थाय छे—एम (मन्त्रशास्त्रमां) कह्युं छे ॥ ३ ॥

**माहात्म्य—**

शिवे पार्वतीने कहेला तो हजारो मंत्रो छे; परंतु मायाबीजनी आगळ ते बधा कंई ज नथी, एम जाणवुं ॥ ४ ॥

एक लाख जाप कर्या पछी (लाखना) दशमा भागे होम करवो । एम करवाथी राजवीपणुं मळे छे, ए खरेखर सत्य छे, खोटुं नथी । युद्ध, राजकुल अने अग्नि तेमज दुर्ग, शस्त्र वगेरेथी उत्पन्न थता संकटमां कणेरना फूलो अने गूगळ (ना धूप) वडे विधिपूर्वक एकसो ने आठ वार जाप करवो । एना प्रभावथी साधक शत्रुओ उपर जय मेळवे छे, राजाने प्रिय बने छे, पुत्र विनानो पुत्रोने मेळवे छे अने दुर्भागी सौभाग्यने पामे छे । (ए माटे) आठम, चौदश, अन्य पर्वदिवसोमां अने ग्रहणना दिवसोमां विधिपूर्वक अग्निमां होम करवो जोईए । एमां बीजो विचार न करवो ॥ ५–८ ॥

१

निर्मलं सलिलं स्वच्छं, गालितं जन्तुवर्जितम् ।
पूर्वस्यां दिग्विभागे तु, मन्त्रयुक् स्नपनं स्मृतम् ॥ ९ ॥

**स्नानमन्त्रः**—"ॐ प्राँ प्रीं प्रूँ प्रः अमले विमले अशुचिः शुचिर्भवामि स्वाहा" ॥

पश्चाद् भूमिं शुचिं कृत्वा, पृथ्वीबीजेन सर्वदा ।
ॐ भूरसि भूतधात्रीयं (भूतधात्रि), विश्वाधारे नमस्तथा ॥ १० ॥
कौसुम्भं रक्तवस्त्रं वा, पट्टकूलं सहाञ्चलम् ।
परिधाय श्वेतवस्त्रं, ततः पूजनमारभेत् ॥ ११ ॥
विशालचतुरस्रे च, पट्टे शैवनि(लि)के शुचौ ।
ऊर्णामये पवित्रे वा, आसनं क्रियते बुधैः ॥ १२ ॥
कर्पूरागरुकस्तूरीचन्दनैर्यक्षकर्दमैः ।
केसरैर्मिश्रितैः सम्यग् लेपनं युज्यतेऽन्वहम् ॥ १३ ॥
शतपत्रैश्चम्पकैः पुष्पैर्जातिपुष्पैः श्रीखण्डकैः ।
अष्टोत्तरशतं संख्यं, पूजनं तत्र कारयेत् ॥ १४ ॥
देवपूजा प्रकर्तव्या, चैकचित्तेन सर्वदा ।
नैवेद्यं धूपनं पूगसुपत्राणि च ढौकयेत् ॥ १५ ॥
एवं कृतविधानेन, पश्चाद् होमं च कारयेत् ।
गोमयेन भुवं लिप्त्वा, स्थण्डिलं तत्र कारयेत् ॥ १६ ॥

---

**हवनविधान अने तेनुं फळ—**

(साधके) गाळेला, जन्तुओथी रहित, निर्मळ अने स्वच्छ एवा जलथी पूर्वदिशामां (मुख करीने ?) मन्त्रपूर्वक स्नान करवुं, एम कहेलुं छे ॥ ९ ॥

**स्नानमंत्रः**—"ॐ प्राँ प्रीं प्रूँ प्रः अमले विमले अशुचिः शुचिर्भवामि स्वाहा" ॥

ए पछी हंमेशां पृथ्वीबीजथी भूमिने पवित्र बनाववी ।

**भूमिशुद्धिमंत्रः**—"ॐ भूरसि भूतधात्रीयं (धात्रि) विश्वाधारे नमः ॥" ॥ १० ॥

ए पछी कसुंबाथी रंगेल के लाल वस्त्र, पटोळ के रेशमी पीतांबरादि वस्त्र अथवा श्वेत वस्त्र पहेरीने पूजननो आरंभ करवो ॥ ११ ॥

विशाळ अने चोरस एवा शैवल (पद्म) काष्ठना बनावेला पवित्र पाटला उपर अगर पवित्र ऊनना आसन उपर बेसवुं ॥ १२ ॥

कपूर, अगरु, कस्तूरी, चंदन, यक्षकर्दम (गोरोचन) अने केसरना मिश्रणवडे प्रतिदिन सारी रीते (पूर्वोक्त पटनुं ?) विलेपन करवुं ॥ १३ ॥

शतपत्र-कमळो, चंपानां फूलो, जाईनां फूलो अथवा चंदननां पुष्पोथी त्यां एकसो ने आठ वार पूजा कराववी ॥ १४ ॥

देवनी पूजा हंमेशां एकचित्तथी करवी अने नैवेद्य, धूप, सोपारी, सुंदर पत्रो वगेरे सामे मूकवां ॥१५॥

आ प्रकारनी विधि करीने पछी होम करवो। (ते माटे) गोमय(छाण)थी भूमिने लींपीने त्यां स्थंडिल (होम माटे मांडलुं) बनाववुं ॥ १६ ॥

चतुरस्रं त्रिकोणं वा, शान्तिकर्मणि युज्यते ।
अष्टाम्बुजं वर्तुलं च, काम्यकार्ये प्रशस्यते ॥ १७ ॥
अग्निं संवेश्य तत्रादौ, वरद् नाम एव च ।
समिधः शोधयित्वा तु, आहूयेद् मन्त्रविश्रुतः ॥ १८ ॥

**अग्निस्थापनमंत्रः**—"ॐ छागस्थ-तनुपाद् वरद एहि एहि आगच्छ आगच्छ हूं फट् स्वाहा" ॥ इति ॥

क्षीराद्य-नालिकेरैश्च, द्राक्षयाऽगरुचन्दनैः ।
शर्करा चोत्तती चैव, लवङ्गैर्घृतमिश्रितैः ॥ १९ ॥
प्रथमं गुग्गुलैः सार्धं, कलिं कणवीरस्य च ।
सम्मील्य घृतयुक्तेन, हवनं तत्र कारयेत् ॥ २० ॥
शान्तिकं पौष्टिकं चैव, वश्यमाकर्षणं तथा ।
उच्चाटनं च स्तम्भं च, सर्वकर्माणि साधयेत् ॥ २१ ॥
चतुष्षष्टिर्महादेव्यो, विख्याता भूतले सदा ।
ताः सर्वाः संस्थिता नित्यं, मायाबीजे वरे परे ॥ २२ ॥
एवं विधानमात्रेण, सर्वास्तुष्यन्ति देवताः ।
सुश्रेयो योगिनां मुख्यो, नृपतुल्यो नरो भवेत् ॥ २३ ॥
विसर्जनं तु कर्तव्यं, मायाबीजेन सर्वदा ।
ॐमिति ह्रीँ फट् स्वस्थानं, गम्यतां च स्वकं तथा ॥ २४ ॥

---

शांतिकर्म माटे चोरस अथवा त्रिकोण अने काम्यकर्म माटे आठ कमळवाळो (अष्टदलकमलाकार ?) अने वर्तुळाकार स्थंडिल प्रशस्त कहेल छे ॥ १७ ॥

मांत्रिके सौथी प्रथम ते मांडलामां अग्नि पधराववो, ए पछी समिधोनुं शोधन करीने 'वरद' नाम मंत्रथी (?) आहूति आपवी ॥ १८ ॥

**अग्निस्थापनमंत्रः**—"ॐ छागस्थ-तनुपाद् वरद एहि एहि आगच्छ आगच्छ हूं फट् स्वाहा ॥"

खीर, नाळियेर, द्राक्ष, अगरु, चंदन, साकर, तज अने घीथी मिश्रित एवा लविंग ए बधाने प्रथम गूगळ साथे मेळववुं, पछी तेमां कणेरनी कळीओ मेळववी अने ए बधानो घीसहित होम कराववो ॥ १९-२० ॥

ए पछी मांत्रिके शांतिक, पौष्टिक, वश्य, आकर्षण, उच्चाटन, स्तंभन वगेरे सर्व कार्यो साधवां ॥ २१ ॥

समग्र विश्वमां सदा प्रसिद्ध एवी चोसठ योगिनी महादेवीओ छे, ते सर्वे आ उत्कृष्ट एवा मायाबीज 'ह्रीँ'कारमां सदा विराजमान छे ॥ २२ ॥

आ प्रकारना विधानमात्रथी बधा देवता संतुष्ट थाय छे। तेथी साधक ख्यातिमान थाय छे, योगीओमां प्रधान योगी बने छे अने राजा समान ऐश्वर्यवाळो थाय छे ॥ २३ ॥

विसर्जन पण सर्वदा मायाबीज 'ह्रीँ'कारथी (विसर्जनमुद्रापूर्वक) करवुं ।

**विसर्जनमंत्रः**—"ॐ ह्रीँ फट् स्वस्थानं गच्छ गच्छ (स्वाहा) ॥" ॥ २४ ॥

**आज्ञाहीनं क्रियाहीनं, मन्त्रहीनं च यत्कृतम् ।**
**तत् सर्वं क्षम्यतां देवि ! प्रसीद परमेश्वरि ॥ २५ ॥**

**एतद् गुह्यं समाख्यातं, मायाबीजस्य जीवनम् ।**
**न देयं यस्य कस्यापि, मन्त्रविद्भिः कदाचन ॥ २६ ॥**

**॥ इति मायाबीजस्तुति-पूजास्तवनम् ॥**

---

(उपसंहारमां क्षमापनादि माटे 'आज्ञाहीनं....' इत्यादि श्लोक बोलवो ।)

मंत्रनी आराधना करतां कंई पण आज्ञाविरुद्ध थयुं होय, क्रियाहीन—क्रियामां कंई पण खामी आवी होय, मंत्रहीन—मंत्र बोलवामां कंई पण हीन अथवा विपरीत बोलायुं होय, अथवा एवी बीजी कोई पण खामी आवी होय तो हे देवि ! तेनी क्षमा करो । हे परमेश्वरि ! मारा उपर प्रसन्न थाओ ॥ २५ ॥

आगमोमां आ विधानने मायाबीजनुं रहस्य अथवा जीवन कहेवामां आव्युं छे । मंत्रविद् पुरुषोए जेने तेने (अयोग्यने) ते कदी पण न आपवुं ॥ २६ ॥

## परिचय

आ स्तुतिनी एक नकल आ० श्रीविजयप्रतापसूरिजी पासेथी अमने प्राप्त थई हती । तेने भाषानी दृष्टिए सुधारी अनुवाद साथे प्रगट करी छे ।

मायाबीज ए ह्रींकारनुं ज बीजुं नाम छे एटले आ स्तुति 'ह्रींकारविद्या' उपर प्रकाश नाखे छे । एनी बीजा प्रकारनी साधना—खास करीने होमविषयक साधना अने महत्ता बतावनारी आ कृति छे । तेथी एम लागे छे के आ स्तोत्र कोई जैनेतर संप्रदायनुं हशे । आना कर्त्ता विशे कोई माहिती मळी नथी ।

आ स्तोत्रमां प्रथम पद्य उपजाति वृत्तमां अने पछीनां २५ पद्यो अनुष्टुप् वृत्तमां छे । ह्रींकारनुं स्वरूप, ध्यान, आराधना अने फळ विशे आ कृतिमां वर्णन छे ।



# [४९-४]

# श्रीजयसिंहसूरिविरचितः 'धर्मोपदेशमाला'न्तर्गतः 'अर्हँ' अक्षरतत्त्वस्तवः

प्रणम्य तत्त्वकर्त्तारं महावीरं सनातनम् ।
श्रुतदेवीं गुरुं चैव परं तत्त्वं ब्रवीम्यहम् ॥ १ ॥
शान्ताय गुरुभक्ताय विनीताय मनस्विने ।
श्रद्धावते प्रदातव्यं जिनभक्ताय दिने दिने ॥ २ ॥
अकारादि-हकारान्ता प्रसिद्धा सिद्धमातृका ।
युगादौ या स्वयं प्रोक्ता ऋषभेण महात्मना ॥ ३ ॥
एकैकमक्षरं तस्यां तत्त्वरूपं समाश्रितम् ।
तत्रापि त्रीणि तत्त्वानि येषु तिष्ठति सर्ववित् ॥ ४ ॥

'अ' तत्त्वम्—

अकारः प्रथमं तत्त्वं सर्वभूताभयप्रदम् ।
कण्ठदेशं समाश्रित्य वर्तते सर्वदेहिनाम् ॥ ५ ॥

---

## अनुवाद

तत्त्व (मोक्षमार्ग) ना कर्ता (आद्य उपदेशक) अने सनातन एवा श्री महावीर प्रभु, श्रुतदेवी अने श्री सद्गुरुने नमस्कार करीने हुं परतत्त्व 'अर्हँ'कारने कहुं छुं ॥ १ ॥

आ तत्त्व–'अर्हँ'कार शान्त, गुरुभक्त, विनीत, स्वाधीनचित्तवाळा, श्रद्धावान् अने प्रतिदिन जिनभक्तिमां वधता एवा योग्य पुरुषने ज आपवुं ॥ २ ॥

'अ'थी शरु थती अने 'ह'मां अंत पामती एवी (ते) सिद्ध-मातृका (अनादिसिद्ध बाराक्षरी-बाराखडी) प्रसिद्ध छे के जेने युगना प्रारंभमां परमात्मा श्री ऋषभदेव भगवंते स्वयं कही हती ॥ ३ ॥

ते(सिद्धमातृका)मांनो एक एक अक्षर तत्त्वरूपने समाश्रित (प्राप्त) छे (अर्थात् प्रत्येक अक्षर तत्त्वरूप छे) । तेमां पण 'अ', 'र्' अने 'ह्' ए त्रण तत्त्वो एवां (विशिष्ट) छे के जेमां सर्वज्ञ परमात्मा रहेला छे ॥ ४ ॥

**'अ' तत्त्वनुं वर्णन :—**

तेमां अकार प्रथम तत्त्व छे, सर्व प्राणीओने अभय आपनारुं छे अने सर्व देहधारीओना कंठस्थानने आश्रीने रहेलुं छे ॥ ५ ॥

सर्वात्मानं (सर्वात्मकं) सर्वगतं सर्वव्यापि सनातनम् ।
सर्वसत्त्वाश्रितं दिव्यं चिन्तितं पापनाशनम् ॥ ६ ॥
सर्वेषामपि वर्णानां स्वराणां च धुरि स्थितम् ।
व्यञ्जनेषु च सर्वेषु ककारादिषु संस्थितम् ॥ ७ ॥
पृथिव्यादिषु भूतेषु देवेषु समयेषु च ।
लोकेषु च (चैव) सर्वेषु सागरेषु सु (स्व) रेषु (सरित्सु) च ॥ ८ ॥
मन्त्र-तन्त्रादियोगेषु सर्वविद्याधरेषु च ।
विद्यासु च (चैव) सर्वासु पर्वतेषु वनेषु च ॥ ९ ॥
शब्दादिसर्वशास्त्रेषु व्यन्तरेषु नरेषु च ।
पन्नगेषु च सर्वेषु देवदेवेषु नित्यशः ॥ १० ॥
व्योमवद् व्यापिरूपेण सर्वेष्वेतेषु संस्थितम् ।
नातः परतरं ब्रह्म विद्यते भुवि किञ्चन ॥ ११ ॥
इदमाद्यं भवेद् यस्य कलाऽतीतं कलाश्रितम् ।
नाम्ना परमदेवस्य ध्येयोऽसौ मोक्षकाङ्क्षिभिः ॥ १२ ॥

'र्' तत्त्वम्—

दीप्तपावकसङ्काशं सर्वेषां शिरसि स्थितम् ।
विधिना मन्त्रिणा ध्यातं त्रिवर्गफलदं स्मृतम् ॥ १३ ॥

---

ते तत्त्व सर्वस्वरूप, सर्वगत, सर्वव्यापी, सनातन अने सर्व प्राणीओने आश्रीने रहेलुं छे। तेनुं 'दिव्य चिंतन' (सर्व) पापनो नाश करे छे ॥ ६ ॥

ते तत्त्व (अकार) बधाय वर्णो अने स्वरोमां अग्रस्थाने रहेलुं छे अने ककारादि सर्व व्यञ्जनो(ना उच्चारण) मां रहेलुं छे। ते तत्त्व पृथिवी आदि पांच महाभूतो (पृथिवी, जल, तेजस्, वायु अने आकाश), देवो, समयो, सर्वलोको, समुद्रो, नदीओ, मंत्रो अने तन्त्रादि योगो, सर्व विद्याधरो, सर्व विद्याओ, पर्वतो, वनो, व्याकरण आदि सर्व शास्त्रो, व्यन्तरो, मनुष्यो, सर्पो अने सर्व देवाधिदेवो—ए बधामां आकाशनी जेम सर्वव्यापीरूपे रहेलुं छे। विश्वमां एनाथी श्रेष्ठ बीजुं कोई ब्रह्म विद्यमान नथी ॥ ७–११ ॥

कलारहित अथवा कलासहित एवुं आ (परम) तत्त्व नामवडे जे परमदेवनी आदिमां छे, ते-(परमदेव) नुं मोक्षनी आकांक्षावाळा पुरुषोए ध्यान करवुं जोईए ॥ १२ ॥

'र्' तत्त्वनुं वर्णन :—

सर्व प्राणीओना मस्तकमां रहेल प्रदीप्त अग्निसमान आ तत्त्वनुं मंत्रधारकवडे जो विधिपूर्वक ध्यान कराय तो ते धर्म, अर्थ अने काम ए त्रिवर्गनी प्राप्ति रूप फळने आपनारुं छे, एम कह्युं छे ॥ १३ ॥

यस्य देवाभिधानस्य मध्ये ह्येतद् व्यवस्थितम् ।
पुण्यं पवित्रं म(मा)ङ्गल्यं पूज्योऽसौ तत्त्वदर्शिभिः ॥ १४ ॥

'ह्' तत्त्वम् —

सर्वेषामपि भूतानां नित्यं यो हृदि संस्थितः ।
पर्यन्ते सर्ववर्णानां सकलो निष्कलस्तथा ॥ १५ ॥
हकारो हि महाप्राणः लोकशास्त्रेषु पूजितः ।
विधिना मन्त्रिणा ध्यातः सर्वकार्यप्रसाधकः ॥ १६ ॥
यस्य देवाभिधानस्य पर्यन्त एष वर्तते ।
मुमुक्षुभिः सदा ध्येयः स देवो मुनिपुङ्गवैः ॥ १७ ॥

बिन्दुः—

सर्वेषामपि सत्त्वानां नासाग्रे परिसंस्थितम् ।
बिन्दुकं सर्ववर्णानां शिरसि सुव्यवस्थितम् ॥ १८ ॥
हकारोपरि यो बिन्दुर्वर्तुलो जलबिन्दुवत् ।
योगिभिश्चिन्तितस्तस्थौ मोक्षदः सर्वदेहिनाम् ॥ १९ ॥
त्रीण्यक्षराणि बिन्दुश्च यस्य देवस्य नाम वै ।
स सर्वज्ञः समाख्यातः 'अर्हँ' त इ(दि)ति पण्डितैः ॥ २० ॥

---

पुण्य, पवित्र अने मंगल एवुं आ तत्त्व जे परमात्मा (अर्हँ) ना नामनी मध्यमां रहेलुं छे, ते परमात्मा तत्त्वदर्शिओने पूज्य छे ॥ १४ ॥

'ह्' तत्त्वनुं वर्णन :—

सर्व प्राणीओना हृदयमां सदा रहेल, सर्व वर्णोनी अंते रहेल, कलासहित, कलारहित अने लौकिक शास्त्रोमां 'महाप्राण' तरीके पूजित (बहुमत) एवा 'ह'कारनुं मंत्रधारकवडे जो विधिपूर्वक ध्यान कराय तो ते सर्व कार्योनो साधक छे ॥ १५–१६ ॥

जे देवना नामनी अंतमां आ ('ह'कार) रहे छे ते (अर्हँ) देवनुं मुमुक्षु मुनिवरोए सदा ध्यान करवुं जोईए ॥ १७ ॥

बिंदुनुं वर्णन :—

जे सर्व प्राणीओनी नासिकाना अग्रभागने विषे रहेल छे, जे सर्व वर्णोना मस्तके सुव्यवस्थित छे, जे 'ह'कार उपर जलबिंदुनी जेम वर्तुलाकारे रहेल छे अने जे योगीओवडे सदा चिन्तित छे, ते बिंदु सर्व जीवोने मोक्ष आपनार छे ॥ १८–१९ ॥

त्रण अक्षरो अने बिंदु मळीने जे देवनुं नाम थाय छे ते देव पण्डितो वडे सर्वज्ञ परमात्मा अर्हँ' (अरिहंत) कहेवाया छे ॥ २० ॥

उपसंहार :—

एतदेव समाश्रित्य कला ह्यर्धचतुर्थिका।
नाद-बिन्दु-लयाश्चेति कीर्तिताः परवादिभिः ॥ २१ ॥
मूर्तो ह्येष अमूर्तश्च कलातीतः कलान्वितः।
सूक्ष्मश्च बादरश्चेति व्यक्तोऽव्यक्तश्च पठ्यते ॥ २२ ॥
निर्गुणः सगुणश्चैव सर्वगो देशसंस्थितः।
अक्षयः क्षययुक्तश्च अनित्यः शाश्वतस्तथा ॥ २३ ॥

॥ इति 'अर्हँ' अक्षरतत्त्वस्तवः ॥

---

उपसंहार :—

आ 'अर्हँ' नो आश्रय लईने परवादीओए साडी त्रण मात्रावाळी कला (कुंडलिनी ?), नाद, बिंदु अने लय कह्या छे। (तात्पर्य के परोक्त कुंडलिनी योग, नादानुसंधान योग, लययोग वगेरे 'अर्हँ' ना ध्याननी प्रक्रियामांथी नीकळ्या छे) ॥ २१ ॥

आ 'अर्हँ' रूप सर्वज्ञ परमात्मा (स्याद्वादशैलीए) मूर्त–अमूर्त, कलारहित–कलासहित, सूक्ष्म–स्थूल, व्यक्त–अव्यक्त, निर्गुण–सगुण, सर्वव्यापी–देशव्यापी, अक्षय–क्षयवान् अने अनित्य–नित्य छे ॥ २२–२३ ॥

## परिचय

श्रीधर्मदास गणिए रचेला 'धर्मोपदेशमाला' नामना ५४१ प्राकृतगाथाओना प्राचीन प्रकरण-ग्रंथ ऊपर अनेक जैनाचार्योए व्याख्याओ अने विवरणो रच्यां छे, ते पैकी श्री जयसिंहसूरिनुं 'धर्मोपदेश-माला-विवरण' सिंघी जैन ग्रंथमाला, मुंबईथी वि. सं. २००५ मां प्रगट थयेल छे। आ ग्रंथना पृष्ठ १७८-१७९ मांथी 'अर्हँ अक्षरतत्त्वस्तव' नी संस्कृत भाषाना २३ अनुष्टुप् पद्योवाळी रचना अनुवाद साथे अहीं प्रगट करी छे।

श्री जयसिंहसूरिए पोतानी कृतिना अंते ३१ प्राकृत गाथाओमां प्रशस्ति आपेली छे, तेमां २८–२९ मी गाथामां आ ग्रंथनी रचना वि० सं० ९१५ मां थयानुं जणाव्युं छे। एटले आ स्तव पण ए समयनुं छे ए निर्विवाद छे।

आ स्तोत्रमां 'अर्हँ' नुं सुंदर वर्णन छे। एमां अ, र, ह अने बिंदुनी विशेषताओ सुंदर रीते दर्शाववामां आवी छे अने ए अक्षरोनी व्यापकतानुं पण सुंदर निरूपण छे। इतर दर्शनोमां रहेली नाद बिंदु, कला, लय वगेरेनी साधना आ 'अर्हँ' मांथी नीकळी छे, एम आ स्तोत्र कहे छे। अंतमां 'अर्हँ'-ने मूर्तामूर्तादि विशेषणोथी वर्णववामां आवेल छे। स्तोत्रनी रचना काव्यनी दृष्टिए पण मनोहर छे।




कलामय 'अर्हँ' मङ्गलपाठः

[५०-५]

# अर्हँ

## श्रीहेमचन्द्रसूरिरचितश्रीसिद्धहेमचन्द्रशब्दानुशासनस्य मङ्गलाचरणसूत्रम् स्वोपज्ञ तत्त्वप्रकाशिकाटीका-शब्दमहार्णवन्याससंवलितम् ॥

## अर्हँ । १ । १ । १ ॥

तत्त्वप्रकाशिका टीका—

(स्वरूपम्) ...............'अर्हँ' इत्येतदक्षरम्।
(अभिधेयम्) ............परमेश्वरस्य परमेष्ठिनो वाचकम्।
(तात्पर्यम्) ...............सिद्धचक्रस्यादिबीजम्।
सकलागमोपनिषद्भूतम्।
(क्षेमम्) ..................अशेषविघ्नविघातनिघ्नम्।
(योगः) ...................अखिलदृष्टाऽदृष्टफलसंकल्पकल्पद्रुमोपमम्।
(प्रणिधानम्) ............आशास्त्राध्ययनाऽध्यापनावधि प्रणिधेयम्।
(प्रणिधानस्य द्वैविध्यम्)...प्रणिधानं चानेनात्मनः सर्वतः संभेदस्तदभिधेयेन चाभेदः।
(विशिष्टप्रणिधानम्) ......वयमपि चैतच्छास्त्रारम्भे प्रणिदध्महे।
(तत्त्वम्) ...............अयमेव हि तात्त्विको नमस्कार इति ॥ १ ॥

### अनुवाद

'अर्हँ' ए अक्षर, परमेश्वर परमेष्ठिनो वाचक, सिद्धचक्रनुं आदि बीज, सकल आगमोनुं रहस्य, सर्व विघ्नोनो नाश करवामां समर्थ अने सकल दृष्ट के अदृष्ट फळोना संकल्पने पूरवा माटे कल्पवृक्षसमान छे। एनुं शास्त्रना अध्ययन अने अध्यापन वखते प्रणिधान करवुं जोईए। एनी साथे आत्मानो सर्वतः संभेद अने एना अभिधेय (प्रथम परमेष्ठी) साथे आत्मानो अभेद, एम बे प्रकारनुं प्रणिधान छे। अमे (शब्दानुशासनकार) पण एनुं शास्त्रना आरंभमां प्रणिधान करीए छीए। 'अर्हँ' ए ज तात्त्विक नमस्कार छे ॥ १ ॥[1]

१. विशेषार्थ माटे जुओ 'शब्दमहार्णवन्यास'।

**शब्दमहार्णवन्यासः—**

अर्हँ' इत्यादि-वाक्यैकदेशत्वात् साध्याहारत्वादध्याह्रियमाणप्रणिधानलक्षणक्रियाकर्मण उक्तत्वात् "नाम्नः प्रथमैक-द्वि-बहौ" [२-२-३१] इत्युत्पन्नाया प्रथमाया 'अर्हँ' इत्येतस्मात् सूत्रत्वाल्लुक्।

तदर्थं व्याचष्टे—व्याख्या च स्वरूपा-ऽभिधेय-तात्पर्यभेदात् त्रेधा। तां च 'अर्हँ' इत्यादिना दर्शयति —तत्र 'अक्षरम्' इति स्वरूपम्। 'परमेष्ठिनो वाचकम्' इत्यभिधेयम्। 'सिद्धचक्रस्य' इत्यादिना तात्पर्यम्।

**(स्वरूपम् -'अर्हँ' इत्येतदक्षरम्।)**

अक्षरमिति—अक्षरं बीजम्। तदेवाह—**आदिबीजमिति।**

कस्य तदादिबीजम्?

सिद्धचक्ररूपस्य तत्त्वस्य; सबीज-निर्बीजभेदेन तत्त्वस्य द्वैविध्यात्।

---

**अनुवाद**

'अर्हँ' एटलुं—एकलुं ज एमने एम होय तो तेनो कोई अर्थ संगत थतो नथी। ए एकलुं पूर्ण वाक्य बनतुं नथी, एटले कोई पण क्रियानो अध्याहार करवो आवश्यक छे; तेथी 'अर्हँ' ए वाक्यनो एक भाग थयो। जे क्रियानो अध्याहार करवानो छे ते बीजो भाग थयो। अहीं प्रकृतमां प्रणिधानक्रियानो अध्याहार करवानो छे, तेथी 'अर्हँ' ए प्रणिधानक्रियानुं कर्म छे। क्रियापदनो प्रयोग कर्मणि-प्रत्यय लावीने कर्यो छे, एटले कर्म उक्त थाय छे ने तेथी तेने "नाम्नः प्रथमैक-द्वि-बहौ" [२-२-३१] ए सूत्रथी प्रथमा विभक्ति प्राप्त थाय छे; ए प्रथमा विभक्तिनो अहीं सूत्रपणाने कारणे 'लुक्'-लोप करवामां आव्यो छे।

व्याख्याना त्रण प्रकारो छे:—(१) स्वरूप (२) अभिधेय अने (३) तात्पर्य। तेमां 'अक्षर' थी स्वरूप, 'परमेष्ठिनो वाचक' थी अभिधेय अने 'सिद्धचक्रनुं आदिबीज' वगेरेथी तात्पर्य कहे छे। (आ प्रकारो विस्तारथी समजावे छे।)

**(१. स्वरूप)**

अक्षर एटले बीज। अक्षरनो अर्थ बीज थाय छे, ए ज वात 'आदिबीजम्' ए पदथी जणावी छे।

**प्रश्न**—ए कोनुं आदिबीज छे?

उत्तर—सिद्धचक्ररूपी तत्त्वनुं ए आदिबीज छे; तत्त्वना सबीज अने निर्बीज एवा बे प्रकारो छे। (तेमां सिद्धचक्ररूपी जे सबीज तत्त्व छे तेनुं आ आदिबीज छे।)

---

१. **'न्याससारसमुद्धारः' इत्याख्यन्यासानुसारी तत्तच्छब्दोपरि विशिष्टोऽर्थनिर्देश स एवोट्टङ्कयते।**

अर्हति पूजामित्यर्हँ—'अः' [उणा० २.] इत्यः। पृषोदरादित्वात् सानुनासिकत्वम्। 'अर्हम्' इति मान्तोऽप्यस्ति निपातः। ननु 'अर्हम्' इत्यव्ययं स्वरादौ चादौ च न दृष्टम्, तत् कथमव्ययम्? सत्यम्—

**'इयन्त इति संख्यानं, निपातानां न विद्यते।**
**प्रयोजनवशादेते, निपात्यन्ते पदे पदे॥'**

**अनुवाद**:—'न्याससारसमुद्धार'मां 'शब्दमहार्णवन्यास'ना ते ते शब्दना विशिष्ट अर्थनो निर्देश छे (आ अने पछीनी टिप्पणीओमां आपेल संस्कृतपाठ 'न्याससारसमुद्धार'नो छे)।

पूजाने योग्य ते 'अर्हँ' कहेवाय। पृषोदरादि सूत्रथी 'अर्ह' शब्दने अनुनासिक लगाडतां 'अर्हँ' बने छे। वळी 'अर्हम्' एवो 'म'कारान्त निपात पण छे। अहीं ए प्रश्न थाय छे के, स्वरादिगण के चादिगणमां 'अर्हम्' अव्यय आवतुं नथी तो पछी ते कई रीते अव्यय छे? तेनो खुलासो ए छे के—

"निपातो (अव्ययो) आटला ज छे एवी संख्या नियत नथी। प्रयोजन प्राप्त थतां स्थळे स्थळे निपातित कराय छे।"

यद् **धर्मसारोत्तरम्**—

"अक्षरमनक्षरं वै द्विविधं तत्त्वमिष्यते।
अक्षरं बीजमित्याहुर्निर्बीजं चाप्यनक्षरम्॥"

यद्वा न क्षरति—न चलति स्वस्मात् स्वरूपादक्षरं तत्त्वं ध्येयं ब्रह्मेति यावत्, वर्णो वा।

द्विविधो हि मन्त्रः, कूटरूपोऽकूटरूपश्च। संयुक्तः कूट इति व्यवह्रियते, इतरोऽकूट इति।

अत एव चास्माद् 'वर्णाव्ययात् कारः' [७-२-१५६] इति कारं कुर्वते वृद्धाः, 'क्षकारः' इति, 'ॐकारः' इति, 'ह्म्ल्व्र्यूँकारः' इति, 'अकारः' इतिवत्। कूटेष्वेकस्यैवाक्षरस्य मन्त्रत्वात्, शेषस्य तु परिकरत्वात्।

---

'**धर्मसारोत्तर**' मां कह्युं छे के—

"अक्षर अने अनक्षर एम बे प्रकारनुं तत्त्व छे, तेमां जे बीज छे ते अक्षरतत्त्व कहेवाय छे अने जे बीजरहित छे ते अनक्षरतत्त्व कहेवाय छे।" (आ अक्षरतत्त्वनो एक अर्थ थयो। हवे बीजो अर्थ—)

पोताना स्वरूपथी जे चलित न थाय ते अक्षर। एटले अक्षर शब्दथी तत्त्वध्येय रूप ब्रह्म लेवुं, अथवा वर्णात्मक अक्षर लेवो।

प्रश्न—('अ आ' वगेरे जे एक ज वर्ण होय तेने तो वर्ण के अक्षर कही शकाय, पण अहीं तो 'अर्हं' मां घणा अक्षरो भेगा थयेला छे एटले एने वर्ण के अक्षर शी रीते कही शकाय? 'अक्षराणि' एम कहेवुं जोईए, पण अहीं तो 'अक्षरं' कहेलुं छे।)

उत्तर—मंत्रो बे प्रकारना छे: (१) कूट अने (२) अकूट। संयुक्त होय तेने 'कूट' कहे छे अने संयुक्त न होय तेने 'अकूट' कहेवामां आवे छे। (कूट मंत्रमां अक्षरो जो के घणा होय छे तो पण तेमां मंत्र तो एक ज अक्षर होय छे, बाकीना अक्षरो ते मंत्रना परिकर–परिवाररूप होय छे।)

कूट मंत्रमां घणा अक्षरो होवा छतां एक ज अक्षर मंत्रस्वरूप होवाथी 'वर्णाव्ययात् कारः' [७-२-१५६] ए सूत्रथी क्षकार, ॐकार, ह्म्ल्व्र्यूँकार वगेरे शब्दोने वृद्धो सिद्ध करे छे; कारण के आ सूत्रनो अर्थ एवो छे के जे एकेक वर्ण होय तेना पछी (तथा अव्यय पछी) 'कार' प्रत्यय लगाडवो; जेम के—अकार, इकार, उकार। परंतु अहीं तो कूट मंत्रमां घणा अक्षरो छे एटले शी रीते 'कार' प्रत्यय लगाडाय? छतां वृद्ध पुरुषो क्षकार(क्+ष्+अ), ह्म्ल्व्र्यूँकार वगेरे शब्दोमां 'कार' प्रत्यय लगाडे छे, तेनुं कारण ए छे के, आ कूट मंत्रोमां घणा अक्षरो देखाता होवा छतां पण वस्तुतः एमां एक ज अक्षर मंत्रस्वरूप होय छे बाकीना अक्षरो तो तेना परिवारभूत छे, माटे आवा कूट मंत्रोने पण एकाक्षरी मंत्र ज मानीने वृद्ध पुरुषो 'कार' प्रत्यय लगाडे छे। ते ज न्याये अहीं 'अर्हं' शब्द अनेकाक्षरी देखातो होवा छतां एमां मंत्राक्षर तो एक ज ('ह्') होवाने लीधे अमे 'अक्षराणि' एवो बहुवचननो प्रयोग न करतां 'अक्षरं' एवो एकवचननो प्रयोग कर्यो छे।

प्रश्न—(कूट मंत्रोमां अनेक अक्षरो होवा छतां मंत्र तो एक अक्षर जेटलो ज जो होय छे तो बाकीना अक्षरोनी शी जरूर छे?)

सपरिकरो हि वर्णो मन्त्रो भवति, केवलस्यार्थक्रियाविरहात्। तस्य च बाह्याभ्यन्तरभेदेन द्वैविध्यात्। मण्डल-मुद्रादेर्बाह्यत्वात्, नाद-बिन्दु-कलादेरान्तरत्वात्, तेषामेवोद्दीपकत्वात्, तथाभूतानामेव क्रियाजनकत्वात्। मण्डल-मुद्रादीनां केवलानामपि फलजनकत्वात्। विशेषतः समुदितानां ग........वाचकम्।[1]

**(अभिधेयम्—परमेश्वरस्य परमेष्ठिनो वाचकम्।)**

"देवतानां गुरूणां च नाम नोपपदं विना।
उच्चरेन्नैव जायायाः कथञ्चिदात्मनस्तथा ॥"

इति वचनाद् निरूपपददेवतानामोच्चारणस्य प्रतिषेधात्, प्रतिषिद्धाचरणे च प्रायश्चित्तोपदेशात्, सोपपददेवतानामोच्चारणस्यैव प्राप्तत्वात्। अन्यस्य च श्रीप्रभृतेरुपपदस्य तुच्छत्वेन तथाविधवैशिष्ट्याप्रतिपादकत्वाद् वैशिष्ट्यप्रतिपादनार्थं तस्य परमेश्वरस्यै इत्युपपदमुपन्यस्यति। परमं यदैश्वर्यमणिमादि यश्च

उत्तर—परिकर सहित वर्ण ज मंत्रनुं कार्य करी शके छे। एकलो वर्ण ते कार्य करी शकतो नथी। ते परिकर बे प्रकारे छे: (१) बाह्य अने (२) आभ्यन्तर। आ बन्ने प्रकारना परिकर सहित जो मंत्र होय तो ज ते परिपूर्ण फळने आपे छे।

मण्डल-मुद्रा वगेरे बाह्य परिकर छे, नाद-बिन्दु-कला वगेरे आभ्यन्तर परिकर छे। मंडलमुद्रादि अने नादबिन्दुकलादि ज उद्दीपक छे। उद्दीपक एवा तेओ ज अर्थक्रियाना जनक छे। मंडल–मुद्रा वगेरे एकलां पण फळ तो आपे छे परंतु ते सामान्य प्रकारनुं फळ होय छे; पण ज्यारे बधां भेगां थाय त्यारे विशेष फळ आपे छे।

**(२. अभिधेय)**

अर्हँ ते परमेश्वररूप परमेष्ठीनो वाचक छे। परमेष्ठी देवता छे। (शास्त्रमां कह्युं छे के—)

"देवताओ अने गुरुओनुं नाम उपपद विना कदापि बोलवुं न जोईए; अने बने त्यां सुधी पत्नीनुं तेम ज पोतानुं नाम पण उच्चारवुं न जोईए।"

शास्त्रना ए वचनने अनुसारे देवतानुं नाम उपपद विना उच्चारण करवुं शास्त्रथी निषिद्ध छे। निषिद्ध कार्य करवाथी प्रायश्चित लागे एवो उपदेश छे, तेथी देवतानुं नाम उपपदपूर्वक ज बोलवुं योग्य छे। बीजा जे 'श्री' वगेरे साधारण शब्दो उपपद तरीके अगर तो विशेषण तरीके वापरवा ए तुच्छपणुं दाखवे छे, माटे विशिष्ट गुणो प्रतिपादन करे तेवुं विशेषण 'परमेश्वर' पद छे अने ते पदनो अहीं विशेषण तरीके उपयोग सुयोग्य रीते थयो छे। सर्वोत्तम ऐश्वर्य जे अणिमा आदि सिद्धिरूप छे अने जे परम योग अने

---

१. अहीं मूळ ग्रंथमां सात पंक्ति जेटलो महत्त्वनो पाठ अनुपलब्ध छे।

२. परमेष्ठिनः पञ्च, ततः शेषचतुष्टयव्यवच्छेदायाऽऽह—परमेश्वरस्येति। चतुस्त्रिंशदतिशयरूपपरमैश्वर्यभाजो जिनस्येत्यर्थः। ननु 'परमेष्ठी'ति सामान्यं पदं तथापि 'अर्हँ' इति भणनाद् 'अर्हन्' एव लभ्यते, किं परमेश्वरस्येति? सत्यम्—"देवतानां गुरूणां च" इति (इत्यादि)।

अनुवादः—परमेष्ठिओ पांच छे, तेथी बाकीना चारने अलग करवा 'परमेश्वर' एवुं परमेष्ठीनुं विशेषण जणावयामां आव्युं छे।—अर्थात् चोत्रीश अतिशयरूप परम ऐश्वर्यथी शोभता एवा श्रीजिनेश्वर (अरिहंत) एवो अर्थ उद्दिष्ट छे; त्यारे ए प्रश्न थाय छे के, परमेष्ठी ए सामान्य पद छे छतां 'अर्हँ' कहेवाथी 'अर्हन्' ज समजाय छे त्यारे 'परमेश्वर' एवुं विशेषण मूकवानुं प्रयोजन शुं? एना उत्तरमां कहे छे के—'देवता अने गुरुनुं नाम उपपद विना कदापि बोलवुं न जोईए, तेम ज पत्नीनुं अने पोतानुं नाम पण बने त्यांसुधी उच्चारवुं न जोईए।'

परमयोगर्द्धिरूपं तद्वान् परमेश्वरः, यथा महाराज इति, अत्र हि महत्त्वं गुणं विशिंषद् द्रव्यं विशिनष्टीति **परमेष्ठिन** इति। परमे पदे तिष्ठति यः सः परमेष्ठी, अनेन च सविशेषणेन सकलरागादिमलकलङ्कविकलो योग-क्षेमविधायी शस्त्राद्युपाधिविरहितत्वात् प्रसत्तिपात्रं ज्योति(ती)रूपं देवाधिदेवः सर्वज्ञः पुरुषविशेषः। यदाह—

"रागादिभिरनाक्रान्तो, योग-क्षेमविधायकः।
नित्यं प्रसत्तिपात्रं यस्तं देवं मुनयो विदुः॥"

**मन्त्रकल्पे** हि मन्त्रवर्णानां वाचकत्वेन कीर्तनाद् वाचकमित्युक्तम्। यथा 'अ-सि-आ-उ-सा' इति बीजपञ्चकं पञ्चानामर्हदादीनाम्, 'ड-र-ल-क-श-ह-य'मिति आधारादिसप्तदेवीनाम्[1] तथा अकारादिभिः षोडशस्वरैर्मण्डलेषु षोडश रोहिण्याद्या देवता अभिधीयन्ते, ततस्तासां प्रतीतेरिति।

## (तात्पर्यम्—सिद्धचक्रस्यादिबीजम्।)

तात्पर्यस्य चाभिधानपृष्ठभावित्वात् **सिद्धचक्रस्यादिबीजमि**[2]त्यादिना पश्चादुच्यते।

---

ऋद्धिरूप छे ते ऐश्वर्यवाळा परमेश्वर समजवा; जेम के 'महाराज' शब्दमां महत्त्व राजाना (राजापणारूपी) गुणमां विशेषता दर्शावे छे, छतां वस्तुतः ए राजारूपी पुरुषनी विशेषता छे; ते प्रमाणे 'परमेश्वर' शब्द पण गुणनी (सामर्थ्यनी—ऐश्वर्यनी) विशेषता दर्शाववापूर्वक कोई द्रव्यनी ज (व्यक्तिनी ज) विशेषता दर्शावे छे। ए व्यक्ति कई ते स्पष्ट करवा माटे 'परमेष्ठिनः' पद छे। परमेश्वर एवा विशेषण सहित 'परमेष्ठी' शब्दथी देवाधिदेव अरिहंत परमात्मा लेवाना छे। परम पद पर स्थित होय ते 'परमेष्ठी' कहेवाय। आ पद साथे 'परमेश्वर' विशेषण तरीके मूकीए तो ज सकल रागादि मलरूप कलङ्कथी रहित, सर्व जीवोना योग अने क्षेमने वहन करनारा, शस्त्रादि उपाधियी रहित होवाथी प्रसन्नताना पात्र, ज्योतिरूप, देवाधिदेव अने सर्वज्ञ एवा ते पुरुषविशेष (परमात्मा-अरिहंत) समजाय। कह्युं छे के—

"जेओ राग वगेरेथी आक्रान्त नथी, योग अने क्षेमना करनारा छे अने सदा प्रसन्नताना पात्र छे तेमने मुनिओ 'देव' कहे छे।"

'**मंत्रकल्प**' मां मंत्रना वर्णो 'वाचक' तरीके ओळखाववामां आव्या छे (माटे ज 'अर्हँ' ते परमेश्वर एवा परमेष्ठीनो वाचक छे एम कह्युं छे।) ते प्रमाणे 'अ सि आ उ सा' रूप बीजपंचक अर्हत् वगेरे पांच परमेष्ठीना वाचक छे। तथा 'ड र ल क श ह य' ते देहगत मूलाधार वगेरे चक्रोनी देवीओनां नामना प्रथमाक्षरो अनुक्रमे ते देवीओना वाचक छे, तथा 'अकार' वगेरे सोळ स्वरो यंत्रोमां रोहिणी वगेरे सोळ विद्यादेवीओना वाचक छे, कारण के तेमनी तेथी (ते ते स्वरोथी) प्रतीति थाय छे।

## (३. अ. तात्पर्य)

व्याख्यामां अभिधान पछी तात्पर्यने रजू करवानी पद्धति होवाथी 'सिद्धचक्रना आदिबीज' वगेरे तात्पर्यनो हवे पछी निर्देश करे छे।

---

१. आधारादिसप्तदेव्यो डाकिनी—राकिनी—लाकिनी—काकिनी—शाकिनी—हाकिनी—याकिनीरूपाः॥

**अनुवादः**— आधार वगेरे चक्रोनी सात देवीओनां नाम आ प्रकारे छे—

(१) डाकिनी (२) राकिनी (३) लाकिनी (४) काकिनी (५) शाकिनी (६) हाकिनी अने (७) याकिनी.

२. सिद्धेति—सिद्धाः विद्यासिद्धादयस्तेषां चक्रमिव चक्रं, तस्य पञ्चबीजानि तेषु चेदमादिबीजम्।

**अनुवादः**—सिद्धो एटले विद्यासिद्धो तेमनो समूह जेमां होय ते। तेनां पांच बीजो छे। तेमां आ बीज प्रथम छे।

समयप्रसिद्धस्य चक्रविशेषस्य निरूढमभिधानम्।

यद्वा सिद्धयन्ति निष्ठितार्था भवन्ति, लोकव्यापिसमये (?) कलारहितमिदमेव तत्त्वं ध्यायन्तोऽस्मादिति "बहुलम्" [५-१-२] इति क्ते, ततो विशेषणसमासे **सिद्धचक्रम्।**

एतच्च तत्र तत्र व्यवस्थितपरमाक्षर ध्यानाद् योगर्द्धिप्राप्ता यस्मात् (योगर्द्धिप्राप्तावस्मात्) सिद्धिरित्युच्यते (?) इति सूपपादं सिद्धत्वमस्य चक्रस्येति।

तस्येदम्, अर्हँकारं प्रथमं बीजम्। बीजसाधर्म्याद् बीजम्। यथाहि—बीजं प्रसव-प्ररोह-फलानि प्रसूते, तथेदमपि पुण्यादिप्ररोह-भुक्ति-मुक्तिफलजनकत्वाद् बीजमुच्यते।

सन्ति पञ्चान्यन्यान्यपि ह्रौँकारादीनि बीजानि, तदपेक्षयाऽस्य प्राथम्यम्, प्रथमं साधूनामितिवत्। प्रथममग्रणीभूतं व्यापकमित्यर्थः। व्यापकत्वं चास्य सर्वबीजमयत्वात्।

इदमेव हि बीजम्—'अधोरेफ-आ-ई-ऊ-औ-अं-अः' एतैर्युक्तं बीजं भवतीति व्यापकत्वं अस्य।

यदि वा, परसमयसिद्धानां **त्रैलोक्यविजया-घण्टार्गल-स्वाधिष्ठान-प्रत्यङ्गिरादीनां** चक्राणामिदमेव हकारलक्षणं प्रधानं बीजम्।

अथवा, अकारादि-क्षकारान्तानां पञ्चाशतः सिद्धत्वेन प्रसिद्धानां यच्चक्रं समुदायस्तस्य प्रधानमिदमेव बीजम्।

---

(१) सिद्धचक्र ते सिद्धान्तमां प्रसिद्ध एवा चक्रविशेषनुं रूढ नाम छे।

(२) अथवा तो ए ज तत्त्व (अर्हँ) नुं लोकव्यापिसमयमां (?) कलारहित ध्यान करनारा महात्माओ एथी सिद्ध थाय छे माटे 'सिद्ध' कह्युं, पछी विशेषण समासथी '**सिद्धचक्र**' शब्द बन्यो छे।

(३) अथवा ए चक्रमां रहेला परमाक्षरोना ध्यानथी योगनी ऋद्धिओ प्राप्त थतां 'सिद्धि थई' एम कहेवाय छे, तेथी ए चक्रनुं सिद्धपणुं स्पष्ट ज छे।

ते सिद्धचक्रनुं आ अर्हँकार प्रथम बीज छे। बीजनी साथे साधर्म्य होवाथी ए बीज कहेवाय छे। जेम बीजमांथी फणगो, अंकुरो अने फळ निपजे छे तेम आ 'अर्हँ'कार बीजमांथी पण पुण्यानुबंधि-पुण्य, मुक्ति अने मुक्ति उत्पन्न थाय छे; तेथी ते पण 'बीज' कहेवाय छे।

आदिबीज कहेवानुं तात्पर्य ए छे के, ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः ए प्रमाणे बीजां पण पांच बीजो छे तेनी अपेक्षाए ह्रँ बीज प्रथम छे माटे तेने आदिबीज कह्युं छे। जेमके अमुक व्यक्ति साधुओमां प्रथम छे, ते रीते आ 'अर्हँ' पण बधां बीजोमां प्रथम छे। अहीं प्रथम एटले अग्रणीभूत (अग्रेसर) अथवा व्यापक, एम अर्थ करवो। 'अर्हँ' ए बीजने व्यापक एटला माटे कह्युं छे के, ते सर्व बीजमय छे।

तात्पर्य आ प्रमाणे छे—'नीचे रेफ तथा आ–ई–ऊ–औ–अं–अः' थी युक्त (वर्ण) होय ते बीज थाय छे; जेमके—ह्+र्+आ+म्=ह्राँ, ह्+र्+ई+म्=ह्रीँ, ह्+र्+ऊ+म्=ह्रूँ, ह्+र्+औ+म्=ह्रौँ, ह्+र्+अ+म्=ह्रँ अने ह्+र्+अः=ह्रः। ए रीते आ बीज (ह्रँ) व्यापक छे।

अथवा तो जैनेतर शास्त्रोमां प्रसिद्ध **त्रैलोक्यविजया, घण्टार्गल, स्वाधिष्ठान, प्रत्यङ्गिरा** वगेरे चक्रोमां पण आ ज 'ह'कार (सपरिकर) **मुख्य बीज** होय छे।

अथवा तो **अ**कारथी **क्ष**कार सुधीना पचास वर्णो **सिद्धाक्षररूपे** प्रसिद्ध छे (एटले के सिद्धमातृका कहेवाय छे) तेओनुं जे **चक्र** (समुदाय, वर्णमाला) ते **सिद्धचक्र** तेनुं आ 'हकार' ज **मुख्य बीज** छे।

## (तात्पर्यम्—सकलागमोपनिषद्भूतम् ।)

पुनर्विशेषणद्वारेण तस्यैव प्राधान्यमाह—सकलागमोपनिषद्भूतम्—सकलस्य द्वादशाङ्गस्य गणिपिटकरूपस्यैहिकामुष्मिकफलप्रदस्यागमस्योपनिषद्भूतं रहस्यभूतं, पञ्चानां परमेष्ठिनां यानि 'अ-सि-आ-उ-सा' लक्षणानि पञ्चबीजानि, यानि च अरिहन्तादिषोडशाक्षराणि तान्येव द्वादशाङ्गस्योपनिषदिति। यदाह **पञ्चपरमेष्ठिस्तुतौ—**

**"सोलसपरमक्खरबीयबिंदुगब्भो जगुत्तमो जोओ ।**
**सुअबारसंगबाहिरमहत्थ-ऽपुव्वत्थ-परमत्थो ॥"**

यदि वा, सकला ये आगमाः पूर्व-पश्चिमाम्नायरूपास्तेष्वपि परमेश्वरपरमेष्ठिवाचकं 'अर्हँ' इति तत्त्वं उपनिषद्रूपेण प्रणिधीयत इति, सकलानां स्वसमय-परसमयरूपाणामागमानामुपनिषद्भूतं भवतीति।

---

## (३. ब. तात्पर्य)

वळी बीजा विशेषणद्वारा ते बीजनुं ज मुख्यपणुं बतावे छे। आ 'अर्हँ' सकल आगमोना उपनिषद्भूत छे—एटले के इहलौकिक—पारलौकिक सर्व फळो आपनार गणिपिटकरूप समग्र द्वादशांग आगमनुं आ 'अर्हँ' रहस्य छे। पांच परमेष्ठिओना 'अ-सि-आ-उ-सा' रूप पांच बीजो अने जेमां **अरिहंत** आदि सोळ अक्षरो (**'अरिहंत-सिद्ध-आयरिय-उवज्झाय-साहु'**) पण द्वादशांग-आगमनुं रहस्य छे। **'परमेष्ठिस्तुति'** मां कह्युं छे के—

"सोळ परमाक्षररूप बीजो अने बिंदुओ जेना गर्भमां छे ते (मंत्राक्षरोनो) योग जगतमां उत्तम छे अने द्वादशांगरूप (अंगप्रविष्ट) श्रुतनो तथा (उत्तराध्ययनादि) अंगबाह्यश्रुतनो महार्थ, अपूर्वार्थ अने परमार्थ छे।"

अथवा प्राचीन आम्नाय अने ते पछीना आम्नायरूप सर्व आगमोमां पण परमेश्वरपरमेष्ठिना वाचक 'अर्हँ' तत्त्वनुं उपनिषद्रूपे प्रणिधान कराय छे, तात्पर्य ए छे के ते (अर्हँ) स्वपरसमयरूप सर्व आगमोनुं रहस्य छे।

---

१. सर्वपार्षदत्वाच्छब्दानुशासनस्य समग्रदर्शनानुयायी नमस्कारो वाच्यः। अयं चाऽर्हँ अपि तथा। तथाहि—

**"अकारेणोच्यते विष्णू रेफे ब्रह्मा व्यवस्थितः।**
**हकारेण हरः प्रोक्तस्तदन्ते परमं पदम् ॥"**

इति श्लोकेन 'अर्हँ'शब्दस्य विष्णुप्रभृतिदेवतात्रयाभिधायित्वेन लौकिकागमेष्वपि 'अर्हँ' इति पदमुपनिषद्भूतमित्यावेदितं भवति। तदन्त इति तुरीयपादस्यायमर्थः—तस्य 'अर्हँ'शब्दस्यान्त उपरितने भागे परमं पदं सिद्धिशिलारूपं तदाकारत्वादनुनासिकरूपा कलाऽपि परमं पदमित्युक्तम्।

**अनुवादः**—शब्दानुशासन-व्याकरण सर्व सभाजनो माटे होय छे, तेथी सर्व दर्शनोने मान्य एवो नमस्कार कहेवो जोईए। एवो प्रश्न थाय तो तेनो जवाब आपतां कहे छे के—आ 'अर्हँ' शब्द पण ए ज प्रकारनो छे। अन्य शास्त्रोमां कह्युं छे के—

"अकारथी विष्णु कहेवाय छे, रेफमां ब्रह्मा रहेला छे, हकारथी शिव जणाव्या छे अने पछी ँ अनुस्वार ए परम पदनो वाचक छे।"

आ श्लोकथी 'अर्हँ' शब्द विष्णु वगेरे त्रणे देवताओनो वाचक होवाथी लौकिक आगमोमां पण आ 'अर्हँ' पद रहस्यरूप छे, एम जणाव्युं छे। आ श्लोकमां 'तदन्ते' एवुं जे चोथुं पाद छे तेनो अर्थ ए छे के—'अर्हँ' शब्दनी अंते उपरना शिरोभागमां सिद्धशिलारूप परमपद छे, अनुनासिकरूप कला पण सिद्धशिलाना आकारवाळी होवाथी ते परमपद छे, एम कह्युं छे।

फलार्थिनां सेवाप्रवृत्त्यङ्गभूतां योग-क्षेमशालितामस्योपदर्शयन् लब्धपरिपालनमन्तरेण, अलब्ध-लाभस्याकिञ्चित्करत्वात् क्षेमोपदर्शनपूर्वकं योगमुपदर्शयति—

### (क्षेमम्—अशेषविघ्नविघातनिघ्नम्।)

[अशेषाः—] कृत्स्ना ये विघ्नाः सत्क्रियाव्याघातहेतवस्तेषां विशेषेण हननं समूलकाषं कषणम्, तथाऽसौ विघ्नान् विहन्ति यथैते न पुनः प्रादुःषन्ति; 'वि' शब्देन घातविशेषणाच्चायमर्थलाभः, 'अशेष' शब्देन तद्विशेषणाद् वेति, तत्र [निघ्नम्-] परवशम्।

यथा मदजलधौतगण्डस्थलो मदपारवश्यादगणितस्वपरविभागो गजः समूलवृक्षाद्युन्मूलने लम्पटो भवति, एवमयमपि परमाक्षरमहामंत्रो ध्यानावेशविवशीकृतो विघ्नोन्मूलने प्रभविष्णुर्भवति।

### (योगः—अखिलदृष्टाऽदृष्टफलसंकल्पकल्पद्रुमोपमम्।)

अखिलानि संपूर्णानि यानि दृष्टानि च चक्रवर्तित्वादीनि वाऽदृष्टानि स्वर्गापवर्गरूपाणि फलानि, तेषां संकल्पे—संपादने कल्पवृक्षेणोपमीयते यत् तत् तथा। व्यवहारसंदृष्ट्याऽयमुपमानोपमेयभावः लोके तस्य कल्पितफलदातृत्वेन प्रसिद्धत्वात्, अस्य तु संकल्पातीतफलप्रदायित्वात्।

---

फळना अर्थिओनी सेवा अने प्रवृत्तिमां कारणभूत एवी आ 'अर्हँ' नी योगक्षेमशालिता बतावतां, लब्धना परिपालनरूप क्षेम विना अलब्धना लाभरूप योग निरर्थक होवाथी प्रथम क्षेमने बतावीने पछी योगने बतावे छे :—

### (४. क्षेम)

शुभ क्रियामां व्याघात करनारां सर्व विघ्नोनुं समूल उच्छेदन करवाने माटे ते (अर्हँबीज) समर्थ छे। आ (अर्हँ बीज) विघ्नोनो एवी रीते नाश करे छे के जेथी ते पुनः उत्पन्न थई शकतां नथी। आवा अर्थनी प्राप्ति 'घात' शब्दनी पूर्वे 'वि' उपसर्ग जोडवाथी थाय छे, अथवा 'अशेष' शब्द ते (विघ्न)नुं विशेषण होवाथी पण एवो अर्थ करी शकाय छे।

जेम जेनुं मदना जलथी गंडस्थल धोवाई रह्युं छे एवो मदोन्मत्त हाथी मदना आवेशथी परवश थतां स्व के परना विभागना भेदने गणकार्या विना वृक्षोने मूलथी उखेडी नाखे छे तेम ध्यानना प्रभावथी विवश करायेल आ—परमाक्षर महामंत्र विघ्नोनुं समूल उच्छेदन करवामां समर्थ बने छे (एटले ते क्षेमंकर छे)।

### (५. योग)

वळी, जे दृष्ट फळो—चक्रवर्तिपणुं वगेरे, अने अदृष्ट फळो—स्वर्ग अने मोक्ष, ते प्राप्त कराववामां आ (अर्हँ) कल्पवृक्ष समान छे (एटले ते योजक छे)। व्यवहारदृष्टिए आ उपमानउपमेय भाव छे कारण के जगतमां कल्पवृक्ष इच्छित (इच्छा करी होय तेटलुं ज) फळ आपे छे ए वात प्रसिद्ध छे; ज्यारे आ (अर्हँ महामंत्र) तो संकल्प करतां पण वधारे फळ आपे छे।

यद्वा, दृष्टात् क्रियाविशेषाद् यत् फलम्—"क्रियैव फलदा पुंसाम्।" इत्युक्ते(क्तेः) तथैव दर्शनत्वे-(नाच्च), न हि क्रियाविरहिता एवमेवोदासीनाः फलानि समश्नुवते; यच्चादृष्टात् पुण्यविशेषाद्, अखिलं फलं, तस्य संकल्पः, शेषं पूर्ववत्।

त्रिविधं हि फलम्—किञ्चित् क्रियाजं मनुष्यादीनां व्यापारविशेषात् कृषि-पशुपाल्य-राज्यादि, किञ्चिद्धि पुण्यादेव व्यापाराभावशालिनां कल्पातीतदेवानाम्, किञ्चिदुभयजं व्यन्तरादीनाम्।

यदि वा, दृष्टानां प्रत्यक्षेणोपलब्धानां मनुजादीनाम्, अदृष्टानां चानुमानगम्यानाम्, अखिला ये फले संपूर्णाः कल्पा एकहेलयैव समुदिता ईषदूनास्ते[ते]षां कल्पो वा विधानं स एव प्रसरणशीलत्वेन द्रुमः—पादपः स उप सामीप्येन मीयते परिच्छिद्यतेऽनेनेति। एवं हि तस्य परिच्छेदो भवति—यदेकहेलयैव तत्संकल्पानां संपादनं भवति, तत् समर्थं चेदं बीजमिति, माहात्म्यविशेषश्चान्येभ्यो महामन्त्रेभ्योऽस्य मन्त्रराजस्यानेन विशेषणेन ख्याप्यते।

---

अथवा दृष्ट एटले क्रियाविशेष, तेथी उत्पन्न थतुं फळ। "पुरुषोने क्रिया ज फळदायक बने छे।"—एवा वचनथी अने ते प्रमाणे अनुभव थतो होवाथी क्रियारहित एम ने एम (जेम थवानुं हशे तेम थशे एम मानी निष्क्रिय पडी रहेनारा) उदासीन माणसो फळने सारी रीते मेळवी शकता नथी; अने अदृष्ट एटले पुण्यविशेषथी (पुण्यानुबंधिपुण्यनी प्राप्ति करावीने) ए सर्व फळोना संकल्पने पूरवामां कल्पवृक्ष समान छे।

फळ त्रण प्रकारनां छे—(१) केटलांक क्रियाथी उत्पन्न थतां, (२) केटलांक पुण्यथी ज उत्पन्न थतां अने (३) केटलांक क्रिया अने पुण्यथी उत्पन्न थतां।

(१) क्रियाथी उत्पन्न थतां फळ ते मनुष्य वगेरेने होय छे। कृषि, पशुपालन अने राज्य वगेरे व्यापारविशेषोथी ते फळो मळे छे। (२) पुण्यथी उत्पन्न थतां फळ ते (पूर्वोक्त) व्यापारविशेष विना मळे छे अने ते कल्पातीत (नव ग्रैवेयक, पांच अनुत्तर विमानना) देवोने होय छे। (३) क्रिया अने पुण्यथी उत्पन्न थतां फळ ते व्यंतर वगेरे देवोने मळे छे।

अथवा मनुष्य वगेरेने जे प्रत्यक्ष जणाय ते 'दृष्ट' अने जे अनुमानथी जणाय ते 'अदृष्ट'। एवा दृष्ट अने अदृष्ट फळविषयक (अर्हँ सिवायना अन्य) सर्व कल्पोने जो एकी साथे एकत्र समुदित करवामां आवे तो पण तेओ जे कल्प (विधान)थी कंइक न्यून (फळ आपनारां) बने तेवो कल्प (विधान) 'अर्हँ' नो छे। ते 'कल्प' प्रसरणशील (समुदित अन्य कल्पो करतां वधु विस्तृत फळ आपनार) होवाथी अहीं 'वृक्ष' कहेवायो छे। तेथी अर्हँ ने 'कल्पवृक्ष'नी उपमा आपवामां आवे छे। ए रीते (उपमाथी) तेनुं विशिष्ट ज्ञान थाय छे। तात्पर्य ए छे के जो इतर सर्व कल्पोना समुदित फळनुं एकी साथे संपादन थतुं होय तो ते करवा माटे आ अर्हँ बीज समर्थ छे। ए रीते "अखिल दृष्टा...." इत्यादि विशेषण वडे अन्य महामन्त्रो करतां 'अर्हँ'नुं माहात्म्य विशेष छे ए बतावाय छे।

---

१. दृष्टं राज्यादि।
**अनुवादः**—दृष्ट फळ एटले राज्य वगेरे।
२. अदृष्टं स्वर्गादि
**अनुवादः**—अदृष्ट फळ एटले स्वर्ग वगेरे।

स्वरूपा-ऽर्थ-तात्पर्यैः स्वरूपमुक्त्वा प्रकृते योजयति—

**( प्रणिधानम्—आशास्त्राध्ययनाऽध्यापनावधि प्रणिधेयम् । )**

'आङ् अभिव्याप्तौ; स च शास्त्रेण संबध्यते। अध्ययनाऽध्यापनाभ्यां संबद्धोऽवधिर्मर्यादार्थः। तेनायमर्थः—शास्त्रमभिव्याप्य येंऽध्ययना-ऽध्यापने ते मर्यादीकृत्य प्रणिधेयमित्यर्थः।

प्रणिधानं व्याचष्टे—

**(प्रणिधानस्य द्वैविध्यम्—प्रणिधानं चानेनात्मनः सर्वतः संभेदस्तदभिधेयेन चाभेदः । )**

**प्रणिधानं** चेत्यादिना—अनुवादमन्तरेण स्वरूपस्य व्याख्यातुमशक्यत्वात् प्रणिधानं चेति स्वरूपमनूदितम्, 'पुनरर्थः'च शब्दनिर्देशात्। **अनेनेति**[2] 'अर्हँ' इति बीजेन। प्रणिधानस्य च संभेदा-ऽभेदरूपेण द्वैविध्यात्।

---

स्वरूप, अर्थ (अभिधेय) अने तात्पर्य (एम त्रण प्रकारो) वडे स्वरूप जणावीने चालु विषयमां तेनी योजना करे छे।

**( ६. प्रणिधान )**

शास्त्रनुं अध्ययन के अध्यापन शरू थाय त्यांथी ते पूरुं थाय त्यांसुधी (आ मन्त्रराजनुं) प्रणिधान करवुं जोईए।

हवे प्रणिधान विशे जणावे छे—

**( प्रणिधानना बे प्रकारो )**

प्रणिधान बे प्रकारे छे :— १. आ मन्त्रराज साथे (पोताना) आत्मानो चारे तरफथी संभेद अने २. तेना अभिधेय प्रथम परमेष्ठिनी साथे अभेद।

अनुवाद विना स्वरूप कही शकातुं नथी—तेथी 'प्रणिधानं च' वडे पुनरर्थक 'च' शब्दना निर्देशथी स्वरूपनो अनुवाद कर्यो छे। अनेन=आ 'अर्हँ' बीजवडे (प्रणिधान कराय छे)। तेना बे प्रकारो छे (१) संभेद प्रणिधान अने (२) अभेद प्रणिधान।

---

१. प्रणिधानं च चतुर्धा — पदस्थम्, पिण्डस्थम्, रूपस्थं, रूपातीतं चेति। पदस्थं 'अर्हँ' शब्दस्थस्य, पिण्डस्थं शरीरस्थस्य, रूपस्थं प्रतिमारूपस्य, रूपातीतं योगिगम्यमर्हतो ध्यानमिति। एष्वाद्ये द्वे शास्त्रारम्भे संभवतः नोत्तरे द्वे।

**अनुवादः**— प्रणिधान चार प्रकारनुं छे—(१) पदस्थ (२) पिंडस्थ (३) रूपस्थ (४) रूपातीत। 'अर्हँ' शब्दमां रहेला श्री अरिहंत परमात्मानुं ध्यान ते 'पदस्थ ध्यान'। शरीरस्थ अरिहंतनुं ध्यान ते 'पिण्डस्थ ध्यान', प्रतिमारूपे रहेला अरिहंतनुं ध्यान ते 'रूपस्थ ध्यान' अने 'रूपातीत ध्यान' योगिगम्य छे। शास्त्रना आरंभमां (वाचनादि प्रवृत्तिमां) आमांथी प्रथमनां बे ध्यान संभवे छे, पछीनां बे ध्यान संभवतां नथी।

२. अनेनात्मनः सर्वतः संभेद इत्युक्ते पदस्थम्।

**अनुवादः**— आ (अर्हँकार) नी साथे आत्मानो चारे बाजुएथी संभेद छे एम जे कहेवामां आव्युं छे, ते 'पदस्थ ध्यान' छे।



संभेदप्रणिधानदर्शको अर्हूँकारः

आदौ सम्मेदरूपमाह—**सर्वतः संभेदः**—संश्लिष्टः संबद्धो वाऽर्हंकारेण सह ध्यायकस्य भेदः सम्भेदः। आत्मानं बीजमध्ये न्यस्तं चिन्तयेद्, एवं च ध्येय-ध्यायकयोः संश्लेषरूपः सम्बन्धरूपश्च भेदो भवति।

न च महामन्त्रस्य सकलार्थक्रियाकारित्वेन मन्त्रराजत्वान्मण्डल-वर्णादिभेदेनाऽऽकर्षण-स्तम्भ-मोहाद्यनेकार्थजनकत्वाद् गमनाऽऽगमनादिरूपत्वेन संभेदासंभवादनैकान्तिकत्वाल्लक्षणाभावो वाच्यः, यतस्तत्र साध्यस्यात्मनोऽन्यत्रात्मीयात्मन इति विशेषणादिति।

---

प्रथम संभेद प्रणिधान जणावे छे—'अर्हंकार'नी साथे ध्यातानो संश्लिष्ट अथवा संबद्ध एवो भेद ते 'संभेद' प्रणिधान छे। अहीं अर्हँ बीजमां स्वात्माना न्यास वडे चिंतन करवाथी ध्येय अने ध्यातानो संश्लेषरूप अने सम्बन्धरूप 'भेद' थाय छे।

महामंत्र (अर्हँ) सकलार्थक्रियाकारित्वना कारणे मन्त्रराज होवाथी मण्डल, वर्ण वगेरे प्रकारो वडे आकर्षण, स्तम्भन, मोहन वगेरे अनेक प्रकारना अर्थोनो जनक होवाथी ते जे वखते गमन आगमन करे छे ते वखते संभेद संभवतो नथी; एटले संभेद प्रणिधाननुं लक्षण अनैकान्तिक (व्यभिचारि) थवाथी लक्षणनो अभाव छे एम न कहेवुं। "कारण के स्तम्भनादि कार्योमां साध्यना आत्मानी साथे संभेद अने अन्यत्र (ते कार्यो न होय त्यारे) पोताना आत्मानी साथे संभेद होय छे," एवा अर्थमां पूर्वोक्त लक्षणमां 'आत्मनः' पदनी पूर्वे 'साध्यस्य' अने 'आत्मीय' ए विशेषणो लेवानां छे।[1]

---

१ संभेद एटले चारे बाजु 'अर्हँ' शब्दथी आत्माने वींटायेलो जोवो; अर्थात् पोताना आत्मानो 'अर्हँ'नी मध्यमां न्यास करवो। अभेद एटले पोताना आत्मानुं अरिहंतरूपे ध्यान करवुं।

हवे प्रश्न ए छे के, कोईना वशीकरणनो प्रयोग करवो होय तो 'अर्हँ' अक्षरथी पोताना आत्माने नहीं पण पारकाना आत्माने वींटायेलो जोवानो होय छे, अथवा तो 'अर्हँ' अक्षरने बीजा माणस तरफ मोकलवानो होय छे, एटले ते वखते अर्हँ अक्षर पोतानी पासेथी छूटो पडीने ज्यां बीजो माणस रहेतो होय त्यां पहोंचे छे, तेने वींटी ले छे अने ए रीते तेना उपर वशीकरण–आकर्षण आदिनो प्रयोग कराय छे। आवा प्रसंगे 'अर्हँ' नो पोताना आत्मा साथे संभेद एटले संश्लेष रहेतो नथी, कारणके ए छूटो पडीने जाय छे अने पाछो आवे छे। ए रीते 'अर्हँ' गमनागमनवाळो मंत्र होवाथी संभेद एटले पोताना आत्माने वींटाईने रहेवापणानो नियम रहेतो नथी।

ए रीते अनियम थवाथी 'संभेद प्रणिधान'नुं लक्षण व्यभिचारि बने छे, तेथी ते लक्षण असंगत छे, एवो शंकाकारनो आशय छे।

आत्मानो न्यास केवी रीते करवो तेनो निर्देश करतुं चित्र सामे आपेल छे। तेमां वच्चेना स्थाने स्वात्माने स्वदेहाकारे स्थापवो। श्री सिद्धचक्र वगेरे यंत्रोमां 'ऽर्हँ' मां श्री जिनेंद्र परमात्मानो आवी ज रीते न्यास करेलो जोवामां आवे छे। ए संभेद प्रणिधान छे। योगशास्त्रना आठमा प्रकाशमां 'अर्हँ' ना पदस्थादि ध्याननी प्रक्रिया बतावतां 'अर्हँ' मां आत्मानो स्वदेहाकारे न्यास सूचित कर्यो छे। ए पण संभेद प्रणिधान छे।

तथा [तदभिधेयेनेत्यादि—] तस्य 'अर्हँ' इत्यक्षरस्य यदभिधेयं परमेष्ठिलक्षणं तेनात्मनोऽभेदे एकीभावः । तथाहि—केवलज्ञानभास्वता प्रकाशितसकलपदार्थसार्थं, चतुस्त्रिंशदतिशयैर्विज्ञातमाहात्म्य-विशेषम्, अष्टप्रातिहार्यैर्विभूषितदिग्वलयं, ध्यानाग्निना निर्दग्धकर्ममलकलङ्कं, ज्योतीरूपं, सर्वोपनिषद्भूतं, प्रथमपरमेष्ठिनमर्हद्भट्टारकम्, आत्मना सहाभेदीकृतं 'स्वयं देवो भूत्वा देवं ध्यायेत्' इति यत् सर्वतो ध्यानं तद् 'अभेदप्रणिधानम्' इति ।

**( विशिष्टप्रणिधानम्—वयमपि चैतच्छास्त्रारम्भे प्रणिदध्महे ।**

**तत्त्वम्—अयमेव हि तात्त्विको नमस्कार इति ॥ १ ॥ )**

अस्यैव विघ्नापोहे दृष्टसामर्थ्यादन्यस्य तथाविधसामर्थ्यस्या(र्थ्या)विकलस्यासम्भवात् तात्त्विक-त्वादात्मनोऽप्येतदेव प्रणिधेयं **वयमपी**त्यादिना दर्शयति—

विशिष्टप्रणिधेय-प्रणिधानादिगुणप्रकर्षादात्मन्युत्कर्षाधानाद् गुणबहुत्वेनात्मनोऽपि तदभिन्नतया बहुत्वाद् वयमिति बहुवचनेन निर्देशः ।

---

'अर्हँ' अक्षरना अभिधेय जे प्रथम परमेष्ठी तेमनी साथे पोताना आत्मानो एकीभाव ते अभेद प्रणिधान छे । जेमके केवलज्ञानरूप सूर्यवडे सकल पदार्थोना समूहने प्रकाशित करनारा, जेमनुं विशिष्ट माहात्म्य चोत्रीश अतिशयो वडे सारी रीते जाणी शकाय छे एवा, आठ महाप्रातिहार्योथी दिशाओना मण्डलने विभूषित करता, ध्यानरूप अग्निवडे कर्ममलरूप कलंकने भस्मसात् करनारा, ज्योतिस्वरूप अने समग्रश्रुतना रहस्यभूत एवा प्रथम परमेष्ठी श्री अरिहंत भगवंतनो स्वकीय आत्मानी साथे अभेद करीने—'पोते देव बनीने देवनुं ध्यान करवुं' ए नियम मुजब सर्व रीते ध्यान करवुं ते 'अभेदप्रणिधान' कहेवाय छे ।

**(७. तत्त्व)**

ग्रंथकार कलिकालसर्वज्ञ श्री हेमचन्द्राचार्य भगवान् कहे छे के अमे पण प्रस्तुत शास्त्रना प्रारंभमां 'अर्हँ' नुं प्रणिधान करीए छीए, कारण के ए ज तात्त्विक नमस्कार छे ।

विघ्नोने दूर करवामां आ 'अर्हँ'नुं सामर्थ्य स्पष्ट रीते देखातुं होवाथी अने बीजा मंत्रोमां तेवा प्रकारना सामर्थ्यनी पूर्णता असंभवित होवाथी 'अर्हँ' ए ज तात्त्विक छे । तेथी अमारा माटे पण ए ज प्रणिधेय छे, एम 'वयमपि....'वडे दर्शावे छे ।

विशिष्ट प्रणिधेय-प्रणिधानादिमां गुणोनो प्रकर्ष होवाथी आत्मामां (गुणोना) उत्कर्षनुं आधान थाय छे । तेथी आत्मा बहु गुणवाळो बनवाथी अने आत्माने (बहु) गुणोनी साथे अभेद होवाथी प्रस्तुतमां 'वयं' एम बहुवचन वडे निर्देश कर्यो छे ।

---

१. तदभिधेयेनेत्यादिना पिण्डस्थम् ।

**अनुवादः**—तेना 'अभिधेय वडे' ए द्वारा 'पिंडस्थ ध्यान' बताव्युं छे ।

२. हैमप्रकाशव्याकरणेऽभेदप्रणिधानस्य—'अर्हदभिन्नं अर्हँकारेण सर्वतो वेष्टितमात्मानं ध्यायेत्' इति भावार्थो निर्दिष्टः ।

**अनुवादः**—हैमप्रकाश व्याकरणमां अभेदप्रणिधान विशे—'अरिहंतथी अभिन्न अने अर्हँकारथी आत्माने सर्वतः वेष्टित करीने ध्यान करवुं' एवो भावार्थ जणाव्यो छे ।

अवयवव्याख्यामात्रमुक्तम्, विशेषव्याख्यानस्वरूपं समयाद् गुरुमुखाद् वा पुरुषविशेषेण ज्ञेयमिति ॥ १. १. १. ॥

---

आ तो व्याख्यानो एक अंशमात्र कह्यो छे । व्याख्यानुं विशेष स्वरूप आगमथी, गुरुमुखथी अथवा तज्ज्ञ पुरुषविशेषथी (विशेषार्थिए) जाणी लेवुं जोईए ॥ १. १. १. ॥

## परिचय

कलिकालसर्वज्ञ भगवान् श्रीहेमचन्द्राचार्ये रचेला 'श्रीसिद्धहेमचन्द्रशब्दानुशासन' नामक व्याकरण-ग्रंथमां मंगलाचरणरूपे प्रथम 'अर्हँ' ए सूत्र छे ने तेना ऊपर 'तत्त्वप्रकाशिका' टीका अने ते टीका ऊपर 'शब्दमहार्णव' नामे पोते ज रचेलो न्यास छे, ते अमे अहीं अनुवाद–विवेचन साथे आपेल छे । मूळ विवरण गद्यमां छे ।

आजे उपलब्ध साहित्यमां 'अर्हँ' तत्त्व के बीजाक्षरनो विशद प्रकाश जो कोईए आप्यो होय तो ते आ सूत्र अने तेनी टीकाओ तेमज 'योगशास्त्र'ना आठमा प्रकाश द्वारा सूरिचक्रचक्रवर्ति श्रीहेमचन्द्राचार्य भगवंते आप्यो छे । एमणे अहीं 'अर्हँ' नुं स्वरूप, अभिधेय, तात्पर्य, फल, प्रणिधानना संभेद अने अभेदरूप बे प्रकारो वगेरे द्वारो वडे स्फुट विवेचन कर्युं छे । जैनेतरोनी दृष्टिए मंत्रविषयक तुलनात्मक हकीकतो पण रजू करी छे ।

'अर्हँ', 'अर्हूँ' अने 'ह्रूँ' तत्त्वनी उपासना जे पोते रचेला 'योगशास्त्र'ना आठमा प्रकाशमां आपेली छे, तेनुं पण अहीं सूचन कर्युं छे अने 'ह' बीजनी प्रधानता दर्शावी छे । साचे ज, आ टीकाओ द्वारा श्रीहेमचंद्राचार्ये ध्याननी उत्कृष्ट प्रक्रियानी समज आपी छे एम कही शकाय ।



# अर्हँ

## श्रीमद् हेमचन्द्राचार्यविरचितसंस्कृतद्व्याश्रयमहाकाव्यस्य प्रथमश्लोकः
## श्रीअभयतिलकगणिरचितव्याख्यासमेतः

अर्हमित्यक्षरं ब्रह्म, वाचकं परमेष्ठिनः ।
सिद्धचक्रस्य सद्बीजं, सर्वतः प्रणिदध्महे ॥

**व्याख्या**—अर्हमिति वर्णसमुदायं, सर्वतः सर्वस्मिन् क्षेत्रे काले च प्रणिदध्महे । आत्मानं ध्यायकं बीजमध्ये न्यस्तं संश्लेषेणार्हँकारैर्ध्येयैः सर्वतो वेष्टितं चिन्तयामः । यद्वा अर्हँशब्दवाच्येन भगवताऽर्हता ध्येयेनाभिन्नमात्मानं ध्यायकं ध्यायाम इत्यर्थः । कीदृशम् ? निर्मुक्तात्मकत्वात् परमे पदे सिद्धिलक्षणे तिष्ठति । "परमात् कित्" इत्यौणादिके कितीनि "भीरुष्ठानादयः" [२.३.३३.] इति षत्वे गणपाठसामर्थ्यात् सप्तम्या अलुपि परमेष्ठी, तस्य परमेष्ठिनो भगवतोऽर्हतो वाचकं प्रतिपादकम् । अत एवाक्षरं ब्रह्म, अभिधाना-ऽभिधेययोरभेदोपचारादचलं ज्ञानं परमज्ञानस्वरूप-परमेष्ठिवाचकमित्यर्थः ।

यद्वा अक्षरमिति भिन्नं विशेषणं ब्रह्मेति च । ततोऽक्षरं शाश्वतमेतदभिधेयस्य भगवतः परमपदप्राप्तत्वेनाविनश्वरत्वाद्, ब्रह्म च परमज्ञानस्वरूपम् ।

---

### अनुवाद

'अर्हँ' ए अक्षर (बीज), ब्रह्म, परमेष्ठिनुं वाचक अने श्रीसिद्धचक्रनुं श्रेष्ठ बीज छे । तेनुं अमे सर्वप्रकारे प्रणिधान करीए छीए ।

१६. विपुलमति
१७. दशपूर्वि
१८. चतुर्दशपूर्वि
१९. अष्टाङ्गनिमित्तकुशल
२०. विकुर्वणर्द्धिप्राप्त
२१. विद्याधर
२२. चारणलब्धि
२३. प्रश्न(प्रज्ञ)श्रमण
२४. आकाशगामि
२५. क्षीराश्रवि
२६. सर्पिराश्रवि
२७. मध्वाश्रवि
२८. अमृताश्रवि
२९. सिद्धायतन
३०. भगवन्महामहावीर-वर्धमानबुद्धर्षि
३१. उग्रतपः
३२. अक्षीणमहानसि
३३. वर्धमान
३४. दीप्ततपः
३५. तप्ततपः
३६. महातपः
३७. घोरतपः
३८. घोरगुण
३९. घोरपराक्रम
४०. घोरगुणब्रह्मचारि
४१. आमर्शौषधिप्राप्त
४२. खेलौषधिप्राप्त
४३. जल्लौषधिप्राप्त
४४. विप्रुडौषधिप्राप्त
४५. सर्वौषधिप्राप्त
४६. मनोबलि
४७. वचनबलि
४८. कायबलि

## परिशिष्ट ३

### चोवीश तीर्थङ्करोना पिताओ

| | | |
|---|---|---|
| १. नाभि | ९. सुग्रीव | १७. सूर |
| २. जितशत्रु | १०. दृढरथ | १८. सुदर्शन |
| ३. जितारि | ११. विष्णु | १९. कुम्भ |
| ४. संवर | १२. वसुपूज्य | २०. सुमित्र |
| ५. मेघरथ | १३. कृतवर्म | २१. विजय |
| ६. श्रीधर | १४. सिंहसेन | २२. समुद्रविजय |
| ७. सुप्रतिष्ठ | १५. भानु | २३. अश्वसेन |
| ८. महासेन | १६. विश्वसेन | २४. सिद्धार्थ |

## परिशिष्ट ४

### चोवीश तीर्थङ्करोनी माताओ

| | | |
|---|---|---|
| १. मरुदेवा | ९. रामा | १७. श्री |
| २. विजया | १०. नन्दा | १८. देवी |
| ३. सेना | ११. विष्णु | १९. प्रभावती |
| ४. सिद्धार्था | १२. जया | २० पद्मा |
| ५. सुमङ्गला | १३. श्यामा | २१, वप्रा |
| ६. सुसीमा | १४. सुयशा | २२. शिवा |
| ७. पृथ्वी | १५. सुव्रता | २३. वामा |
| ८. लक्ष्मणा | १६. अचिरा | २४. त्रिशला |

## परिशिष्ट ५

### चोवीश देवीओ

| | | |
|---|---|---|
| १. ह्री | ९. अम्बा | १७. सानन्दा |
| २. श्री | १०. विजया | १८. नन्दमालिनी |
| ३. धृति | ११. नित्या | १९. माया |
| ४. लक्ष्मी | १२. क्लिन्ना | २०. मायाविनी |
| ५. गौरी | १३. अजिता | २१. रौद्री |
| ६. चण्डी | १४. मदद्रवा | २२. कला |
| ७. सरस्वती | १५. कामाङ्गा | २३. काली |
| ८. जया | १६. कामबाणा | २४. कलिप्रिया |

## परिशिष्ट ६

### चोवीश यक्षो

१. गोमुख
२. महायक्ष
३. त्रिमुख
४. यक्षनायक
५. तुम्बरु
६. कुसुम
७. मातङ्ग
८. विजय
९. अजित
१०. ब्रह्म
११. यक्षराज
१२. कुमार
१३. षण्मुख
१४. पाताल
१५. किन्नर
१६. गरुड
१७. गन्धर्व
१८. यक्षराज
१९. कुबेर
२०. वरुण
२१. भृकुटि
२२. गोमेध
२३. पार्श्व
२४. ब्रह्मशान्ति

## परिशिष्ट ७

### चोवीश यक्षिणीओ

१. चक्रेश्वरी
२. अजितबला
३. दुरितारि
४. काली
५. महाकाली
६. श्यामा
७. शान्ता
८. भृकुटी
९. सुतारिका
१०. अशोका
११. मानवी
१२. चण्डा
१३. विदिता
१४. अङ्कुशा
१५. कन्दर्पा
१६. निर्वाणी
१७. बला
१८. धारिणी
१९. धरणप्रिया
२०. नरदत्ता
२१. गान्धारी
२२. अम्बिका
२३. पद्मावती
२४. सिद्धायिका

## परिशिष्ट ८

### सोळ विद्यादेवीओ

१. रोहिणी
२. प्रज्ञप्ति
३. वज्रशृङ्खला
४. वज्राङ्कुशी
५. चक्रेश्वरी
६. पुरुषदत्ता
७. काली
८. महाकाली
९. गौरी
१०. गान्धारी
११. सर्वास्त्रमहाज्वाला
१२. मानवी
१३. वैरोट्या
१४. अच्छुप्ता
१५. मानसी
१६. महामानसी

## परिशिष्ट ९

### नव निधि

१. नैसर्पिक
२. पाण्डुक
३. पिङ्गल
४. सर्वरत्न
५. महापद्म
६. काल
७. महाकाल
८. माणवक
९. शङ्ख

## परिशिष्ट १०

## चोसठ सुरेन्द्रो

१. सौधर्म
२. ईशान
३. सनत्कुमार
४. महेन्द्र
५. ब्रह्म
६. लान्तक
७. महाशुक्र
८. सहस्रार
९. प्राणत
१०. अच्युत
११. चमर
१२. बलि
१३. धरण
१४. भूतानन्द
१५. हरिकान्त
१६. हरिषह
१७. वेणुदेव
१८. वेणुदारि
१९. अग्निशिख
२०. अग्निमाणव
२१. वेलम्ब
२२. प्रभञ्जन
२३. घोष
२४. महाघोष
२५. जलकान्त
२६. जलप्रभ
२७. पूर्ण
२८. अवशिष्ट
२९. अमितगति
३०. अमितवाहन
३१. किन्नर
३२. किम्पुरुष
३३. सत्पुरुष
३४. महापुरुष
३५. अतिकाय
३६. महाकाय
३७. गीतरति
३८. गीतयश
३९. पूर्णभद्र
४०. माणिभद्र
४१. भीम
४२. महाभीम
४३. सुरूप
४४. प्रतिरूप
४५. काल
४६. महाकाल
४७. सन्निहित
४८. सामान
४९. धातृ
५०. विधातृ
५१. ऋषि
५२. ऋषिपाल
५३. ईश्वर
५४. महेश्वर
५५. सुवत्स
५६. विशाल
५७. हास्य
५८. हास्यरति
५९. श्वेत
६०. महाश्वेत
६१. पतङ्ग
६२. पतङ्गपति
६३. चन्द्र
६४. सूर्य

## परिशिष्ट ११

## आठ सिद्धिओ

१. लघिमा
२. वशिता
३. ईशिता
४. प्राकाम्य
५. महिमा
६. अणिमा
७. यत्रकामावसायित्व
८. प्राप्ति

## परिचय

श्रीसिंहतिलकसूरिए रचेला आ स्तोत्रनी एक नकल स्व. श्री मोहनलाल भगवानदासना संग्रहमांथी मळी हती, बीजी प्रति पूना, भांडारकर रिसर्च इन्स्टिटयूटना संग्रह नं. ३२३, A १८८२-८३, त्रीजी नकल बुहारी, शेठ झवेरचंद पन्नाजीना संग्रहनी हती अने चोथी नकल मुनिराज श्री यशोविजयजी महाराजश्री पासेथी मळी हती।

आ चारमांथी त्रण प्रतिओनी हाथनकल हती ज्यारे एक पूना, भां. रि. इ. नी मूल हाथपोथी हती, एटले पाठ लेवानुं काम मुश्केल हतुं। चारे प्रतिओना केटलाक अशुद्ध श्लोकोने भाषानी दृष्टिए सुधारी अनुवाद, विवरण अने तुलना-श्लोको साथे अहीं प्रगट करेल छे।

श्रीसिंहतिलकसूरिए आ स्तोत्रमां खास करीने यंत्रनी रचना उपर प्रकाश पाड्यो छे। यंत्रनो मूलमंत्र, आराधना अने फलादेश पण जणाव्या छे।

आ स्तवन प्रसिद्ध 'ऋषिमंडलस्तोत्र' ना आधारे रचायेलुं छे। 'ऋषिमंडलस्तोत्र' मां यंत्र-रचना विशे जे अस्पष्ट निर्देश छे तेनी श्री सिंहतिलकसूरिनी आ रचनाथी स्पष्टता थाय छे। ए दृष्टिए आ स्तोत्र अतीव उपयोगी जणाय छे। वळी ऋषिमंडलस्तोत्रकारे तीर्थंकरोनी प्रभाना महिमा माटे ३१ थी ७६ श्लोकोनो विस्तार आप्यो छे तेने श्री सिंहतिलकसूरिए एक ज श्लोकमां संग्रही लीधो छे। एवो संग्रह केटलेय स्थळे जोवाय छे, ते तेनी तुलना करतां जणाई आवे छे। ए रीते ऋषिमंडलस्तोत्रना ९८ श्लोकोने श्रीसिंहतिलकसूरिए ३६ श्लोकोमां समावी लीधा छे। वळी ह्रींकारमां चोवीश तीर्थंकरोनी स्थापना उपरांत श्रीसिंहतिलकसूरि पंचपरमेष्ठीनी स्थापनानी विशेषता तेमना 'परमेष्ठिविद्यास्तवयन्त्र' अने 'मन्त्रराज-रहस्य' अनुसार आमां समावी दे छे। संक्षेपमां नाद, बिंदु, कला, शीर्षक अने दीर्घकलारूप ह्रींकारना अंशो उपर श्रीसिंहतिलकसूरिए सारी स्पष्टता करी छे अने विविध आम्नायोनो निर्देश पोतानी कृतिओमां कर्यो छे। ए कृतिओ प्रस्तुत ग्रंथमां अन्यत्र अमे प्रगट करी छे।

ऋषिमंडलस्तोत्र अनुसार रचायेलां अनेकविध ऋषिमंडलयंत्रो अने ह्रींकारयंत्रोमां एकसरखो मेळ देखातो नथी, ते माटे आ स्तोत्र स्पष्ट खुलासो आपे छे ए ज आ स्तोत्रनी विशेषता छे।

श्रीसिंहतिलकसूरिनी रचनाथी एटलुं स्पष्ट थाय छे के, तेमनी सामे रहेलुं ऋषिमंडलस्तोत्र तेमनी विद्यमानता वि. सं. १३३२ पहेलांनुं तो छे ज। ए ज स्तोत्रना आधारे दिगंबर जैनाचार्य श्रीविद्याभूषण-सूरिए ऋषिमंडलस्तोत्रनी ८५ उपजातिवृत्तमां करेली रचना पण प्रसिद्ध थयेली छे।

आ स्तोत्रनी तुलना माटे टिप्पणीमां अमे 'ऋषिमंडलस्तोत्र'ना सरखा भाववाळा श्लोको नोंध्या छे ते वाचकोने उपयोगी थई पडशे।

[५३-८]

# कलिकालसर्वज्ञ-श्रीमद्-हेमचन्द्राचार्यरचित-'त्रिषष्टिशलाकापुरुषचरित'गतसंदर्भः

## [पञ्च-नमस्कार-स्तोत्रम्]

(अनुष्टुप्-वृत्तम्)

ऋषभादींस्तीर्थकरान्, नमस्याम्यखिलानपि ।
भरतैरावत-विदेहाऽर्हतोऽपि नमाम्यहम् ॥ १ ॥
तीर्थकृद्भ्यो नमस्कारो, देहभाजां भवच्छिदे ।
भवति क्रियमाणः स बोधिलाभाय चोच्चकैः ॥ २ ॥
सिद्धेभ्यश्च नमस्कारं, भगवद्भ्यः करोम्यहम् ।
कर्मौघोऽदाहि यैर्ध्यानाऽग्निना भव-सहस्रजः ॥ ३ ॥
आचार्येभ्यः पञ्चविधाऽऽचारेभ्यश्च नमो नमः ।
यैर्धार्यते प्रवचनं, भवच्छेदे सदोद्यतैः ॥ ४ ॥
श्रुतं बिभ्रति ये सर्वं, शिष्येभ्यो व्याहरन्ति च ।
नमस्तेभ्यो महात्मभ्य,—उपाध्यायेभ्य उच्चकैः ॥ ५ ॥

---

### अनुवाद

ऋषभदेव वगेरे सर्व तीर्थंकरोने हुं नमन करुं छुं। भरत, ऐरवत अने महाविदेह क्षेत्रमां रहेला 'अर्हतो' (तीर्थंकरो) ने पण हुं नमुं छुं ॥ १ ॥

'तीर्थंकरो'ने करातो नमस्कार प्राणीओना संसार (रूपी बंधन) ने कापनारो थाय छे अने सम्यक्त्वनी प्राप्ति करावनारो थाय छे ॥ २ ॥

जेओए ध्यान-अग्निवडे हजारो भवमां उत्पन्न थयेल कर्मसमूहने बाळी नाख्यो छे, ते 'सिद्ध भगवंतो'ने हुं नमस्कार करुं छुं ॥ ३ ॥

भव (रूपी बंधन) ने छेदवामां सदा उद्यमशील एवा जेओ प्रवचनने धारण करे छे, ते पांच प्रकारना आचारवाळा 'आचार्यो' ने वारंवार नमस्कार हो ॥ ४ ॥

जेओ समस्त श्रुतने धारण करे छे अने शिष्योने (तेनो) उपदेश आपे छे, एवा ते 'उपाध्याय भगवंतो'ने वारंवार नमस्कार हो ॥ ५ ॥

शीलव्रत-सनाथेभ्यः, साधुभ्यश्च नमो नमः ।
भव-लक्ष-सन्निबद्धं, पापं निर्णाशयन्ति ये ॥ ६ ॥

---

जेओ लाखो भवोनी अंदर बांधेला पापनो समूल नाश करनारा छे अने शील तथा व्रतथी युक्त छे, एवा 'साधुओ' ने वारंवार नमस्कार हो ॥ ६ ॥

## परिचय 5

श्रीहेमचन्द्राचार्ये महाराजा कुमारपाळनी विनतिथी 'त्रिषष्टिशलाकापुरुषचरित' नामनो बृहत्काय ग्रंथ संस्कृत भाषामां पद्यमां रच्यो छे। तेमां पंचपरमेष्ठी विशे छ श्लोको स्तोत्ररूपे आपेला छे तेने अहीं अनुवाद साथे प्रकट कर्या छे।



## [५४-१]

# कलिकालसर्वज्ञ-श्रीमद्-हेमचन्द्राचार्यरचित-श्रीवीतरागस्तोत्रमङ्गलाचरणम्

यः परात्मा परंज्योतिः, परमः परमेष्ठिनाम् ।
आदित्यवर्णं तमसः परस्तादामनन्ति यम् ॥ १ ॥
सर्वे येनोदमूल्यन्त, समूलाः क्लेशपादपाः ।
मूर्ध्ना यस्मै नमस्यन्ति, सुरासुरनरेश्वराः ॥ २ ॥
प्रावर्त्तन्त यतो विद्याः, पुरुषार्थप्रसाधिकाः ।
यस्य ज्ञानं भवद्-भावि-भूतभावावभासकृत् ॥ ३ ॥
यस्मिन् विज्ञानमानन्दं, ब्रह्म चैकात्मतां गतम् ।
सः श्रद्धेयः स च ध्येयः, प्रपद्ये शरणं च तम् ॥ ४ ॥
तेन स्यां नाथवाँस्तस्मै, स्पृहयेयं समाहितः ।
ततः कृतार्थो भूयासं, भवेयं तस्य किङ्करः ॥ ५ ॥
तत्र स्तोत्रेण कुर्यां च, पवित्रां स्वां सरस्वतीम् ।
इदं हि भवकान्तारे, जन्मिनां जन्मनः फलम् ॥ ६ ॥

---

### अनुवाद

जेमनो आत्मा सर्व संसारी जीवोथी श्रेष्ठ छे, जेओ केवलज्ञानमय छे, जेओ पांच परमेष्ठिओमां प्रधान छे, अने जेमने पंडितजनो अज्ञानरूप अंधकारथी पर तथा सूर्य समान प्रकाशमान (अथवा अज्ञानान्धकारने दूर करवा माटे सूर्य समान प्रकाशमान) माने छे ॥ १ ॥

तथा, जेओए (रागद्वेष आदि) क्लेशरूप सर्व वृक्षोने (महामोहरूप) मूळथी उखेडी नाख्या छे अने जेमने सुरेन्द्रो, असुरेन्द्रो, तथा नरेन्द्रो (चक्रवर्तिओ) पण मस्तक नमावीने नमस्कार करे छे ॥ २ ॥

तथा जेमनाथी धर्मादि पुरुषार्थोने प्राप्त करावनारी चौद विद्याओ आ विश्वमां प्रवर्ती अने जेमनुं ज्ञान भूत, भविष्य अने वर्तमानकालना सर्व पदार्थोनुं प्रकाशक छे ॥ ३ ॥

तथा, जेमना आत्मामां विज्ञान (केवलज्ञान), आनंद (अव्याबाध सुख) अने ब्रह्म (परमपद) ए त्रणे एकरूपताने पाम्या छे ते श्री अरिहंत परमात्मा (ज) श्रद्धा करवा योग्य छे, ध्यान करवा योग्य छे अने ते परमात्माना (ज) शरणने हुं स्वीकारुं छुं ॥ ४ ॥

ते परमात्माथी (ज) हुं सनाथ छुं, ते परमात्माने ज हुं अनन्यहृदयथी चाहुं छुं, तेमनाथी ज हुं कृतकृत्य छुं अने तेमनो ज हुं सेवक छुं ॥ ५ ॥

ते परमात्माना गुणानुवादथी हुं मारी वाणीने पवित्र करुं; कारण के आ संसाररूप अटवीमां प्राणीओना जन्मनुं ए (भगवत्स्तवन) ज फळ छे. ॥ ६ ॥

## श्रीसोमोदयगणिकृतावचूर्णिः

**यः परात्मेति०** परश्चासावात्मा च परात्मा सर्वसंसारिजीवेभ्यः प्रकृष्टस्वरूपः, पुनः किं विशिष्टः ? परंज्योतिः। परं सकलकर्ममलकालुष्यरहितत्वेन केवलं ज्योतिर्ज्ञानमयं यस्य स तथा, परमिति केवलार्थेऽव्ययम्। परमे चिदानन्दरूपे पदे तिष्ठन्तीति परमेष्ठिनोऽर्हदादयः पञ्च, तेषां परमः प्रधानभूतः (सिद्धः)। परमत्वं चास्य (सिद्धस्य) मुक्तावस्थामधिकृत्य परमेष्ठिनामिति षष्ठी "सप्तमी चाविभागे निर्धारणे" (२–२–१०९) इति सूत्रेण। तथा यं वीतरागं तमसः परस्तादामनन्ति ध्यायन्ति तत्स्वरूपोपलब्धये मनीषिणः। क्व? परस्तात् परस्मिन् पारे, कस्य ? तमसोऽज्ञानरूपस्य, किम्भूतं यम्? आदित्यवर्णमादित्यस्येव वर्ण उद्योतो यस्य तं तथा, भानोरुपमानमन्यस्य तथाविधस्य वस्तुनोऽत्राभावात्, परस्तादिति पठिततमसोऽज्ञानरूपान्धकारस्याग्रे आदित्यवर्णं सूर्याभं तद्विनाशकमित्यर्थः ॥ १ ॥

**सर्वे०** येन सर्वे समस्ताः क्लेशा रागद्वेषादयस्त एव पादपा वृक्षा नरकादिकटुफलदायित्वेन समूला मिथ्यात्वमूलसहिता उदमूल्यन्त उन्मूलिताः, यस्मै मूर्ध्ना सुरासुरनरेश्वरा नमस्यन्ति–नमस्कुर्वन्ति ॥ २ ॥

**प्राव०** यतो यत्सकाशाद् विद्याः शब्दविद्यादिकाश्चतुर्दश, धर्मार्थकामादिपुरुषार्थानां च प्रसाधिका विधायिकाः प्राव्रर्त्तन्त अभूवन्, यद्वा द्वादशाङ्गीगता विद्याः सुवर्णसिद्ध्यादिप्ररूपिकाः। यस्य ज्ञानं भवद्भाविभूतभावावभासकृद्—अतीतानागतवर्त्तमानवस्तुप्रकाशकमस्तीति गम्यम् ॥ ३ ॥

**यस्मिन्०** यस्मिन् विशिष्टं ज्ञानं विज्ञानं केवलज्ञानमानन्दमकृत्रिमसुखं ब्रह्म च परमपदं त्रीण्यप्येकात्मतामैक्यं गतानि स एव वीतरागजीवः स एव ज्ञानं ज्ञानैकरूपत्वात् तस्य, स एव च सुखं दर्शन-स्पर्शनादिबाह्यस्य कस्यापि तत्राभावात्, स एव परमपदं अमुक्तिरूपस्याभावात्। अथ तच्छब्दं दर्शयन्त आहुः, सः श्रद्धेयः स पूर्वोक्तपरात्मादिविशेषणविशिष्टः श्रद्धेयः, स्वहृदयरुचिविषयः कार्यः, च-पुनः स ध्येयो रूपातीततया ध्यातव्यस्तं तमसः परस्तादाम्नातं शरणं प्रपद्ये स्वीकरोमि ॥ ४ ॥

**तेन०** तेनोन्मूलितक्लेशपादपेन नाथवान् सनाथोऽहं स्यां भवामि, तस्मै सुरासुरनमस्कृतायाऽहं समाहितस्तदेकतानमनाः स्पृहयेयं वाञ्छामि, ततः प्रकटितपुरुषार्थसाधकविद्यासमुदायादहं कृतार्थः कृतकृत्यः प्राप्ताभीष्टकार्यो वा भूयासं भवामि भविष्यामि इत्यर्थः। तस्य त्रिकालज्ञानवतः किङ्करो भवेयमस्मि ॥ ५ ॥

**तत्र०** तत्र विज्ञानानन्दब्रह्मरूपे स्वां सरस्वतीं वाणीं, स्तोत्रेण कृत्वा पवित्रां कुर्यां—करोमि। को हेतुः ? हि-यस्मात् कारणाद् भवकान्तारे संसारारण्ये जन्मिनां जीवानां, जन्मनः पादपरूपस्य इदमेव वीतरागस्तवनं फलम्, नान्यत् ॥ ६ ॥

## श्रीप्रभानन्दसूरिकृतविवरणम्

अत्राद्यसार्द्धश्लोकत्रयस्य पदानां प्रथमादिसप्तम्यन्तविभक्तिप्रथमवचनान्तानामुत्तरश्लोकत्रयस्य तदन्तैरेव पदैर्यथाक्रमं कर्त्तृकर्मविवक्षया योजनं कार्यम्। तथाहि—परमात्मेति विशेष्यं पदम्, अतो यः किल परात्मा परंज्योतिः स श्रद्धेयः। यश्च परमेष्ठिनां परमः स ध्येयः, यं चादित्यवर्णं तमसः परस्तादामनन्ति तं शरणं प्रपद्ये। येन च समूलाः सकलक्लेशपादपाः समुदमूल्यन्त तेन नाथवान् स्याम्। यस्मै च सुरासुरनरेश्वराः सरभसं नमस्यन्ति तस्मै समाहितः स्पृहयेयम्। यतश्च पुरुषार्थप्रसाधिका विद्याः प्रावर्त्तन्त ततः कृतार्थो भूयासम्। यस्य च भवद्भाविभूतभावावभासकृद् ज्ञानं तस्य किङ्करो भवेयम्। यस्मिंश्च विज्ञानमानन्दं ब्रह्म चैकात्मतामुपगतं तस्मिन् स्तोत्रेण स्वां सरस्वतीं पवित्रां कुर्यामिति पदानां परस्परसम्बन्धः।

साम्प्रतमेतदेव प्रतिपदं व्याख्यायते। तत्र परश्चासावात्मा च परात्मा परत्वं चास्य देहात्मान्तरात्मापेक्षम्, यतः कैश्चिदुपयोगलक्षणमनादिनिधनं अपौद्गलिकत्वेन रूपातीतं तथाविधसामग्रीसाकल्यात् शुभाशुभरूपस्य कर्मणः कर्त्तारमुदयप्राप्तस्य तस्यैव च भोक्तारमत एवैतल्लक्षणविलक्षणाद्देहादर्थान्तरभूतमविसंवादिप्रमाणप्रतिष्ठितमप्यात्मतत्त्वं महामोहोपहतमतित्वेनामन्यमानैः पिष्टादिद्रव्ययोगान्मदशक्तिमिवाचेतनमहद्भूतसम्पर्काच्चेतनत्वमुद्भाव्य देहस्यैवात्मत्वमुपकल्प्यतेऽतः स देहात्मा। यथा देहातिरिक्तस्यात्मनः सत्प्रमाणप्रतिष्ठितत्वं तथा पुरस्तादष्टमप्रकाशे प्रकाशयिष्यते।

अन्तरात्मा च ज्ञानावरणादिकर्मनिर्मथितमाहात्म्यः शरीरी संसारिजीवः। एतयोश्च वक्ष्यमाणविशेषणगणासहत्वेन प्रकृतानुपयोगित्वमतः परशब्दोपादानम्। परात्मा च विगलितसकलकर्ममलपटलः सम्यक्सिद्धज्ञानदर्शनाऽऽनन्दवीर्यलक्षणानन्तचतुष्टयः शिवमचलमपुनर्भवं परमपदमध्यासीनो ज्ञानदर्शनोपयुक्तः केवलात्मैव साम्प्रतं स एव विशिष्यते। किं विशिष्टः परमात्मेत्याह परंज्योतिः, अप्रतिपातित्वेन लोकालोकप्रकाशकत्वेन च परं सर्वोत्कृष्टं चित्स्वरूपं ज्योतिर्यस्येति ज्योतिर्ज्योतिष्मतोरभेदात् स एव परं ज्योतिः। परत्वं चास्य मतिश्रुतावधिमनःपर्यायलक्षणचिदंशचतुष्टयापेक्षं प्रतिपातित्वेनाल्पविषयत्वेन च मत्यादीनामनीदृशत्वात्। यदि वा रवीन्दुविद्युन्मणिप्रमुखे निखिलेऽपि ज्योतिर्वर्गे यः परमुत्कृष्टं ज्योतिरिति स परंज्योतिः। यश्चैवंविधः परात्मा स श्रद्धेयः श्रद्धाविषयमवतारणीय इत्युत्तरपदेन योगः। किमुक्तं भवति? किल यद्यप्यघातिकर्मणामर्हदादीनामध्यक्षे तस्मिंस्तत् प्रत्ययेनैव श्रद्धा विधेयैव। न चानुपकृतपरानुग्रहकृतां क्षीणरागद्वेषमोहानामर्हदादीनां वितथवादित्वमतः किमश्रद्धेयं परमात्मनः?। पुनः परमरहस्यभूतं परमात्मानमेव विशिनष्टि। परमः परमेष्ठिनाम्। परमे चिदानन्दरूपे ब्रह्मणि तिष्ठन्तीति परमेष्ठिनस्ते चार्हदाचार्योपाध्यायसाधव एव, तेषां मध्ये परमः प्रकृष्टः सिद्धरूपो यः परमेष्ठी, अर्हदादिपरमेष्ठिचतुष्टयस्य चामुक्ततावस्थामधिकृत्य सिद्धस्य पञ्चपरमेष्ठिनः परमत्वम्। मुक्तास्तु सर्वेऽप्येकरूपा एव। स चैवंविधः परमात्मा भगवांस्तदेकतानमनोभिर्ध्येयस्तत्स्वरूपप्राप्तये सततमनुस्मरणीय इति उत्तरपदेन सम्बन्धः।

प्रथमान्तं पदमभिधाय द्वितीयान्तमाह। यं च परमात्मानमणिमाद्यष्टमहासिद्धिप्रसिद्धिमहसो मुनयोऽप्यामनन्ति—तत्स्वरूपोपलब्धये संततमभ्यस्यन्ति। किम्भूतम्? तमसः परस्ताद् वर्तमानम्, तमांसि निकाचितानि कर्माणि विमलकेवलाऽऽलोकेन च तेषां पारे प्रतिष्ठितं सत्त्व-रजस्तमोगुणत्रयातीतमित्यर्थः। तमहमेवंरूपं परमात्मानं दुर्वारान्तरापरित्याजितात्मशक्तिः शरणं प्रपद्ये इत्युत्तरेण योगः। पुनः किं विशिष्टम्? आदित्यवर्णं, आदित्यस्य प्रभापतेरिव वर्णः शोभा यस्य स तथा तम्। अत्राह परः—'ननु परिमितक्षेत्रमात्रप्रकाशनमहसा मिहिरेण लोकालोकप्रकाशनप्रवरपरमज्योतीरूपस्य परमात्मनः साम्यमनुपपन्नम्। तथा चागमः—

"चंदाइच्चगहाणं, पहा पयासेइ परिमियं खेत्तं ।
केवलियनाणलम्भो, लोयालोयं पयासेइ" ॥ १ ॥

इति'। आचार्यः—साधु, भोः सहृदय ? हृदयङ्गममभिदधासि, केवलं सकलेऽपि कलावत्प्रमुखे तेजस्विवर्गे विगणयद्भिरस्माभिर्भानोरेव किमपि तदुपमानलवलाभसम्भावनास्वादत्वमुपलब्धमित्यावित्यवर्णमित्यभिहितं, तत्त्वतस्तु सुमेरुपरमाण्वोरिव महदन्तरं परमात्मद्वादशात्ममहसोरिति । आदित्योऽपि निरस्ततमस्त्वेन तमसः परस्ताद् भवति ।

तृतीयान्तं पदमाह । येन च भगवता परमात्मना क्लेशपादपाः सर्वेऽप्युदमूल्यन्त । "अविद्याऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः ।" तत्र "अनित्याशुचिदुःखानात्मसु मिथ्याज्ञानमविद्या, दुर्धराहंकारवशात् सर्वत्राऽस्मीति भावोऽस्मिता, मनोज्ञेषु शब्दादिष्वात्मनो गाढाभिष्वङ्गो रागः, तेष्वेवामनोज्ञेषु भृशमप्रीतिविशेषो द्वेषः, अतत्त्वेऽपीदमित्थमेवेत्येकान्ताग्रहग्रहिलताऽभिनिवेशः" । उपलक्षणं चैतदन्यासामपि घातिकर्मोत्तरप्रकृतीनाम् । एते च संसृत्यामात्मनोऽनादिसम्बन्धवशाद् बद्धमूलाः, प्रदर्शिततत्तद्विकारप्ररोहसंहतयः, स्फुरदाध्यात्मिकाधिभौतिकाधिदैविकवेदनोदयप्रसूनसंततयः, प्रकाशितामुष्मिकदुर्गदुर्गतिदुःखफलपटलाः पादपा इव पादपाः । ते च सङ्गत्यागाद्याकेवलोत्पत्ति त्रिजगदप्रतिमल्लहस्तिमल्लेन येन भगवता दुस्तपतपोऽन्दोलनेन (?) चलाचलतामापाद्य शुक्लध्यानसमुद्दण्डशुण्डाग्रेडनेन समूलाः सहेलमुन्मूलितास्तेन त्रिजगन्नाथेनाहमपि नाथवान् स्यां भवेयमित्युत्तरेण योगः । येनासौ मामलब्धानां ज्ञानादिगुणानां लम्भनेन तेषामेव च लब्धानां परिपालनात्तानुगृह्णाति ।

चतुर्थ्यन्तं पदमाह—मूर्ध्ना यस्मै नमस्यन्ति सुरासुरनरेश्वराः । यस्मै समूलोन्मूलितक्लेशपादपाय भगवते सुरासुरनरेश्वराः । देवदानवमानवपतयः सकलक्लेशजालोच्छित्तिनिमित्तं मूर्ध्ना उत्तमाङ्गेन सरभसं नमस्यन्ति । तस्मै त्रिभुवनसनातनगुरवे समाहितस्तदेकतानमानसोऽहमपि स्पृहयेयं, प्रणामादिनिमित्तं स्पृहामावहामीत्युत्तरेण सम्बन्धः । इदमुक्तं भवति । किल यद्यपि सुरासुरेश्वरादिवत् प्रत्यक्षार्हत्प्रमाणादिसामग्री दुःषमा-समयसमुद्भूतस्य ममासंभविनी तथापि "मनोरथानामगतिर्न विद्यते" इति न्यायात् स्पृहामात्रमपि तावद् धारयामि येन सदभ्यस्ततया भवान्तरेऽपि संस्कारोऽयमनुवर्तेत इति ।

पञ्चम्यन्तं पदमाह—प्रावर्त्तन्त यतो विद्याः पुरुषार्थप्रसाधिकाः । यतो यस्मात् सर्वविदः परमपुरुषात् पुरुषार्थानां धर्मार्थ-काम-मोक्षलक्षणानां प्रसाधिकास्तदुपायोपदर्शिन्यो विद्याः शब्दविद्यादिकाः प्रावर्त्तन्त प्रादुरासन् । यतो द्वादशाङ्गीमूलनीवीमुत्पादादित्रिपदीं तदुचितेषु भगवान् स्वयमुदीरयति । न च द्वादशाङ्गीव्यतिरिक्तमन्यदपि विद्याङ्गमस्तीत्यतः समस्तविद्यानां भगवानेव प्रभवः । अतएव ततस्तस्मात् परमपुरुषानुध्यानादहमपि पुमर्थोपलब्ध्या कृतार्थः कृतकृत्यो भूयासमित्युत्तरेण योगः । पुरुषार्थोपायोपलब्ध्या च कृतकृत्यता समीचीनैवेति ।

षष्ठ्यन्तं पदमाह—यस्य ज्ञानं भवद्भाविभूतभावावभासकृत् । यस्य भगवतः परमात्मनो घातिकर्म्मणामात्यन्तिकक्षयादुत्पन्नं ज्ञानं देशकालस्वभावविप्रकर्षैरनन्तरितमत एव भवद्भाविभूतभावावभासकृद् वर्त्तमानानागतातीतपदार्थसार्थप्रकटनपटिष्ठम् । तस्यैवम्भूतस्याहं किङ्करो भवेयमित्युत्तरेण योगः । अत्रायमाशयः—किलास्मिन् जगति यस्य विसंवादित्वेन नानैकान्तिकोऽष्टाङ्गनिमित्तमात्रावभासनपरो ज्ञानांशः स्यात् सोऽपि तदर्थिभिः प्रेष्यैरिव प्रतिक्षणमुपास्यते । यस्य च भगवतः प्रागुपवर्णितस्वरूपं ज्ञानं तस्य किङ्करत्वमनुत्तरसुरा अपि कुर्युः । किमङ्ग ! मादृशोऽङ्गभागिति ।

सप्तम्यन्तं पदमाह—यस्मिन् विज्ञानमानन्दं ब्रह्म चैकात्म[त्म]तां गतम् । यस्मिंश्च भगवति परमपरमेष्ठिनि विज्ञानमानन्दं ब्रह्म चैकात्मतां गतम् । तत्र मत्यादिज्ञानेभ्यः क्षायिकत्वेनाप्रतिपातित्वेना-

नन्तद्रव्यपर्यायगोचरत्वेन च विशिष्टं केवलालोकलक्षणं ज्ञानं विज्ञानम्। आनन्दं चात्मनः कदाप्यलब्धपूर्वस्वरूपलाभसमुद्भवमितरकारणकलापनिरपेक्षमनुपाधि मधुरमक्षयमात्यन्तिकं सुखमेव। ब्रह्म च परमं पदम्। यदा च भवोपग्राहिकर्मपारवश्याद्‌द्यापि भवस्थः केवली भवति तदास्मिन् भगवति केवलिनि विज्ञानमानन्दं च वर्त्तते। अयं च परमं पदं गमिष्यतीत्यात्मविज्ञानानन्दब्रह्मणां मिथः पृथग्भावः स्यादेव। शैलेश्यनन्तरं च सकलकर्मांशप्रक्षयादक्षयं पदमुपेयुष्यस्मिन् विज्ञानमानन्दं ब्रह्म चैकात्मतां याति स एव परमात्मा, स एव विज्ञानं, स एवानन्दः, स एव परमं ब्रह्मेत्यभिन्नभावतां भजते। अतस्तत्र तस्मिन् पूर्वोपवर्णितस्वरूपे परमात्मनि स्तोत्रेण यथार्थवादेनाहं स्वामात्मीयां सरस्वतीं वाणीं पवित्रां पावनीं कुर्यां—विदध्यामित्युत्तरेण सम्बन्धः। ननु किमस्याः प्रथमं किमप्यपूतत्वमस्तीत्युच्यते। स्वकर्मपरिणामेनाभ्यावृत्त्या भवे बंभ्रम्यमाणानां प्रबलज्ञानावरणोदयाद् विशिष्टचित्तचैतन्यशून्यानामसुमतामसुलभैव कवित्ववक्तृत्वसरसा सरस्वती, यदा च तथाभव्यत्ववैचित्र्यात् संघटितापि भवाभिनन्दिनां सुरनरादीनामसद्भूतगुणोद्भावनेनात्मानं मलिनयति, तदा परमात्मप्रभृतिस्तुत्यवर्गस्तुतिप्रयोगमन्तरेण किमन्यदघमर्षणमस्यास्ततः तत्र स्तोत्रेणेत्युक्तम्। किञ्च अस्मिन् भवकान्तारे संसारारण्ये जन्मिनां सत्क्षेत्राद्येकादशाङ्गीसक्तस्य जन्मनोऽवतारस्यापीदं सद्भूतं वस्तुतत्त्वोद्भावनमेव फलम्।

## परिचय

कलिकालसर्वज्ञ भगवान् श्रीहेमचन्द्राचार्यना श्री 'वीतरागस्तोत्र' थी कोण विद्वान् अपरिचित हशे? महाराजा कुमारपालनी दैनिक प्रार्थना माटे रचवामां आवेल ए ग्रंथरत्ननुं आजे पण अनेक महात्माओ भावपूर्वक प्रतिदिन पारायण करे छे। रोज सवारमां आ ग्रंथनुं संपूर्ण पारायण न थाय त्यांसुधी मोढामां कांइ पण न नाखवानो श्रीकुमारपाल महाराजानो दृढ अभिग्रह हतो। आ ग्रंथ साहित्य, भक्ति वगेरे सर्व दृष्टिए परिपूर्ण छे।

श्री वीतरागस्तोत्रनी एक प्रत श्रीसोमोदयगणिकृत अवचूर्णि अने श्रीप्रभानन्दसूरिकृत विवरण साथे श्री केसरबाई ज्ञानमंदिर, पाटण, तरफथी वि. सं. १९९८ मां प्रकाशित थई छे। तेमांथी प्रस्तुत संदर्भ तारवीने अहीं रजू कर्यो छे।



[ ५५-१० ]

# भट्टारक-श्रीसकलकीर्तिरचित-'तत्त्वार्थसारदीपक'-महाग्रन्थस्य संदर्भः

[ पदस्थ—भावना प्रकरणम् ]

अथ पिण्डस्थमाख्याय, वक्ष्ये पदाक्षरोद्भवम् ।
ध्यानं पदस्थमत्यन्तस्वाधीनं मुक्तये सताम् ॥ ३३ ॥
पदान्यादाय साराणि, योगिभिर्यद् विधीयते ।
सिद्धान्तबीजभूतानि, ध्यानं पदस्थमेव तत् ॥ ३४ ॥
ध्यायेदनादिसिद्धान्तविख्यातां वर्णमातृकाम् ।
आदिनाथमुखोत्पन्नां, विश्वागमविधायिनीम् ॥ ३५ ॥
पत्रषोडशसंयुक्ते, कमले नाभिमण्डले ।
प्रतिपत्रं भ्रमन्तीं स, स्मरेद् द्व्यष्टस्म(स्व)रावलीम् ॥ ३६ ॥
'अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ऐ, ओ, औ, अं, अः ॥'

---

## अनुवाद *

पिण्डस्थ ध्यान विशे जणाव्या पछी—हवे हुं पद अने अक्षरोथी (अथवा पदना अक्षरोथी) उत्पन्न थता एवा 'पदस्थ ध्यान' विशे कहीश । ए (पदस्थ ध्यान) अत्यंत स्वाधीन छे तेथी ते सत्पुरुषोने मुक्ति माटे (सुसाध्य) थाय छे ॥ ३३ ॥

सिद्धान्तना बीजभूत सार पदोने अवलम्बीने योगीओ जे ध्यान करे छे, ते ज 'पदस्थ ध्यान' कहेवाय छे ॥ ३४ ॥

### वर्णमालानुं ध्यान

श्री आदिनाथ भगवंतना मुखथी निकळेली, सघळा आगमोनी रचना करनारी अने अनादि-सिद्धान्तमां विख्यात एवी वर्णमातृका (सिद्धमातृका)नुं ध्यान करवुं जोईए[2] ॥ ३५ ॥

नाभिमंडळमां सोळ पत्रवाळा कमळना प्रत्येक पत्र उपर अनुक्रमे फरती सोळ स्वरोनी श्रेणिनुं स्मरण करवुं[3] ॥ ३६ ॥

ते सोळ स्वरो आ प्रकारे छे—'अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः ।'

---

* ग्रन्थकारे पदस्थ-ध्यान विषे 'ज्ञानार्णव'नो आधार लीधो होय एम लागे छे, कारण के केटलाये श्लोकोनुं थोडा फेरफार साथे आमां निरूपण छे । तेनी सरखामणी माटे 'ज्ञानार्णव'ना प्रकरण ३८ पृ. ३८७ थी श्लोकोनो अंक अहीं नोंधीए छीए ।

१. ज्ञा. श्लो. १ । २. ज्ञा. श्लो. २ । ३. ज्ञा. श्लो. ३ ।

चतुर्विंशतिपत्राढये, कञ्जे सत्कर्णिके हृदि ।
पञ्चविंशान् ककारादि-मान्तान् ध्यायेत् स व्यञ्जनान् ॥ ३७ ॥
ततो वदनराजीवे, हैमे पत्राष्टभूषिते ।
चिन्तयेच्छेषवर्णाष्टौ, यकारादीन् प्रदक्षिणम् ॥ ३८ ॥
इमां प्रसिद्धसिद्धान्तप्रसिद्धां वर्णमातृकाम् ।
ध्यायेद् यः स श्रुताम्भोधेः, पारं गच्छेच्च तत्फलात् ॥ ३९ ॥
अथ मन्त्रं गणाधीशं, विश्वतत्त्वैकनायकम् ।
आदिमध्यान्तसद्भेदैः, स्वरव्यञ्जनसंभवम् ॥ ४० ॥
ऊर्ध्वाधोरेफसंयुक्तं, सकलं बिन्दुभूषितम् ।
एकाग्रमनसा ज्ञानिन् ! मन्त्रराजमिमं स्मर ॥ ४१ ॥

---

हृदयमां सुंदर कर्णिका सहित चोवीश पत्रवाळा कमळमां 'क' थी 'म' सुधीना पचीश व्यञ्जनोनुं तेणे (योगीए) ध्यान करवुं[1] ॥ ३७ ॥

ए पछी मुखमां सुवर्णकमळना आठ पत्रोमां प्रदक्षिणारूपे (क्रमशः फरता) बाकी रहेला 'य' आदि (य र ल व श ष स ह) आठ वर्णोनुं चिंतन करवुं[2] ॥ ३८ ॥

### फलश्रुति

आ प्रकारनी (उपर जणावेली) प्रसिद्ध सिद्धांतोमां विख्यात एवी वर्णमातृकानुं जे पुरुष ध्यान करे ते तेना फलस्वरूपे श्रुतसागरना पारने पामे[3] ॥ ३९ ॥

### मन्त्राधिराज हँ

हवे गणाधीश मन्त्र (हँ विशे जणावे छे के—) जे सर्व तत्त्वोनो मुख्य नायक छे, जे आदि (अ), मध्य (र्) अने अंत (ह्)—ए रीते थता भेदो वडे स्वर अने व्यञ्जनथी उत्पन्न थाय छे[4], जे उपर अने नीचे रेफथी युक्त छे, जे कलाथी सहित छे अने जे बिन्दुथी शोभे छे; ते आ मन्त्रराजं[5] (हँ) नुं हे ज्ञानी ! तुं एकाग्र मनथी स्मरण कर[6] ॥ ४०–४१ ॥

---

१. ज्ञा. श्लो. ४ । २. ज्ञा. श्लो. ५ । ३. ज्ञा. श्लो. ६ । ४. ज्ञा. श्लो. ७ ।

५. 'ब्रह्मविद्याविधि' नामक अप्रकट जैन ग्रंथमां आ 'हँ'ने मन्त्रराज तरीके ओळखावतां जणाव्युं छे के—

ऊर्ध्वाधोरेफमाक्रान्तं, सकलं बिन्दुलाञ्छितम् ।
अनाहतयुतं तत्त्वं मन्त्रराजं प्रचक्षते ॥ हँ ॥
—ह. लि. पत्र ९

६. ज्ञा. श्लो. ८ ।

देवाम(सु)रनतं मिथ्यादुर्बोधध्वान्तभास्करम् ।
शुक्लं मूर्द्धस्थचन्द्रांशुकलापव्याप्तदिङ्मुखम् ॥ ४२ ॥

हेमाब्जकर्णिकासीनं निर्मलं दिक्षु खाङ्गणे ।
संचरन्तं च चन्द्राभं, जिनेन्द्रतुल्यमूर्जितम् ॥ ४३ ॥

ब्रह्मा कैश्चिद्धरिः कैश्चिद्, बुद्धः कैश्चिन्महेश्वरः ।
शिवः सर्वैस्तथेशानो, वर्णोऽयं कीर्तितो महान् ॥ ४४ ॥

मन्त्रमूर्तिं किलादाय, देवदेवो जिनः स्वयम् ।
सर्वज्ञः सर्वगः शान्तः, साक्षादेष व्यवस्थितः ॥ ४५ ॥ 'ह्रँ' ॥

ज्ञानबीजं जगद्वन्द्यं, जन्म-मृत्यु-जरापहम् ।
अकारादि-हकारान्तं, रेफबिन्दुकलाङ्कितम् ॥ ४६ ॥

भुक्ति-मुक्त्यादिदातारं, स्रवन्तममृताम्बुभिः ।
मन्त्रराजमिमं ध्यायेद्, धीमान् विश्वसुखावहम् ॥ ४७ ॥

---

(ते मंत्र) देवो अने असुरो वडे नमस्कार करायेल, मिथ्याज्ञानरूप अन्धकार (ने दूर करवा) माटे सूर्य समान, पोताना उपर रहेला चन्द्र(कला)मांथी नीकळता किरणोना समूह वडे दिगंतोने व्याप्त करतो, सुवर्णकमलनी कर्णिकामां विराजमान, निर्मल, दिशाओमां अने आकाशरूपी आंगणामां संचरता चन्द्र समान, परम सामर्थ्यशाळी अने श्रीजिनेन्द्रतुल्य छे[1] ॥ ४२–४३ ॥

आ महान् वर्ण (ह्रँ) ने ज केटलाक ब्रह्मा, केटलाक हरि, केटलाक बुद्ध, केटलाक महेश्वर, केटलाक शिव तथा केटलाक ईशान कहे छे[2] ॥ ४४ ॥

खरेखर ! आ मंत्रना रूप(आकृति)ने धारण करीने स्वयं देवाधिदेव, सर्वज्ञ, सर्वव्यापी अने शान्त एवा श्री जिनेश्वर भगवान् साक्षात् रहेला छे[3] ॥ ४५ ॥ ते मन्त्र आ छे—'ह्रँ'।

## मन्त्राधिराज अर्हँ

(अथवा) बुद्धिमान पुरुषे जेनी आदिमां 'अ' छे; अंतमां 'ह' छे अने जे रेफ, कला अने बिन्दुथी सहित छे; जे ज्ञानबीज छे; जगद्वंद्य छे; जन्म, मृत्यु अने जराने दूर करनार छे; भुक्ति (सांसारिक सुखो) तेमज मुक्तिने आपनार छे; जेमांथी अमृतजळ झरी रह्युं छे अने जे सर्व सुखोने लावनार छे, ते आ मन्त्रराज 'अर्हँ' नुं ध्यान करवुं जोईए[4] ॥ ४६-४७ ॥

---

१. ज्ञा. श्लो. ९-१० । २. ज्ञा. श्लो. ११ । ३ ज्ञा. श्लो. १२ । ४ ज्ञा. श्लो. १३ ।

नासाग्रे निश्चलं वा भ्रूलतान्तरे महोज्ज्वलम् ।
तालुरन्ध्रेण वाऽऽयान्तं, विशन्तं वा मुखाम्बुजे ॥ ४८ ॥
सकृदुच्चारितो येन, मन्त्रोऽयं वा स्थिरीकृतः ।
हृदि तेनापवर्गाय, पाथेयं स्वीकृतं परम् ॥ ४९ ॥
यदैवेष महामन्त्रश्चित्ते धत्ते स्थितिं मुनेः ।
तदैव कर्मसन्तानप्रारोहः प्रविशीर्यते ॥ ५० ॥
मत्वेतीदं महत्तत्त्वमर्हंनामोद्भवं बुधाः ।
विश्वकल्याणतीर्थेशं, श्रीदं ध्यायन्तु मुक्तये ॥ ५१ ॥
सर्वावस्थासु सर्वत्र, जपन्तु वा निरन्तरम् ।
विशुद्धे मानसे मन्त्रं, निश्चलं स्थापयन्तु वा ॥ ५२ ॥ 'अर्हं' ॥
ततो हकारमात्रं च, रेफ-बिन्दु-कलोज्झितम् ।
सूक्ष्मं प्रभास्वरं चन्द्ररेखाभं शान्तिकारणम् ॥ ५३ ॥
अणिमादिमहर्द्धीनां, जनकं चिन्तयेत् सुधीः ।
अनुच्चार्य हृदा नित्यं, भवभ्रमणहानये ॥ ५४ ॥ 'ह' ॥

---

ते मन्त्रराज नासिकाना अग्रभाग पर स्थिर छे, अथवा भ्रूमध्यमां अत्यन्त प्रकाशमान छे, अथवा तालुरन्ध्रथी आवे छे अने मुखकमलमां प्रवेश करे छे, एवुं ध्यान करवुं ॥ ४८ ॥

जेणे एक ज वार आ मन्त्रनो उच्चार कर्यो छे अथवा हृदयमां स्थिर कर्यो छे ते पुरुषे मोक्ष माटे उत्तम भातुं ग्रहण कर्युं[2] छे ॥ ४९ ॥

मुनिना चित्तमां आ महामंत्र स्थिरता करे त्यारथी ज (अर्थात् मुनिना चित्तमां आ महामंत्रनी स्थिरता थतांनी साथे ज) कर्मोनी परंपरानो अंकुरो खरवा मांडे छे[3] ॥ ५० ॥

ए रीते अर्हँ नाममांथी उत्पन्न थयेला आ महातत्त्वने जाणीने विश्वनुं कल्याण करवामां श्री तीर्थंकर स्वरूप अने मोक्ष (अने मुक्ति) ने आपनार एवा ते तत्त्व(अर्हँ)नुं विद्वानोए मुक्ति माटे ध्यान करवुं जोईए ॥ ५१ ॥

अथवा सर्व अवस्थाओमां सर्वत्र निरंतर ते मन्त्राधिराजनो जाप करवो जोईए । अथवा विशुद्ध मनमां ते मन्त्रने निश्चल रीते स्थापवो जोईए ॥ ५२ ॥ ते मन्त्र आ छे—'अर्हँ'

## 'ह' कार

ते पछी बुद्धिमान पुरुष संसारभ्रमणनी हानि माटे उच्चार कर्या विना मन वडे केवल हकारने रेफ, कला अने बिन्दुथी रहित, सूक्ष्म, प्रकाशमान अने चन्द्ररेखा जेवो चिंतवे । आवो 'ह'कार शान्ति अने अणिमादि महर्द्धिओनुं कारण छे[4] ॥ ५३-५४ ॥ ते मन्त्र आ छे—'ह' ।

---

१ ज्ञा. श्लो. १६ । २ ज्ञा. श्लो. १४ । ३ ज्ञा. श्लो. १५ । ४. ज्ञा. श्लो. २१ ।
५. ज्ञा. श्लो. २-३, पृ. ३९२ ।

ॐकारं विस्फुरच्चन्द्रकलाबिन्दुमहोज्ज्वलम् ।
नामाग्राक्षरनिष्पन्नं, पञ्चानां परमेष्ठिनाम् ॥ ५५ ॥
धर्मार्थकाममोक्षाणां, दातारं विश्वपूजितम् ।
हृत्कञ्जकर्णिकासीनं, ध्यायेद् ध्यानी शिवाप्तये ॥ ५६ ॥
अर्हन्तो ह्यशरीराश्चाचार्या विश्वनतक्रमाः ।
उपाध्यायाः गताः पारं, श्रुताब्धेर्मुनयः परे ॥ ५७ ॥
एषां पंचनमस्कारपदानां प्रथमाक्षरैः ।
निष्पादितोऽयमोङ्कारो, बुधैः सर्वार्थसिद्धिदः ॥ ५८ ॥
एष मन्त्रो जगत्ख्यातः, कामदः कामधेनुवत् ।
ध्यानीनां कल्पशाखीव, समीहितफलप्रदः ॥ ५९ ॥
चिन्तामणिरिवाभीष्टसिद्धिकृन्मूलमन्त्रजः ।
ध्यातव्योऽनिशमत्यर्थं, सर्वकार्यार्थसिद्धये ॥ ६० ॥
स्तम्भनेऽयं सुवर्णाभो, विद्वेषे कज्जलप्रभः ।
वश्यादिकरणे रक्तो, ध्येयः शुभ्रोऽथ हानये ॥ ६१ ॥

---

## 'ॐ'कार

अथवा ध्यानी पुरुष विस्फुरायमाण चन्द्रकला अने बिन्दु वडे महोज्ज्वल अने हृदयकमलनी कर्णिकामां विराजमान एवा ॐकारनुं मोक्ष माटे ध्यान करे । ते ॐकार पांच परमेष्ठिओना नामना प्रथमाक्षरो (अ+अ*+आ+उ+म्+) थी निष्पन्न, विश्व वडे पूजित अने धर्म, अर्थ, काम अने मोक्षने आपनार छे[1] ॥ ५५-५६ ॥

विश्व जेमना चरणोमां नम्युं छे एवा **अरिहंतो, अशरीरी—सिद्धो** तथा **आचार्यो**, श्रुतसिंधुना पारने पामेला **उपाध्यायो** अने श्रेष्ठ **मुनिओ**—ए पंचनमस्कार (नमस्कार महामंत्र)ना पदोना प्रथम अक्षरो वडे (गणधरादि) बुद्धिमान पुरुषोए सर्व प्रयोजनोनी सिद्धिने आपनार आ ॐकारने निष्पादित कर्यो छे ॥ ५७—५८ ॥

आ मंत्र जगतमां विख्यात, कामधेनुनी जेम इच्छित वस्तुओने आपनार अने ध्यानी पुरुषोने कल्पवृक्षनी जेम समीहित—वांछित फलने आपनार छे ॥ ५९ ॥

मूलमंत्रमांथी उत्पन्न थयेल आ ॐकार चिन्तामणिनी जेम वांछितोनी सिद्धिने करनार छे । तेथी सर्व कार्यो अने अर्थोनी सिद्धि माटे प्रतिदिन एनुं घणुं ध्यान करवुं जोईए ॥ ६० ॥

स्तम्भनमां सुवर्णसदृश कांतिवाळो, विद्वेषमां काजळ समान प्रभावाळो, वशीकरणादिमां रक्त अने पापनाश माटे शुभ्र ॐकार ध्येय छे[2] ॥ ६१ ॥

---

* अशरीरी । + मुनि । १ ज्ञा. श्लो. ३३ । २. ज्ञा. श्लो. ३७ ।

अथवैषोऽनिशं ध्येयः, सर्वत्रैव शशिप्रभः ।
कर्मारिहानये कृत्ये, किमसत्कल्पनैः सताम् ॥ ६२ ॥ ॐ ॥
महापञ्चगुरोर्नाम, नमस्कारसुसंभवम् । (?)
महामन्त्रं जगज्ज्येष्ठमनादिसिद्धमादिमम् ॥ ६३ ॥
ध्यायन्तु वा जपन्तूच्चैर्दक्षाः सर्वार्थसाधकम् ।
युक्त्या कमलजाप्येन, वशीकृत्य चलं मनः ॥ ६४ ॥
मस्तकस्थे स्फुरच्चन्द्राभेऽब्जे पत्राष्टभूषिते ।
स्थापयेत् कर्णिकामध्येऽर्हन्तं पूर्वादिदिक्षु च ॥ ६५ ॥
चतुर्षु पद्मपत्रेषु, सिद्धं सूरिमनुक्रमात् ।
उपाध्यायं परं साधुं, विदिक्पत्रेषु दर्शनम् ॥ ६६ ॥
ज्ञानं वृत्तं तपो ध्यानी, स्थापयेद् ध्यानसिद्धये ।
कर्णिकायां जपेद् ध्यायेद्, वाऽऽदौ मन्त्रं च्युतोपमम् ॥ ६७ ॥
महापञ्चगुरूणां पञ्चत्रिंशदक्षरप्रमम् ।
उच्छ्वासैस्त्रिभिरेकाग्रचेतसा भवहानये ॥ ६८ ॥
ततश्चतुर्दिशापत्रेषु मन्त्राँश्चतुरः स्मरेत् ।
क्रमाद् विदिक्षु पत्रेषु, नमस्काराँश्चतुःप्रमान् ॥ ६९ ॥

---

अथवा रोज सर्वत्र चंद्र समान प्रभावाळा ॐकारनुं ज कर्मशत्रुना नाश माटेना कृत्यमां ध्यान करवुं जोईए । सत्पुरुषोने बीजी असत् कल्पनाओनुं शुं प्रयोजन ? ॥ ६२ ॥ ॐ ॥

नमस्कार महामंत्रमां रहेला (अरिहंत–सिद्ध–आयरिय–उवज्झाय–साहु रूप) पांच महागुरुओना नामथी निष्पन्न थयेल महामंत्र के जे जगतमां श्रेष्ठ छे, अनादि-सिद्ध छे, आदिम छे अने सर्व अर्थोनो साधक छे, तेनुं दक्ष पुरुषोए कमलजाप वडे युक्तिपूर्वक चंचल मनने वश करीने जाप अथवा ध्यान करवुं जोईए ॥ ६३-६४ ॥

मस्तकमां रहेला (ब्रह्मरन्ध्रचक्रमां), स्फुरायमान चन्द्र जेवा, आठ पत्रोथी शोभता कमळनी कर्णिकामां वच्चे अर्हंत भगवंतने स्थापन करवा अने पूर्व आदि दिशाओमांना चार पत्रोमां अनुक्रमे सिद्ध भगवंत, सूरि भगवंत, उपाध्याय भगवंत अने साधु भगवंतने स्थापन करवा; तेमज विदिशाओनी पांखडीओमां अनुक्रमे दर्शन, ज्ञान, चारित्र अने तपने ध्यानी पुरुषे ध्याननी सिद्धि माटे स्थापन करवां । ते पूर्वे प्रथमतः कर्णिकामां निरुपम एवा[1] पांच महागुरुओना पांत्रीश अक्षर प्रमाण (मंत्र)नो त्रण श्वासोच्छ्वासमां एकाग्रचित्तथी भवनी हानि माटे जाप करवो अथवा ध्यान करवुं ॥ ६५-६८ ॥

ए पछी चार दिशाना पत्रोमांना चार मंत्रोनुं स्मरण करवुं अने ते पछी क्रमशः विदिशाओना पत्रोमां चार प्रकारना नमस्कारनुं चिंतन करवुं (?) ॥ ६९ ॥

---

१. शा. श्लो. ४० ।

अनेन विधिना भाले, मुखे कण्ठे हृदि स्फुटम् ।
नाभौ पद्मे च संस्थाप्यं, मन्त्रं नवनवोत्तमम् ॥ ७० ॥
नमस्काराञ्जपेद् दक्षोऽवरोहाऽऽरोहणेन च ।
द्वि-षट्पद्मेषु सर्वेऽमी, नमस्काराश्च पिण्डिताः ॥ ७१ ॥
विश्वकल्याणदाः सन्ति, ह्यष्टोत्तरशतप्रमाः ।
कृत्स्नकर्मारिसंतानं, घ्नन्तो विश्वशुभावहाः ॥ ७२ ॥
जाप्येन कमलाख्येनानेन योगी लभेत भोः ।
भुञ्जानोऽप्युपवासस्य, कर्मणां निर्जरां पराम् ॥ ७३ ॥
अपराजितमन्त्रोऽयं, विश्वमन्त्राग्रिमो महान् ।
निरौपम्यो जगत्ख्यातो, जगद्वन्द्यो जगद्धितः ॥ ७४ ॥
अनेन मन्त्रवज्रेण, हता दुःकर्मपर्वताः ।
शतखण्डं क्रमाद् यान्ति, योगिनां मुक्तिरोधकाः ॥ ७५ ॥
महामन्त्रप्रभावेन, विघ्नजालान्यनन्तशः ।
दुष्टारि-नृप-चौरादिजानि नश्यन्ति तत्क्षणम् ॥ ७६ ॥

---

आ विधिए भालपद्ममां, मुखपद्ममां, कंठपद्ममां, हृदयकमलमां अने नाभिकमलमां नवनवी रीते उत्तम (?) एवा मंत्रने स्पष्ट स्थापन करवा (?) ॥ ७० ॥

कुशल मनुष्ये अवरोह अने आरोहपूर्वक नमस्कारनो जाप करवो। बार पद्मोमां आ बधा नमस्कारोनो समावेश थयेलो छे ॥ ७१ ॥

एक सो ने आठ संख्या प्रमाण नमस्कारो (नो जाप) जगतनुं कल्याण करनार, समस्त कर्मरूप शत्रुओनी परंपरानो नाश करनार अने सर्व शुभने लावनार थाय छे ॥ ७२ ॥

आवी रीते 'कमल' जापथी आ मंत्रनो जाप करतो योगी पुरुष उपवासी न होवा छतां उपवासनुं फळ मेळवे छे; अने कर्मनी उत्तम निर्जरा करे[1] छे ॥ ७३ ॥

आ 'अपराजित' मंत्र सघळा मंत्रोमां प्रथम छे, महान् छे, अनुपम छे, जगतमां प्रसिद्ध छे, जगत (ना पुरुषो) ने वंदनीय छे अने जगतनुं हित साधनारो छे ॥ ७४ ॥

आ मंत्ररूप वज्र वडे, योगीओने मुक्तिमार्गमां रोध करनार दुष्कर्मरूप पर्वतो भेदाई जतां क्रमशः सैंकडो टुकडाने पामे छे (अर्थात् कर्मोना चूरेचूरा थई जाय छे) ॥ ७५ ॥

आ महामंत्रना प्रभावथी दुष्ट, शत्रु, राजा अने चोरथी उत्पन्न थयेल अनन्त प्रकारनां विघ्नोनी जाळो तत्क्षण नाश पामी जाय छे ॥ ७६ ॥

---

१. शा० श्लो० ४७ ।

ग्रह-व्यन्तर-शाकिन्यादयो दुष्टाश्च निर्जराः ।
सन्मन्त्रजपनेनाहो, कर्तुं नोपद्रवं क्षमाः ॥ ७७ ॥
सतां मन्त्रमहाशक्त्या, नागा व्याघ्रा गजादयः ।
कीलिता इव जायन्ते, चोपसर्गा अनेकशः ॥ ७८ ॥
दुःसाध्याः सकला रोगाः, कुष्ठ-शूलादयोऽशुभाः ।
क्षणाद् यान्ति क्षयं पुंसां, मन्त्रध्यानमहौषधात् ॥ ७९ ॥
मन्त्रजाप्याम्बुभिः सिक्ताः, शाम्यन्ति वह्नयोऽखिलाः ।
जल-स्थलभयाः सर्वे, विलीयन्तेऽस्य शक्तितः ॥ ८० ॥
अनेन मन्त्रयोगेन, महापापकलङ्किताः ।
शुद्धयन्ति जन्तवः क्रूरास्त्यजन्ति क्रूरतां परे ॥ ८१ ॥
सप्तव्यसनसंसक्ता, अञ्जनाद्याश्च तस्कराः ।
प्राप्य मित्रमिमं मृत्यौ, तत्पुण्येन दिवं गताः ॥ ८२ ॥
जिनशासनमध्येऽयं, सारो मन्त्राधिपो महान् ।
उद्धारः सर्वपूर्वाणां, तत्त्वानां तत्त्वमुत्तमम् ॥ ८३ ॥
किमत्र बहुभिः प्रोक्तैर्मन्त्रराजप्रसादतः ।
ध्यानिनां जायते मुक्तिः, का वार्ता परवस्तुषु ॥ ८४ ॥

---

आ सन्मंत्रनो जाप करवाथी, खरेखर ग्रहो, व्यंतरो, शाकिनीओ वगेरे अने दुष्ट देवताओ उपद्रव करवाने शक्तिमान थता नथी ॥ ७७ ॥

आ मंत्रनी महाशक्तिथी संत पुरुषोने सर्पो, वाघो अने हाथीओ वगेरे; तेमज अनेक प्रकारना उपसर्गो जाणे कीलित कर्या होय एवा बनी जाय छे ॥ ७८ ॥

मनुष्योना दुःसाध्य एवा कोढ, शूल वगेरे सर्व अशुभ रोगो आ मंत्रना ध्यानरूप औषधथी तरतमां क्षय पामी जाय छे ॥ ७९ ॥

समग्र प्रकारना अग्निओ आ मंत्रना जापरूप पाणीथी सिंचातां शमी जाय छे अने जल तेम ज स्थलना सघळा भयो आ मंत्रनी शक्तिथी नाश पामे छे ॥ ८० ॥

महापापथी कलंकित थयेलां प्राणीओ आ मंत्रनो योग थवाथी शुद्ध एटले पवित्र बनी जाय छे अने क्रूर प्राणीओ पण तेमनुं घातकीपणुं छोडी दे छे ॥ ८१ ॥

साते व्यसनमां डूबेला एवा अंजन वगेरे चोरोए पण मृत्युकाले आ मंत्ररूप मित्रने पामीने तेना पुण्यथी ज स्वर्गने प्राप्त कर्युं ॥ ८२ ॥

जिनशासनमां आ (मंत्र) सारभूत महान् मंत्रराज छे; समस्त पूर्वोना उद्धार स्वरूप छे अने तत्त्वोमां उत्तम तत्त्व छे ॥ ८३ ॥

अहीं बहु कहेवाथी शुं ? (वस्तुतः) आ मंत्रराजनी कृपाथी ध्यानी पुरुषोने मुक्ति आवी मळे छे त्यारे बीजी वस्तुओ मळे एमां आश्चर्य ज शुं छे ? ॥ ८४ ॥

विज्ञायेति सुखे दुःखे, पथि दुर्गे रणे स्थितौ।
आसने शयने स्थाने, रोगक्लेशादिके सति ॥ ८५ ॥

सर्वावस्थासु सर्वत्र, महामन्त्रः शिवार्थिभिः।
जपनीयोऽथवा ध्येयो, न मोक्तव्यो क्वचिद्धृदः ॥ ८६ ॥

वाचो वा विश्वकार्याणां, सिद्धयेऽत्र परत्र च।
तथासंख्या विधेयास्य, सहस्र-लक्ष-कोटिभिः ॥ ८७ ॥

"णमो अरहंताणं, णमो सिद्धाणं, णमो आइ(य)रियाणं,
णमो उवज्झायाणं, णमो लोए सव्वसाहूणं ॥"

पञ्चसद्गुरुनामोत्थां षोडशाक्षरभूषिताम्।
महाविद्यां जगद्विद्यां, स्मर सर्वार्थसिद्धिदाम् ॥ ८८ ॥

अस्याः शतद्वयं ध्यानी, जपेत् तल्लीनमानसः।
अनिच्छन्नप्यवाप्नोत्युपवासपरं फलम् ॥ ८९ ॥

" अर्हत्-सिद्धाचार्योपाध्यायसर्वसाधुभ्यो नमः ॥"

---

ए प्रमाणे जाणीने सुखमां, दुःखमां, मार्गमां, पर्वतमां, युद्धस्थानमां, बेसवामां, शयनस्थानमां अने रोग तेमज कलह आवी पडे त्यारे—सघळी अवस्थामां अने सघळे स्थळे मोक्षना अर्थीओए आ महामंत्रनो जाप करवो; अथवा आ (मंत्र)नुं ध्यान करवुं पण कदापि हृदयमांथी तेने दूर न करवो ॥ ८५-८६ ॥

आ लोक अने परलोकमां समस्त कार्यो अने वाणीनी सिद्धि माटे आ मंत्रनो हजार, लाख अने करोड संख्या प्रमाणनो जाप करवो ॥ ८७ ॥

ते मंत्र आ प्रकारे छे:—

**"णमो अरहंताणं, णमो सिद्धाणं, णमो आइ(य)रियाणं, णमो उवज्झायाणं, णमो लोए सव्वसाहूणं ॥"**

पांच सद्गुरुओना नामथी निष्पन्न थयेल जे सोळ अक्षरोथी शोभती 'महाविद्या' छे, ते सघळा अर्थनी सिद्धि आपनारी जगत्-विद्या छे, तेनुं तुं स्मरण कर ॥ ८८ ॥

आ (विद्या)मां एकाग्र मनवाळो ध्यानी पुरुष बसो वार आ विद्यानो जाप करे तो न इच्छवा छतांये उपवासनुं सुंदर फळ मेळवे छे[२] ॥ ८९ ॥

ते विद्या आ प्रकारे छे :—

**"अर्हत्-सिद्धाचार्योपाध्यायसर्वसाधुभ्यो नमः ॥"**

---

१. ज्ञा. श्लो. ४८। २. ज्ञा. श्लो. ४९।

विद्यां षड्वर्णसंयुक्तामर्हत्-सिद्धसुनामजाम् ।
तत्त्वभूतां जगत्सारां, जपन्तु ध्यानिनोऽनिशम् ॥ ९० ॥
ये जपन्ति त्रिशुद्ध्येमां, विद्यां त्रिशतसम्मिताम् ।
संवरेण समं तेषां, चतुर्थतपसः फलम् ॥ ९१ ॥
"अरहंत–सिद्ध ॥"
चतुर्वर्णमयं मन्त्रं, चतुर्वर्गैकसाधनम् ।
अर्हन्नामभवं विश्वज्येष्ठं जपन्तु धीधनाः ॥ ९२ ॥ (अरिहंत)
आदिमं चार्हतो नाम्नोऽकारं पञ्चशतप्रमम् ।
वरं जपेत् त्रिशुद्ध्या यः, स चतुर्थफलं श्रयेत् ॥ ९३ ॥
एतत् स्वल्पं फलं प्रोक्तं, शास्त्रे रुच्याश्रये सताम् ।
किन्त्वमीषां फलं सम्यक्, संवरो निर्जरा शिवम् ॥ ९४ ॥
पञ्चसद्गुरुनामाद्यक्षरोद्भूतां जगन्नुताम् ।
पञ्चवर्णमयीं सारां, महाविद्यां समुद्धृताम् ॥ ९५ ॥
बीजबुद्ध्या श्रुतस्कन्धाम्बुधेर्ध्यायन्तु सद्बुधाः ।
ह्रॉंकारादिमहापञ्चतत्त्वोँकारोपलक्षिताम् ॥ ९६ ॥

---

अरिहंत अने सिद्धनां सुंदर नामोमांथी उत्पन्न थयेली छ वर्णोवाळी विद्या तत्त्वभूत छे अने जगतमां सारभूत छे—तेनो ध्यानी पुरुषो सदा जाप करो ॥ ९० ॥

जे पुरुषो मन, वचन अने कायानी शुद्धिथी आ विद्यानो त्रणसो वार जाप करे छे, तेमने संवर थाय छे एटले आवतां कर्मो रोकाय छे अने साथे साथे उपवासतपनुं फळ मळे छे[1] ॥ ९१ ॥

ते विद्या आ प्रकारे छे—"अरहंत-सिद्ध ॥"

विश्वमां महान् एवो अर्हन् नाममांथी उत्पन्न थयेलो चार वर्णमय (अ रि हं त) मंत्र चार वर्ग (धर्म, अर्थ, काम अने मोक्ष) ने साधनारो छे, तेनो बुद्धिशाळी पुरुषो जाप करे[2] ॥ ९२ ॥

अर्हंत नामना आदि अकारनो (अरिहंत) मन, वचन अने कायानी शुद्धि वडे जे साधक पांचसो वार जाप करे छे ते एक उपवासनुं फळ मेळवे छे[3] ॥ ९३ ॥

सज्जन पुरुषोने रुचि उत्पन्न करवा माटे शास्त्रमां दर्शावेलुं आ स्वल्प फळ छे; परन्तु आ मंत्रोनुं वास्तविक फळ तो संवर, निर्जरा अने मोक्ष छे[4] ॥ ९४ ॥

जगते जेने नमस्कार कर्यो छे एवी, पांच सद्गुरुओना नामना प्रथम अक्षरोमांथी निष्पन्न थयेली अने सारभूत एवी (अ सि आ उ सा) पांच वर्णमयी महाविद्या, जेनो श्रुतस्कन्धरूप समुद्रमांथी बीज-बुद्धि लब्धिथी उद्धार करायेलो छे, तेनो विद्वान् पुरुषो जाप करो। ते विद्या ह्रॉंकार वगेरे (ह्रॉं ह्रीं ह्रूं ह्रौं ह्रः) पांच महातत्त्वो अने ॐकारथी उपलक्षित छे[5] ॥ ९५-९६ ॥

---

१. शा. श्लो. ५०। २. शा. श्लो. ५१। ३. शा. श्लो. ५३। ४. शा. श्लो. ५४। ५. शा. श्लो. ५५।

अनन्यशरणीभूय जपेद् यस्त्रिजगद्गुरुम् ।
इमां चतुःशतान्तं स, चतुर्थस्य फलं भजेत् ॥ ९७ ॥
अनया विद्यया पुंसां, जन्म-मृत्यु-ज[रा] द्रुतम् ।
हीयन्ते कर्मभिः सार्धं, ढौकन्ते शिवसम्पदः ॥ ९८ ॥
"ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा नमः ॥"
अर्हत्-सिद्ध-त्रिधासाधुधर्मान् केवलिभाषितान् ।
विश्वमाङ्गल्यकर्तृंश्च, विश्वलोकोत्तमान् परान् ॥ ९९ ॥
विश्वशरण्यभूतांश्च, ध्यायन्तु तत्पदार्थिनः ।
चतुरोऽत्र चतुर्मङ्गलाद्यैः पदैः परैः सदा ॥ १०० ॥
लोकोत्तमपदाः पूज्याः, शरण्याश्चार्हदादिकाः ।
एतद्ध्यानवतां ध्यानान्मङ्गलानि पदे पदे ॥ १०१ ॥
संपद्यन्तेऽत्र वाऽमुत्र, सम्पदस्त्रिजगद्भवाः ।
धर्मार्थकाम-मोक्षार्थाः, प्रणश्यन्त्यापदोऽखिलाः ॥ १०२ ॥
"चत्तारि मंगलं । अरिहंता मंगलं । सिद्धा मंगलं ।
साहू मंगलं । केवलिपण्णत्तो धम्मो मंगलं ।

---

जे मनुष्य त्रण जगत्‌ना गुरु श्रीअर्हंतना अनन्य शरणे जई ए विद्यानो चार सो बार जाप करे छे ते उपवासनुं फळ मेळवे छे ॥ ९७ ॥

आ विद्याथी मनुष्यनां कर्मोनी साथे ज जन्म, मृत्यु अने जरा (वृद्धावस्था) जलदीथी घटे छे अने ते शिवसंपत्तिने प्राप्त करे छे ॥ ९८ ॥

ते विद्या आ प्रकारे छे :—

"ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा नमः ॥"

विश्वनुं मंगल करनार, जगतना लोकोमां सर्वोत्तम अने जगतने शरण्यभूत एवा अरिहंत, सिद्ध त्रण प्रकारे (!) साधु अने केवली भगवंतोए उपदेशेल धर्म—ए चारेनुं 'चत्तारि मंगल' आदि उत्तम पदोथी ते पदवीना अर्थो मनुष्यो हंमेशां ध्यान करो ॥ ९९-१०० ॥

"ते (उपर्युक्त) अरिहंत वगेरे लोकोमां उत्तम पदवाळा छे, पूज्य छे अने शरण्यभूत छे," आ प्रकारे ध्यान करनाराओने तेमना ध्यानना प्रभावथी पगले पगले मंगल प्रगटे छे। त्रण जगतमां रहेली संपत्तिओ अने धर्म, अर्थ, काम अने मोक्षरूप पुरुषार्थो आलोक अने परलोकमां प्राप्त थाय छे; तथा सर्व आपत्तिओ नाश पामे छे[1] ॥ १०१-१०२ ॥

ते मंत्र आ प्रकारे छे :—

"चत्तारि मंगलं। अरिहंता मंगलं। सिद्धा मंगलं। साहू मंगलं। केवलिपण्णत्तो धम्मो मंगलं।"

---

१. आ. श्लो. ५७ ।

"चत्तारि लोगुत्तमा। अरिहंता लोगुत्तमा। सिद्धा लोगुत्तमा।
साहू लोगुत्तमा। केवलिपण्णत्तो धम्मो लोगुत्तमो।
"चत्तारि सरणं पवज्जामि। अरिहंते सरणं पवज्जामि। सिद्धे सरणं पवज्जामि।
साहू सरणं पवज्जामि। केवलिपण्णत्तं धम्मं सरणं पवज्जामि॥"

मुक्तेः सौधं द्रुतारोढुमिमां सोपानमालिकाम्।
अर्हत्-सिद्ध-सयोगिश्रीकेवल्यक्षरसंभवाम्॥ १०३॥

आद्योंकारमयीं सारां, विद्यां ध्यायन्तु योगिनः।
त्रयोदश (पंचदश) सुवर्णाढ्यां, गुणस्थानगुणाप्तये॥ १०४॥

"ॐ अरिहंत सिद्ध सयोगिकेवली स्वाहा॥"

ॐकारभूषितं मन्त्रं ह्रींकाराङ्कितमुत्तमम्।
अर्हन्नामोभवं दक्षाश्चिन्तयन्तु शिवाप्तये॥ १०५॥

सकलज्ञानसाम्राज्यदानदक्षं च्युतोपमम्।
समस्तमन्त्ररत्नानां, चूडारत्नं सुखावहम्॥ १०६॥

"ॐ ह्रीँ अर्हँ नमः॥"

---

चत्तारि लोगुत्तमा। अरिहंता लोगुत्तमा। सिद्धा लोगुत्तमा। साहू लोगुत्तमा। केवलिपण्णत्तो धम्मो लोगुत्तमो।

चत्तारि सरणं पवज्जामि। अरिहंते सरणं पवज्जामि। सिद्धे सरणं पवज्जामि। साहू सरणं पवज्जामि। केवलिण्णत्तं धम्मं सरणं पवज्जामि॥"

अरिहंत, सिद्ध अने सयोगी केवलीना अक्षरोथी उत्पन्न थयेली, मुक्तिरूपी महेलनुं जलदीथी आरोहण करवा माटे पगथियांनी श्रेणि समान, पंदर सुंदर वर्णोथी शोभती अने जेनी आदिमां ॐकार छे तेवी सारभूत विद्यानुं योगिओ गुणस्थानकनी प्राप्ति माटे ध्यान करो[1]॥ १०३–१०४॥

ते विद्या आ प्रकारे छे:—"ॐ अरिहंत सिद्ध सयोगिकेवली स्वाहा॥"

ॐकारथी भूषित अने ह्रींकारथी अंकित तेमज 'अर्हन्' नाममांथी उत्पन्न थयेला उत्तम एवा मंत्रने चतुर पुरुषो मोक्षनी प्राप्ति माटे ध्यान करो॥ १०५॥

ए मंत्र सघळा ज्ञाननुं साम्राज्य आपवामां कुशळ, निरुपम, सुख लावनार अने समस्त मंत्ररत्नोमां चूडामणि (श्रेष्ठ) छे[2]॥ १०६॥

ते मंत्र आ प्रकारे छे:—"ॐ ह्रीँ अर्हँ नमः॥"

---

१. ज्ञा. श्लो. ५८। २. ज्ञा. श्लो. ६०।

कृत्स्नकर्मकलङ्कौघतमोविध्वंसभास्करम् ।
परं सिद्धनमस्कारजातं साक्षाच्छिवप्रदम् ॥ १०७ ॥
पञ्चवर्णमयं मन्त्रं विश्वविघ्नौघनाशनम् ।
दक्षाः स्मरन्तु मोक्षाय, जपन्तु वा निरन्तरम् ॥ १०८ ॥
"णमो सिद्धाणं ॥"
निर्दोषस्यार्हतो घातिघातिनः परमेष्ठिनः ।
प्राप्तानन्तगुणस्य श्रीमतः परमयोगिनः ॥ १०९ ॥
विदो जपन्तु मन्त्रेशं, विश्वक्लेशाग्निवार्मुचम् ।
भुक्ति-मुक्तिसुदातारं, त्रातारं भव्यदेहिनाम् ॥ ११० ॥
अनेन मन्त्रपुण्येन, त्रिजगन्नाथसंपदः ।
विश्वशर्माणि लभ्यन्ते, क्रमाच्छ्रीजिनभूतयः ॥ १११ ॥

"ॐ नमोऽर्हते केवलिने परमयोगिने अनन्तविशुद्धपरिणामविस्फुरच्छुक्लध्यानाग्निनिर्दग्धकर्मबीजाय प्राप्तानन्तचतुष्टयाय सौम्याय शान्ताय मङ्गलवरदाय अष्टादशदोषरहिताय स्वाहा ॥"

---

सर्व कर्म-कलंकना समूहरूप अंधकारनो नाश करवामां सूर्य समान, श्रेष्ठ, सिद्ध-नमस्कारथी उत्पन्न थयेल, साक्षात् शिवने आपनार अने सर्व विघ्नसमूहना नाशक एवा पांच वर्णवाळा मंत्रनुं चतुर पुरुषो मोक्षनी प्राप्ति माटे सदा स्मरण करो अथवा तेनो जाप करो ॥ १०७-१०८ ॥

ते मंत्र आ प्रकारे छे:—"**णमो सिद्धाणं ॥**"

घाती (चार कर्मो)नो नाश करनारा, निर्दोष, अनंत गुण(चतुष्टय)ने प्राप्त, (केवलज्ञानरूप) लक्ष्मीथी शोभता अने परमयोगी एवा श्री अरिहंत परमेष्ठिना मंत्रराजने सुज्ञ पुरुषो जपे[1] ए मंत्रराज समग्रक्लेशरूप अग्निने (शांत करवा) माटे मेघ समान, भुक्ति तेमज मुक्तिने आपनार अने भव्य जीवोनुं रक्षण करनार छे ॥ १०९-११० ॥

आ पवित्र मंत्र वडे त्रण जगतना नाथ श्री तीर्थंकर परमात्मानी संपत्तिओ अने सर्व सुखो क्रमशः प्राप्त थाय छे[2] ॥ १११ ॥

ते मंत्र आ प्रकारे छे:—"**ॐ नमोऽर्हते केवलिने परमयोगिने अनन्तविशुद्धपरिणामविस्फुरच्छुक्लध्यानाग्निनिर्दग्धकर्मबीजाय प्राप्तानन्तचतुष्टयाय सौम्याय शान्ताय मङ्गलवरदाय अष्टादशदोषरहिताय स्वाहा ॥**"

---

१. श्रा. श्लो. ६२ । २. श्रा. श्लो. ६३ ।

पूर्णेन्दुमण्डलाकारं, पुण्डरीकं मुखे स्मरन् ।
क्रमात् तदष्टपत्रेषु, वर्णांश्चाष्टौ पृथक् पृथक् ॥ ११२ ॥
ॐकारार्हन्नमस्कारजातांस्तत्कर्णिकोपरि ।
ज्योतिर्मयमिवात्यन्तदीप्रं ह्रींकारमूर्जितम् ॥ ११३ ॥
व्रजन्तं तालुरन्ध्रेण, तिष्ठन्तं भ्रूलतान्तरे ।
स्फुरन्तं चिन्तयाऽत्यर्थं, स्रवन्तममृताम्बुभिः ॥ ११४ ॥
अनेन मन्त्रपोतेन, सर्वविद्यागमाम्बुधेः ।
भवव्यसनपापाब्धेः प्राप्यते पारमुत्तमैः ॥ ११५ ॥
" ॐ नमो अरहंताणं ॥ " इमेऽष्टौ वर्णाः । " ह्रीं ॥ "
इमां विद्यां महादेवीं, ललाटे संस्थितां स्मृताम् ।
कल्याणकारिणीं पूतां, क्ष्वींकारजां शिवप्रदाम् ॥ ११६ ॥ " क्ष्वीं ॥ "
यदि साक्षात् त्वमुद्विग्नो, भवदुःखाग्नितापतः ।
तदा सप्ताक्षरं मन्त्रं, अर्हन्नामोद्भवं स्मर ॥ ११७ ॥
अनेनानादिमन्त्रेण, लभन्ते दृग्विभूषिताः ।
सर्वज्ञवैभवं विश्व-विजयं तद्गुणान् शिवम् ॥ ११८ ॥
" णमो अरहंताणं ॥ "

---

पूर्णचंद्रमंडलाकार अष्टदल कमळनुं मुखमां स्मरण करवुं । तेना आठ पत्रो पर क्रमशः 'ॐ नमो अरहंताणं' ए आठ वर्णो पृथक् पृथक् चिंतववा । तेनी कर्णिकामां ज्योतिर्मय, अत्यंत देदीप्यमान अने प्रभावशाळी ह्रींकारने चिंतववो । पछी ते ह्रींकार मुखकमलमांथी तालुरंध्रमां जाय छे, त्यांथी पसार थईने भ्रूमध्यमां स्थिर थईने प्रकाशे छे अने अमृतजलने स्रवे छे, एम चिंतववुं[1] ॥ ११२-११४ ॥

उत्तम पुरुषो आ मंत्ररूप नौका वडे सर्व विद्याओ अने आगमो रूप समुद्रना तथा संसारना संकटो अने पापोरूप समुद्रना पारने पामे छे[2] ॥ ११५ ॥

ते मंत्र आ प्रकारे छे :—" **ॐ नमो अरहंताणं** ॥ " ॥ ह्रीं ॥

आ क्ष्वींकारविद्यारूप महादेवीनुं ललाटमां स्मरण करवुं । ते क्ष्वींकारमांथी निष्पन्न, कल्याणकारिणी, पवित्र अने शिवप्रद छे[3] ॥ ११६ ॥

ते विद्या आ प्रकारे छे— " **क्ष्वीं** ॥ "

जो तुं खरेखर संसारमां दुःखरूपी अग्निना तापथी उद्विग्न थयो होय तो अर्हन् नाममांथी उत्पन्न थयेल सप्ताक्षर मंत्रनुं स्मरण कर ॥ ११७ ॥

आ अनादिमंत्र वडे सम्यग्दृष्टि महात्माओ सर्व पर विजय, सर्वज्ञनो वैभव, ते(सर्वज्ञ)ना गुणो अने शिवने प्राप्त करे छे ॥ ११८ ॥

ते मंत्र आ प्रकारे छे :—" **णमो अरहंताणं** ॥ "

---

१. शा. श्लो. ६४ । २. शा. श्लो. ७१ । ३. शा. श्लो. ८१ ।

प्रणवानाहतोद्भूतं, वर्णत्रयमयं परम् ।
नासाग्रे ध्यानिनो मन्त्रं, ध्यायन्तु शिवशर्मणे ॥ ११९ ॥
एतेनाऽद्भुतमन्त्रेण, ध्यानशुद्धिः परा भवेत् ।
आत्यन्तिकसुखं स्वात्मजं च सिद्धगुणाष्टकम् ॥ १२० ॥
"ॐ अर्हँ ॥"
ततो ध्यायेन्महाबीजं स्त्री (स्त्रीँ श्रीँ) कारं स्वमुखोदरे ।
विस्फुरन्तं जिनेन्द्रोक्तं, परं मन्त्रमयं शुभम् ॥ १२१ ॥ "स्त्रीँ" ॥ (श्रीँ ॥)
विद्यां स्वेष्टार्थसंदानकरां कल्पलतोपमाम् ।
श्रीवीरवदनोद्भूतां, ध्यायन्त्वचिन्त्यविक्रमाम् ॥ १२२ ॥
इमां विद्यां जपेद् योऽत्र, ध्यानलीनो निरन्तरम् ।
अणिमादिगुणान् लब्ध्वा, तरेच्छास्त्रार्णवं च सः ॥ १२३ ॥
अस्या निरन्तराभ्यासाद्, ध्यानी लभेत निश्चितम् ।
त्रिकालविषयं ज्ञानं, विश्वतत्त्वप्रदीपकम् ॥ १२४ ॥

---

प्रणव अने अनाहतथी उत्पन्न थयेल त्रण वर्णवाळा श्रेष्ठ मंत्रने मोक्षसुख माटे ध्यानी पुरुषो नासिकाना अग्रभाग पर दृष्टि × राखीने ध्यान करो ॥ ११९ ॥

आ अद्भुत मंत्र वडे ध्याननी परम शुद्धि, स्वात्मामां आत्यंतिक सुख अने सिद्धना आठ गुणो प्राप्त थाय छे[1] ॥ १२० ॥

ते मंत्र आ प्रकारे छे:—"ॐ अर्हँ ॥"

ते पछी पोताना मुखनी अंदर, जिनेश्वर भगवंते उपदेशेल, विशेष प्रकारे स्फुरायमान, श्रेष्ठ मंत्रमय अने शुभ एवा महाबीज स्त्रीँ (श्रीँ)कारनुं ध्यान करवुं जोईए[2] ॥ १२१ ॥

पोताना इच्छित अर्थनुं दान करवामां कल्पलता समान, श्री वीर भगवंतना मुखमांथी निकळेली अने अचिन्त्य सामर्थ्यवाळी आ विद्यानुं तमे ध्यान करो[3]। जे मनुष्य आ विद्यानो अहीं सदा ध्यानमग्न बनीने जाप करे छे, ते अणिमा वगेरे गुणो प्राप्त करे अने शास्त्ररूप समुद्रनो पार पामे[4]। आ विद्याना निरंतर अभ्यासथी ध्यानी पुरुष निश्चयथी सघळां तत्त्वोने प्रकाशित करवा माटे दीपक समान एवुं त्रणे काळना विषयनुं ज्ञान प्राप्त करे छे[5] ॥ १२२-१२४ ॥

---

× सरखावो : "द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलेऽम्बरे ।
संविद्दृशोः प्रशाम्यन्त्योः प्राणस्पन्दो निरुध्यते ॥"
—हठयोगप्रदीपिका पृ. १९० ॥

नासाया नासिकाया अग्रेऽग्रे भागे नासिकायां द्वादशाङ्गुलपर्यन्ते वा दत्ते प्रहिते ईक्षणे येन सः नासाग्रदत्तेक्षणः॥

१. ज्ञा. श्लो. ८७ । २. ज्ञा. श्लो. ९० । ३. ज्ञा. श्लो. ९१ । ४. ज्ञा. श्लो. ९२ । ५. ज्ञा. श्लो. ९३ ।

"ॐ जोगे मग्गे तत्त्वे भूये भवे भविस्से अक्खे जिनपार्श्वे स्वाहा ॥
ॐ ह्रीँ अर्हँ नमो अरिहंताणं ह्रीँ नमः ॥"
दिक्पत्राष्टकसंपूर्णे, कमले मध्यसंस्थितम् ।
ध्यायेदात्मानमत्यन्तं, स्फुरद्ग्रीष्मार्कभास्करम् ॥ १२५ ॥
ॐकारार्हन्नमस्कारांश्चाष्टौ वर्णान् विचिन्तयेत् ।
क्रमात् पूर्वादिपत्रेषु, वर्णैकैकं प्रदक्षिणम् ॥ १२६ ॥
स्वीकृत्य पूर्वदिक्पत्रं, पूर्वदिक्सम्मुखस्थितः ।
जपेदष्टाक्षरं मन्त्रं, एकादशशतप्रमम् ॥ १२७ ॥
प्रत्यहं प्रतिपत्रेषु, पूर्वादिदिक्ष्वनुक्रमात् ।
अष्टरात्रं स्मरेद् ध्यानी, तं मन्त्रं निर्मलाशयम् ॥ १२८ ॥
अस्याचिन्त्यप्रभावेन, शाम्यन्ति क्रूरजन्तवः ।
सिंहसर्पादयः सर्वे, हरित्रस्ता गजा इव ॥ १२९ ॥
"ॐ नमो अरिहंताणं ॥"

---

ते विद्या आ प्रकारे छे—"**ॐ जोगे मग्गे तत्त्वे भूये भवे भविस्से अक्खे जिनपार्श्वे स्वाहा ॥ ॐ ह्रीँ अर्हँ नमो अरिहताणं ह्रीँ नमः ॥**"

(आठ) दिशाओना आठ पत्रोथी परिपूर्ण एवा कमलना मध्यभागमां ग्रीष्म ऋतुना अत्यंत स्फुरायमान सूर्य जेवा आत्मानुं ध्यान करवुं । ते (पद्म) नां पूर्व आदि दिशानां पत्रोमां, ॐकारपूर्वक अर्हन् नमस्कार (ॐ नमो अरिहंताणं)ना आठ वर्णोमांना प्रत्येक वर्णनुं क्रमशः प्रदक्षिणामां चिंतन करवुं[2] । पूर्व दिशामां मुख करीने बेसवुं । पूर्व दिशाना पत्रमां आठ अक्षरना मंत्रनो अगियारसो संख्या प्रमाण जाप करवो[3] । ध्यानी पुरुषे पूर्व आदि दिशाना प्रत्येक पत्रमां अनुक्रमे एक एक दिवस एम आठ रात्रि सुधी ते निर्मल आशय(अर्थ)वाळा मंत्रनुं ध्यान करवुं जोईए । आ (मंत्र)ना अचिन्त्य प्रभावथी, जेम सिंहथी हाथीओ भयभीत बने छे तेम सिंह, सर्प वगेरे सघळां क्रूर प्राणीओ शान्त बने छे[5]. ॥ १२५-१२९ ॥

ते मंत्र आ प्रकारे छे—"**ॐ नमो अरिहंताणं ॥**"

---

१. शा. श्लो. ९५ । २. शा. श्लो. ९६ । ३. शा. श्लो. ९७ ।
४. शा. श्लो. ९८ । ५. शा. श्लो. ९९ ।

इत्येतद् ध्यानमाधाय, पूर्वं विघ्नौघशान्तये ।
पश्चात् सप्ताक्षरं मन्त्रं, जपेदोंकारवर्जितम् ॥ १३० ॥
मन्त्र ॐकारपूर्वोऽयं, विश्वाभीष्टार्थसिद्धिदः ।
एकोऽप्यनेककार्यार्थं, मुक्त्यर्थं प्रणवोज्झितम् ॥ १३१ ॥
"णमो अरिहंताणं ॥"
चतुर्विंशतितीर्थेशनमस्कारोद्भवं परम् ।
स्मर मन्त्रं जिनेन्द्रादिपददं जन्मघातकम् ॥ १३२ ॥
"श्रीमद्वृषभादि-वर्धमानान्तेभ्यो नमः ॥"
सुनिष्कम्पं मनः कृत्वा, पापारातिनिकन्दिनीम् ।
जिनेन्द्रमुखजां विद्यां, महतीं पापभक्षिणीम् ॥ १३३ ॥
विश्वविद्यासु (?) सिद्धान्तदानदक्षां जगन्नुताम् ।
ध्यायन्तु प्रत्यहं धीरा, अर्हन्मुखाब्जवासिनीम् ॥ १३४ ॥
मुनेरस्याः प्रभावेन, पापपङ्कः प्रलीयते ।
चेतः प्रशान्तिमायाति, विज्ञानं जायते परम् ॥ १३५ ॥

---

विघ्नोना समूहनी शान्ति माटे पहेलां आ रीतनुं (उपर्युक्त मंत्रनुं) ध्यान करीने, ते पछी ॐकारथी रहित एवा सात अक्षरना मंत्रनो जाप करवो[1] ॥ १३० ॥

सघळी इच्छित वस्तुओनी सिद्धिने आपनारो ॐकारपूर्वकनो आ एक ज मंत्र अनेक कार्यो माटे थाय छे। मुक्तिने माटे ॐकारथी रहित (एवा आ ज मंत्र) नुं ध्यान करवुं ॥ १३१ ॥

ते मंत्र आ रीते छे[2] — "**णमो अरिहंताणं ॥**"

चोवीश तीर्थंकरोना नमस्कारथी उत्पन्न थयेल श्रेष्ठ मंत्र, जे तीर्थंकर आदि पदवीने आपनारो छे अने जन्मनो नाश करनारो छे, तेनुं तुं स्मरण कर[3] ॥ १३२ ॥

ते मंत्र आ प्रकारे छे—"**श्रीमद्वृषभादि-वर्धमानान्तेभ्यो नमः ॥**"

मनने सारी रीते निश्चळ बनावीने पापरूपी शत्रुनां मूळने ऊखेडी नाखनारी अने श्रीजिनेन्द्रना मुखथी नीकळेली आ महान पापभक्षिणी महाविद्या छे[4]। ते सिद्धान्तनुं दान करवामां प्रवीण, जगतना मनुष्यो वडे नमस्कृत अने अरिहंत भगवंतना मुखरूपी कमळमां रहेनारी छे। तेनुं, हे धीर मनुष्यो! तमे सदा ध्यान करो ॥ १३३-१३४ ॥

आ(विद्या)ना प्रभावथी मुनिनो पापरूप मळ नाश पामे छे; तेनुं चित्त शांत बने छे अने तेने श्रेष्ठ एवुं विज्ञान प्राप्त थाय छे ॥ १३५ ॥

---

१. ज्ञा. श्लो. १०१ । २. ज्ञा. श्लो. १०२ । ३. ज्ञा. श्लो. १०३ । ४. ज्ञा. श्लो. १०४ ।

"ॐ अर्हन्मुखकमलवासिनि! पापात्मक्षयङ्करि! श्रुतज्वालासहस्रप्रज्वलिते! सरस्वति! मत्पापं हन हन दह दह क्षाँ क्षीँ क्षूँ क्षौँ क्षः क्षीरवरधवले! अमृतसंभवे! पापभक्षिणि! वँ वँ हूँ हूँ स्वाहा॥"

संजयन्तादियोगीन्द्रैः सिद्धचक्रमनेकधा।
भुक्ति-मुक्तेर्निधानं यद्, विद्यावादात् समुद्धृतम्॥ १३६॥
तद्ध्यान्तु बुधा मुक्त्यै, सर्वविघ्नादिनाशनम्।
तस्य प्रयोजकं शास्त्रं, ज्ञात्वा गुरूपदेशतः॥ १३७॥ "सिद्धचक्रम्"॥
स्मर मन्त्रपदाधीशमर्हन्नामाक्षराभिधम्।
'अ'वर्णं नाभिपद्मे त्वं, मोक्षमार्गप्रदीपकम्॥ १३८॥
'सि'वर्णं मस्तकाम्भोजे, 'सा'कारं च मुखाम्बुजे।
'आ'कारं कण्ठकञ्जे हि, 'चो+'कारं हृत्सरोरुहे॥ १३९॥
एष मन्त्रमहाराजोऽर्हदाद्यक्षरोद्भवः।
पञ्चवर्णमयोऽनेकाभीष्टदोऽनिष्टशान्तिकृत्॥ १४०॥
"अ सि आ उ सा॥"

---

ते विद्या आ प्रकारे छे:—"ॐ अर्हन्मुखकमलवासिनि! पापात्मक्षयङ्करि! श्रुतज्वालासहस्रप्रज्वलिते! सरस्वति! मत्पापं हन हन दह दह क्षाँ क्षीँ क्षूँ क्षौँ क्षः क्षीरवरधवले! अमृतसंभवे! पापभक्षिणि! वँ वँ हूँ हूँ स्वाहा॥"

संजयन्त आदि योगीन्द्रोए विद्याप्रवाद (पूर्व) मांथी भुक्ति अने मुक्तिना निधानरूप श्री सिद्धचक्रनो अनेक प्रकारे उद्धार कर्यो छे, ते सर्व विघ्नोनो नाश करनार छे तेथी तेना प्रयोजक शास्त्रनुं ज्ञान गुरु उपदेशथी जाणीने हे बुद्धिमान पुरुषो! तमे मुक्तिने माटे तेनुं ध्यान करो॥ १३६-१३७॥

एतस्य द्वितयस्यापि, ध्यानमेवाग्रकारणम् ॥ २१७ ॥

ध्यानस्य च पुनर्मुख्यो, हेतुरेतच्चतुष्टयम् ।
गुरूपदेशः श्रद्धानं, सदाभ्यासः स्थिरं मनः ॥ २१८ ॥

× × × ×

रत्नत्रयमुपादाय, त्यक्त्वा बन्धनिबन्धनम् ।
ध्यानमभ्यस्यतां नित्यं, यदि योगिन् मुमुक्षसे ॥ २२३ ॥

ध्यानाभ्यासप्रकर्षेण, त्रुटयन्मोहस्य योगिनः ।
चरमाङ्गस्य मुक्तिः स्यात्, तदाऽन्यस्य च क्रमात् ॥ २२४ ॥

---

भुजा-मुख-नेत्रोनी संख्या, क्रूर तथा शांतभाव, वर्ण, स्पर्श, स्वर, अवस्था, वस्त्र, आभूषण, आयुध वगेरे अने बीजुं जे कांई मंत्रशास्त्रादिमां शांत तथा क्रूर कर्ममाटे कह्युं छे ते बधुं ध्याननुं साधन समजवुं ॥ २१३-२१६ ॥

जे कंई इहलौकिक फळ छे अने जे कंई पारलौकिक फळ छे, ते बंनेनुं मुख्य कारण ध्यान ज छे ॥ २१७ ॥

**ध्यानना मुख्य चार हेतुओ—**

ध्यानना आ चार मुख्य हेतुओ छे—गुरुनो उपदेश, श्रद्धा, सदा अभ्यास अने स्थिर मन ॥ २१८ ॥

× × × ×

**ध्यानाभ्यास माटे प्रेरणा—**

हे योगिन् ! जो तने मुक्त थवानी इच्छा होय तो कर्मबंधना (परिग्रहादि) कारणोनो त्याग करीने अने रत्नत्रयनो अंगीकार करीने तुं सदा ध्याननो अभ्यास कर ॥ २२३ ॥

**ध्यानमां फळो—**

ध्यानाभ्यासनी उत्तरोत्तर वृद्धि थवाथी नाश पामी रह्यो छे मोह जेनो एवो योगी जो ते चरमशरीरी होय तो ते ज भवमां तेनो मोक्ष थाय छे, बीजानी क्रमशः (थोडाक भवोमां) मुक्ति थाय छे ॥ २२४ ॥

तथा ह्यचरमाङ्गस्य, ध्यानमभ्यस्यतः सदा ।
निर्जरा संवरश्च स्यात्, सकलाऽशुभकर्मणाम् ॥ २२५ ॥

आश्रवन्ति च पुण्यानि, प्रचुराणि प्रतिक्षणम् ।
यैर्महर्द्धिर्भवत्येष, त्रिदशः कल्पवासिषु ॥ २२६ ॥

तत्र सर्वेन्द्रियामोदि, मनसः प्रीणनं परम् ।
सुखामृतं पिबन्नास्ते, सुचिरं सुरसेवितः ॥ २२७ ॥

ततोऽवतीर्य मर्त्येऽपि, चक्रवर्त्यादिसम्पदः ।
चिरं भुक्त्वा स्वयं मुक्त्वा, दीक्षां दैगम्बरीं श्रितः ॥ २२८ ॥

वज्रकायः स हि ध्यात्वा, शुक्लध्यानं चतुर्विधम् ।
विधूयाष्टापि कर्माणि, श्रयते मोक्षमक्षयम् ॥ २२९ ॥

× × × ×

सारश्चतुष्टयेऽप्यस्मिन्, मोक्षः सद्ध्यानपूर्वकः ।
इति मत्वा मया किञ्चिद्ध्यानमेव प्रपञ्चितम् ॥ २५२ ॥

यद्यप्यत्यन्तगम्भीरमभूमिर्मादृशामिदम् ।
प्रावर्तिषि तथाप्यत्र, ध्यानभक्तिप्रचोदितः ॥ २५३ ॥

---

**अचरमशरीरीने प्राप्त थतां ध्यानां फळो—**

अचरमशरीरीनी मुक्ति आ रीते थाय छे:—सदा ध्याननो अभ्यास करता अचरमशरीरी योगीने सर्व अशुभ कर्मोनी निर्जरा अने संवर थाय छे; अने प्रतिक्षण तेवा प्रचुरपुण्यकर्मोनो आश्रव थाय छे के जेमना उदयथी ते भवांतरमां कल्पवासी देवोमां महर्द्धिक देव थाय छे। त्यां (स्वर्गमां) सर्व इन्द्रियोने आल्हादक तथा मनने प्रसन्नता आपनार एवा श्रेष्ठ सुखरूप अमृतनुं पान करतो अने चिरकाल सुधी देवोथी सेवातो ते सुखेथी रहे छे। ते पछी त्यांथी च्यवीने मर्त्य लोकमां पण चक्रवर्ति आदि पदोनी संपत्तिओने लांबा काळ सुधी भोगवीने पोते ज (वैराग्यथी) छोडी दे छे अने दीक्षाने अंगीकार करे छे। ते काळे वज्रऋषभनाराच संघयणवाळो ते चार प्रकारनां शुक्लध्यानने आराधीने अने तेथी आठे प्रकारनां कर्मोनो नाश करीने अंते अक्षय एवा मोक्षने पामे छे ॥ २२५-२२९ ॥

× × × ×

'आ ग्रंथमां चार सारभूत तत्त्वो कह्यां छे—बंध, बंधना हेतुओ, मोक्ष अने मोक्षना हेतुओ। ए बधामां पण सारभूत मोक्ष छे। ते प्रशस्त ध्यानपूर्वक ज होय छे,' एम समजीने आ ग्रंथमां में ध्याननुं ज कंईक वर्णन कर्युं छे ॥ २५२ ॥

जो के आ ध्यानविषय अत्यंत गंभीर छे, मारा जेवानी तेमां पहोंच नथी, छतां पण केवळ ध्यानपरनी भक्तिथी प्रेरायेला में अहीं प्रयत्न कर्यो छे ॥ २५३ ॥

यदत्र स्खलितं, किञ्चिच्छाद्मस्थ्यादर्थशब्दयोः ।
तन्मे भक्तिप्रधानस्य क्षमतां श्रुतदेवता ॥ २५४ ॥
वस्तुयाथात्म्यविज्ञानश्रद्धानध्यानसम्पदः ।
भवन्तु भव्यसत्त्वानां, स्वस्वरूपोपलब्धये ॥ २५५ ॥

× × × ×

जिनेन्द्राः सद्ध्यानज्वलनहुतघातिप्रकृतयः,
प्रसिद्धाः सिद्धाश्च प्रहततमसः सिद्धिनिलयाः ।
सदाचार्या वर्याः सकलसदुपाध्यायमुनयः,
पुनन्तु स्वान्तं नस्त्रिजगदधिकाः पञ्च गुरवः ॥ २५८ ॥
देहज्योतिषि यस्य मज्जति जगद्दुग्धाम्बुराशाविव,
ज्ञानज्योतिषि च स्फुरत्यतितरां ॐभूर्भुवः-स्वस्त्रयी ।
शब्दज्योतिषि यस्य दर्पण इव स्वार्थाश्चकासत्यमी,
स श्रीमानमरार्चितो जिनपति-र्ज्योतिस्त्रयायाऽस्तु नः ॥ २५९ ॥

---

छद्मस्थताना कारणे अहीं शब्दोमां के अर्थमां जे कांई स्खलन थयुं होय तेनी भक्तिप्रधान एवा मने श्रुतदेवता क्षमा आपे ॥ २५४ ॥

भव्य जीवोने स्वस्वरूपनी प्राप्ति माटे यथार्थ विज्ञान, यथार्थ श्रद्धान अने यथार्थ ध्यानरूप संपत्तिओ प्राप्त थाओ ॥ २५५ ॥

× × ×

जेओए शुक्लध्यानरूप दावानलमां चार घातिकर्मनी प्रकृतिओने होमी दीधी छे एवा **अरिहंत भगवंतो**; जेओए अज्ञानांधकारनो नाश कर्यो छे तथा जेमनुं निवासस्थान सिद्धिगति छे, एवा प्रसिद्ध **सिद्ध भगवंतो**; श्रेष्ठ एवा **आचार्य भगवंतो**; पूज्य एवा **उपाध्याय भगवंतो** अने **साधु भगवंतो** रूप पांच गुरुओ त्रणे लोकमां श्रेष्ठ छे । तेओ सौना हृदयने पवित्र करो ॥ २५८ ॥

जेमनी ' देहज्योतिमां ' जगत् जाणे क्षीरसमुद्रमां मज्जन करतुं होय एवुं देखाय छे, जेमनी ' ज्ञान-ज्योतिमां ' पृथ्वी, पाताल अने स्वर्गरूप त्रयी अत्यंत स्पष्ट रीते प्रकाशे छे अने जेमनी ' शब्दज्योतिमां ' (पांत्रीश गुणयुक्त वाणीमां) आ सर्व अर्थो दर्पणमां चमके तेम चळके छे ते अंतरंग-अनंत ज्ञानादि अने बहिरंगसमवसरणादिलक्ष्मीथी युक्त अने देवेन्द्रोथी पण पूजाएला एवा श्रीजिनपति अमारा ज्योतित्रय—(देह-ज्ञान-शब्द-ज्योति) माटे थाओ ॥ २५९ ॥

## परिचय

श्रीमान् नागसेनाचार्यप्रणीत ' तत्त्वानुशासन ' ए ध्यानविषयनो अद्भुत ग्रंथ छे । प्रत्येक ध्यानना अभ्यासी माटे तेनुं अवलोकन अत्यंत आवश्यक छे । अमारा तरफथी (जैनसाहित्यविकास मंडळ तरफथी) ए ग्रंथ अनुवाद साथे पूर्वे प्रगट थएल छे । ए ग्रंथमांथी अमे अहीं प्रस्तुत ग्रंथने योग्य ' संदर्भ ' तारव्यो छे । आ बधुं वर्णन सामान्यतः व्यवहार-ध्याननुं छे । ए ग्रंथमां निश्चय-आत्मालंबन ध्याननुं पण *सुंदर वर्णन छे । ग्रंथकारनी अद्भुत प्रतिभाशक्तिने ग्रंथ स्वयं कही आपे छे । ए ग्रंथनी शैली उत्तम छे ।*

# [७१-२६]

## श्रीचन्द्रतिलकोपाध्यायरचितः श्रीअभयकुमारचरित-संदर्भः

(क)

परमेष्ठिन एतेऽत्रार्हन्तः सिद्धाश्च सूरयः ।
उपाध्याया मुनिश्रेष्ठा इति पञ्च भवन्त्यहो ! ॥ ३६ ॥
अर्हन्तः प्रातिहार्याद्यां, पूजामर्हन्ति तामिति ।
विख्याता अरिहन्तारः, कर्मारिहननात् पुनः ॥ ३७ ॥
तथा भवन्त्यरुहन्तः, कर्मबीजौघदाहतः ।
सर्वकर्मक्षयात् सिद्धाः, पञ्चदशभिदा इति ॥ ३८ ॥
स्त्रीस्वान्यगृहिलिङ्गैकतीर्थतीर्थकरेतर—
पुंषण्ढानेकप्रत्येकस्वयंबुद्धान्यबोधिताः ॥ ३९ ॥
ज्ञान-दर्शन-चारित्र-तपो-वीर्यस्वरूपकैः ।
आचारैः पञ्चभिर्युक्ता, आचार्या अनुयोगिनः ॥ ४० ॥
उपाध्यायाः सदा शिष्यस्वाध्यायाध्ययनोद्यताः ।
क्रियासमुदयैर्मोक्षं, साधयन्तश्च साधवः ॥ ४१ ॥

---

### अनुवाद

अहीं अरिहंतो, सिद्धो, आचार्यो, उपाध्यायो अने मुनिवरो ए पांच परमेष्ठीओ छे ॥ ३६ ॥

प्रातिहार्य वगेरे पूजाने योग्य होवाथी 'अर्हन्त' कहेवाय छे अथवा कर्मरूप शत्रुने हणनारा होवाथी 'अरिहंत' नामे विख्यात छे तथा कर्मबीजोना समूहने बाळी नाखेल होवाथी तेओ 'अरुहन्त' पण कहेवाय छे। सकल कर्मोनो क्षय करवाथी 'सिद्धो' कहेवाय छे। तेओ पंदर प्रकारे छे ॥ ३७-३८ ॥

ते पंदर भेद आ प्रकारे छेः—

१ स्वलिंगसिद्ध, २ अन्यलिंगसिद्ध, ३ गृहिलिंगसिद्ध, ४ तीर्थसिद्ध, ५ अतीर्थसिद्ध, ६ एकसिद्ध, ७ अनेकसिद्ध, ८ तीर्थंकरसिद्ध, ९ अतीर्थंकरसिद्ध, १० पुंलिंगसिद्ध, ११ स्त्रीलिंगसिद्ध, १२ नपुंसकलिंगसिद्ध, १३ स्वयंबुद्धसिद्ध, १४ बुद्धबोधितसिद्ध अने १५ प्रत्येकबुद्धसिद्ध ॥ ३९ ॥

आचार्यो ज्ञान, दर्शन, चारित्र, तप अने वीर्यरूप पांच आचारोथी युक्त अने आगम ग्रंथोनो अनुयोग (व्याख्यानादि) करनारा होय छे ॥ ४० ॥

शिष्योने स्वाध्याय कराववामां अने पोताना अध्ययनमां सदा उद्यमशील होवाथी 'उपाध्यायो' कहेवाय छे, अने क्रिया समूहो (विविध प्रकारनी क्रियाओ) वडे मोक्षने साधनारा 'साधुओ' कहेवाय छे ॥ ४१ ॥

दिवा रात्रौ सुखे दुःखे, शोके हर्षे गृहे बहिः ।
क्षुधि तृप्तौ गमे स्थाने, ध्यातव्याः परमेष्ठिनः ॥ ४२ ॥

परमेष्ठिनमस्कारः, सारः सद्धर्मकर्मसु ।
नवनीतं यथा दध्नि, कवित्वे च यथा ध्वनिः ॥ ४३ ॥

भावसारं स्मृतादस्माज्ज्वलनोऽपि जलायते ।
मालायते भुजङ्गोऽपि, विषमप्यमृतायते ॥ ४४ ॥

हारायते कृपाणोऽपि, सिंहोऽपि हरिणायते ।
मित्रायते सपत्नोऽपि, दुर्जनः सज्जनायते ॥ ४५ ॥

अरण्यानि गृहाणीव, स्वश्चौरा अपि रक्षकाः ।
क्रूरा अपि ग्रहाः सानुग्रहाः क्षिप्रं भवन्ति च ॥ ४६ ॥

जनयन्ति सुशकुनफलं कुशकुना अपि ।
दुःस्वप्ना अपि सुस्वप्ना, इव स्युरचिरादपि ॥ ४७ ॥

जनन्य इव शाकिन्यो, वात्सल्यं दधतेतराम् ।
कराला अपि वेताला, जायन्ते जनका इव ॥ ४८ ॥

दुर्मन्त्र-तन्त्र-यन्त्रादिप्रयोगः प्रभवेन्न च ।
कियद् घूका विजृम्भते, सहस्रकिरणोदये ॥ ४९ ॥

---

दिवसे के रात्रे, सुखमां के दुःखमां, शोकमां के हर्षमां, घरमां के बहार, भूखमां के तृप्तिमां, गमनमां के स्थानमां (स्थिरतामां) परमेष्ठीओनुं ध्यान करवुं जोईए ॥ ४२ ॥

जेम दहीमां माखण अने कवितामां ध्वनि सारभूत छे तेम जिनोक्त धर्मानुष्ठानोमां परमेष्ठि-नमस्कार सारभूत छे ॥ ४३ ॥

श्रेष्ठ भावपूर्वक पंचपरमेष्ठि नमस्कार महामंत्रनुं स्मरण करवाथी अग्नि जल बनी जाय छे, साप पण पुष्पनी माळा बनी जाय छे अने विष पण अमृत बनी जाय छे, कृपाण पण हाररूप बनी जाय छे, सिंह पण हरण बनी जाय छे, शत्रु पण मित्र बनी जाय छे, दुर्जन पण सज्जन बनी जाय छे, अरण्यो पण गृहो बनी जाय छे, चोरो पण रक्षक बनी जाय छे, क्रूर एवा ग्रहो पण शीघ्रतः अनुग्रह करनारा बनी जाय छे, खराब शकुनो पण सारां शकुनो जेवुं फळ आपे छे, दुष्ट स्वप्नो पण सारां स्वप्नो जेवा तत्क्षण बनी जाय छे, शाकिनीओ पण अत्यंत वात्सल्यभाव बतावनारी माता जेवी बनी जाय छे, विकराळ वेतालो पण पिता जेवा (प्रेमाळ) बनी जाय छे अने दुष्ट मंत्रो, तंत्रो अने यंत्रो वगेरेना प्रयोगो पण असमर्थ बनी जाय छे। सूर्यनो उदय थया पछी घूवडो क्यां सुधी क्रीडा करी शके ? ॥ ४४–४९ ॥

अत एव महामन्त्र, एषः स्मर्येत कोविदैः ।
जागरे शयने स्थाने, गमने स्खलने क्षुते ॥ ५० ॥
इह लोकेऽर्थ-कामाद्या, नमस्कारप्रभावतः ।
परत्र सत्कुलोत्पत्तिः, स्वर्गः सिद्धिश्च जायते ॥ ५१॥

एथी ज पंडित पुरुषो जागृत स्थितिमां अने शयनकाले, स्थिरतामां अने गमनमां, स्खलनमां अने छींक पछी आ महामंत्रनुं स्मरण करे छे ॥ ५० ॥

नमस्कारना प्रभावथी आ लोकमां अर्थ, काम वगेरेनी प्राप्ति अने परलोकमां उच्चकुलमां जन्म वगेरे तथा स्वर्ग अथवा मोक्षनी प्राप्ति थाय छे ॥ ५१ ॥

### परिचय

श्रीचन्द्रतिलक उपाध्याये रचेला 'श्रीअभयकुमारचरित' ना सर्ग ११, पृ० ६४४–६४६ मांथी पंचपरमेष्ठी संबंधी आ संदर्भ तारवीने तेने अनुवाद साथे अहीं प्रगट कर्यो छे।

श्रीचन्द्रतिलक उपा० श्रीजिनेश्वरसूरिना शिष्य हता, तेमणे ९०३६ श्लोक प्रमाणनो 'श्री अभय-कुमारचरित' ग्रंथ वि सं० १३१२ मां रच्यो हतो।

आ संदर्भमां पांच परमेष्ठीओनो महिमा अने तेमनी आराधनानुं फल दर्शाव्युं छे।

## श्रीरत्नमण्डनगणिविरचितः सुकृतसागरसंदर्भः

(ख)

मन्त्रः पञ्चनमस्कारः, कल्पकारस्कराधिकः ।
अस्ति प्रत्यक्षराष्ट्राग्रोत्कृष्टविद्यासहस्रकः ॥ ७६ ॥
चौरो मित्रमहिर्माला, वह्निर्वारि जलं स्थलम् ।
कान्तारं नगरं सिंहः, शृगालो यत्प्रभावतः ॥ ७७ ॥

### अनुवाद

पंचनमस्कार-मंत्र कल्पवृक्षथी अधिक (प्रभाववाळो) छे। तेना प्रत्येक अक्षर उपर एक हजार ने आठ महा-विद्याओ रहेली छे, तेना प्रभावथी चोर मित्र बने छे, सर्प माला बने छे, अग्नि जल बने छे, जल स्थल बने छे, अटवी नगर बने छे अने सिंह शियाळ बने छे ॥ ७६-७७ ॥

लोकद्विष्टप्रियावश्यघातकादेः स्मृतोऽपि यः ।
मोहनोच्चाटनाकृष्टिकार्मणस्तम्भनादिकृत् ॥ ७८ ॥
दूरयत्यापदः सर्वाः, पूरयत्यत्र कामनाः ।
राज्य-स्वर्गापवर्गांस्तु, ध्यातो योऽमुत्र यच्छति ॥ ७९ ॥
श्रीपार्श्वप्रतिमापूजाधूपोत्क्षेपादिपूर्वकम् ।
तमेकाग्रमनाः पूतवपुर्वस्त्रोऽनिशं जपेत् ॥ ८० ॥

ते (पंच-नमस्कार-मंत्र) स्मरणमात्रथी पण लोक, द्वेषी, प्रिया (स्त्री), वशमां करवा योग्य अने घातक मारनार वगेरेविशे अनुक्रमे मोहन (मोह पमाडवुं), उच्चाटन (उखेडी नाखवुं), आकर्षण (खेंचवुं), कामण (वश करवुं), अने स्तंभन (थंभावी देवुं) वगेरे करनार थाय छे ॥ ७८ ॥

(सारी रीते) ध्यान करायेलो (पंच—नमस्कार मंत्र) आ लोकमां सर्व आपदाओने दूर करे छे तथा सर्व कामनाओने पूर्ण करे छे, तथा जे परलोकमां राज्य, स्वर्ग अने मोक्ष आपे छे ॥ ७९ ॥

ते मंत्रनो श्री पार्श्वनाथ भगवाननी प्रतिमानी पूजा तथा धूपोत्क्षेपादिपूर्वक, पवित्र शरीर अने वस्त्र वडे तथा मननी एकाग्रता वडे तुं निरंतर जाप कर ॥ ८० ॥

## परिचय

आ संदर्भ 'सुकृत-सागर' अपर नाम 'पेथडचरित्र'ना पञ्चम तरङ्ग पृष्ठ ३१ परथी लेवामां आव्यो छे। आ ग्रन्थ श्री आत्मानंद जैन सभा, भावनगरथी वि. सं. १९७१ मां प्रकाशित थयो छे। तेना ग्रन्थना कर्ता श्रीसोमसुन्दरसूरिना शिष्य श्रीरत्नमण्डनगणि छे। तेओ विक्रमनी पंदरमी शताब्दिमां थयेल छे। 'जल्प-कल्पलता' नामनो तेमनो कवित्वपूर्ण ग्रन्थ सुप्रसिद्ध छे। आ संदर्भमां नवकारनो महिमा वर्णव्यो छे अने विविध प्रकारना उपद्रवो आ नवकारना स्मरणथी शमी जाय छे तेम जणाव्युं छे।



# श्रीवर्धमानसूरिविरचितः
# आचारदिनकरसंदर्भः

(ग)

(उपजाति-वृत्तम्)

अर्हन्त ईशाः सकलाश्च सिद्धा, आचार्यवर्या अपि पाठकेन्द्राः ।
मुनीश्वराः सर्व-समीहितानि, कुर्वन्तु रत्नत्रय-युक्तिभाजः ॥ १ ॥

(शार्दूलविक्रीडित-वृत्तम्)

विश्वाग्र-स्थितिशालिनः समुदयासंयुक्त-सन्मानसा-
नानारूप-विचित्र-चित्र-चरिताः सन्त्रासितान्तर्द्विषः ।
सर्वाध्व-प्रतिभासनैक-कुशलाः सर्वैर्नताः सर्वदा,
श्रीमत्तीर्थकरा भवन्तु भविनां व्यामोह-विच्छित्तये ॥ २ ॥

(वसन्ततिलका-वृत्तम्)

यद्दीर्घकाल-सुनिकाचित-बन्धबद्ध-,
मष्टात्मकं विषम-चारमभेद्य-कर्म ।
तत्सन्निहत्य परमं पदमापि यैस्ते,
सिद्धा दिशन्तु महतीमिह कार्यसिद्धिम् ॥ ३ ॥

---

## अनुवाद

रत्नत्रयनी सम्यक्तताने धारण करनारा ऐश्वर्यशाली अरिहंतो, सर्व सिद्धो, आचार्यवर्यो, उपाध्यायो अने मुनीश्वरो सौनी बधी अभिलाषाओ (पूर्ण) करो ॥ १ ॥

(विशिष्ट प्रकारना तथाभव्यत्वना कारणे आ) विश्वमां सर्वदा उत्तम स्थितिथी शोभता, सर्व जीवोना परम हितने विषे पोताना सुंदर मानसने जोडनारा, नाना प्रकारना चित्रविचित्र चरित्रवाळा, आन्तरशत्रुओने सारी रीते त्रास पमाडनारा, (मोक्षना) बधा मार्गोने (योगोने) प्रकाशित करवामां अद्वितीय कुशल, सर्व जीवो वडे नमन करायेला अने सर्व इच्छितने आपनारा एवा **तीर्थंकरो** भव्य-प्राणीओना मोहनो विच्छेद करनारा थाओ ॥ २ ॥

लांबी स्थितिवाळा, अत्यन्त निकाचित (गाढ) बन्धथी बंधायेला, विषम विपाकवाळा अने दुर्भेद्य एवा आठे प्रकारना कर्मोनो सारी रीते नाश करीने जेमणे परम-पद(मुक्ति)ने प्राप्त कर्युं ते **सिद्धो** अहीं महान् कार्यसिद्धि आपो ॥ ३ ॥

(शार्दूलविक्रीडित-वृत्तम्)

विश्वस्मिन्नपि विष्टपे दिनकरीभूतं महातेजसा,
यैरर्हद्भिरितेषु तेषु नियतं मोहान्धकारं महत् ।
जातं तत्र च दीपतामविकलां प्रापुः प्रकाशोद्गमा-
दाचार्याः प्रथयन्तु ते तनुभृतामात्म-प्रबोधोदयम् ॥ ४ ॥

(उपजाति-वृत्तम्)

पाषाण-तुल्योऽपि नरो यदीयप्रसाद-लेशाल्लभते सपर्याम् ।
जगद्धितः पाठक-संचयः स कल्याणमालां वितनोत्वभीक्ष्णाम् ॥ ५ ॥

(वसन्ततिलका-वृत्तम्)

संसारनीरधिमवेत्य दुरन्तमेव,
यैः संयमाख्य-वहनं प्रतिपन्नमाशु ।
ते साधकाः शिवपदस्य जिनाभिषेके (?),
साधुव्रता विरचयन्तु महाप्रबोधम् ॥ ६ ॥

---

समग्र विश्वमां महान् तेजवडे सूर्यरूपे थईने रहेला एवा तीर्थंकरोना निर्वाण पछी महान् मोहान्धकार फेलाई गयो, ते वखते जेओ प्रकाशना उद्गमथी अखंड दीपकपणाने पाम्या, ते **आचार्यो** प्राणीओना आत्मज्ञानना विकासनो विस्तार करो ॥ ४ ॥

जेमनी कृपाना लेशथी पत्थर समान पुरुष पण पूजाने प्राप्त करे छे, ते जगतनुं हित करनार **उपाध्याय-वर्ग** निरंतर कल्याणनी परंपरानो विस्तार करो ॥ ५ ॥

'संसार समुद्र दुःखे करीने पार पामी शकाय एवो छे', एम जाणीने जेमणे चारित्ररूपी वहाणने शीघ्र अंगीकार कर्युं, ते शिवपदना साधक **मुनिवरो** (?) महाप्रबोधनी रचना करो ॥ ६ ॥

## परिचय

आचार्य श्री वर्धमानसूरिविरचित 'आचार-दिनकर' (प्रका० : खरतरगच्छ ग्रन्थमाला पुष्प २, पांजरापोळ, लालबाग, मुंबई–४; मुद्रक : निर्णयसागर प्रेस, मुंबई–२) नामक ग्रंथना द्वितीय विभागना पृष्ठ १५९ परथी आ श्लोको तारववामां आव्या छे।

# श्रीरत्नमंदिरगणिविरचितः
# उपदेशतरङ्गिण्यान्तर्गतः संदर्भः

(घ)

विमुच्य निद्रां चरमे त्रियामा-यामार्धभागे शुचिमानसेन ।
दुष्कर्मरक्षोदमनैकदक्षो ध्येयस्त्रिधा श्रीपरमेष्ठिमन्त्रः ॥ १ ॥

किमत्र मन्त्रौषधि-मूलिकाभिः, किं गारुड-स्वर्ग-मणीन्द्रजालैः ।
स्फुरन्ति चित्ते यदि मन्त्रराज-पदानि कल्याण-पद-प्रदानि ॥ २ ॥

श्रीमन्नमस्कार-पदानि सर्व-सिद्धान्तसाराणि नवापि नूनम् ।
आद्यानि पञ्चातिमहान्ति तेषु, मुख्यं महाध्येयमिहामनन्ति ॥ ३ ॥

पञ्चतायाः क्षणे पञ्च, रत्नानि परमेष्ठिनाम् ।
आस्ये ददा(धा)ति यस्तस्य, सद्गतिः स्याद् भवान्तरे ॥ ४ ॥

---

## अनुवाद

रात्रिना छेल्ला प्रहरनो अर्धभाग बाकी रहे त्यारे निद्राने छोडीने दुष्ट-कर्मरूपी राक्षसनुं दमन करवामां अत्यन्त चतुर एवा श्री परमेष्ठिमंत्रनुं पवित्र मनवाळा थईने मन-वचन-कायाथी ध्यान करवुं जोईए ॥ १ ॥

जो चित्तने विषे कल्याणनां पदने आपनारां पंच-परमेष्ठि-नमस्कार रूपी मंत्रराजनां पदो स्फुरायमान छे, तो पछी मंत्र अने औषधिओनां मूळो वडे के गारुड (मरकत) मणि, चिंतामणि के इन्द्रजालोनुं शुं काम छे? ॥ २ ॥

श्री नमस्कारनां नवे पदो खरेखर सर्व सिद्धान्तमां सारभूत छे। तेमां पहेलां पांच पदो अति-महान् छे अने तेमां पण मुख्य पहेला पदने सत्पुरुषो महाध्येय तरीके स्वीकारे छे[१] ॥ ३ ॥

मरणना क्षणे पांच परमेष्ठिरूपी पांच रत्नोने जे मुखने विषे धारण करे छे, तेनी भवान्तरने विषे सद्गति थाय छे ॥ ४ ॥

---

१ छेल्ला बे चरणनो बीजो अर्थ—तेमां पण प्रथम पांच पदो अति महान् छे। कारण के विद्वानो तेमने प्रधान ध्येय तरीके माने छे।

पञ्चादौ यत्पदानि त्रिभुवनपतिभिर्व्याहृता पञ्चतीर्थी,
तीर्थान्येवाष्टषष्टिर्जिनसमय-रहस्यानि यस्याक्षराणि ।
यस्याष्टौ सम्पदश्चानुपममतमहासिद्धयोऽद्धैत शक्ति-
र्जीयाल्लोकद्धयस्याभिलषित-फलदः 'श्रीनमस्कारमन्त्रः' ॥ ५ ॥
भोअणसमए सयणे, विबोहणे पवेसणे भए वसणे ।
पंच-नमुक्कारं खलु, समरिज्जा सव्वकालं पि ॥ ६ ॥
याताः प्रयान्ति यास्यन्ति, पारं संसार-वारिधेः ।
परमेष्ठि-नमस्कारं, स्मारं स्मारं घना जनाः ॥ ७ ॥
स्वस्यैकच्छत्रतां विश्वे, पापानि विमृशन्तु मा ।
अघमर्षण-मन्त्रेऽस्मिन्, सति श्रीजिन-शासने ॥ ८ ॥
सिंहेनेव मदान्ध-गन्धकरिणो मित्रांशुनेव क्षपा-
ध्वान्तौघो विधुनेव तापततयः कल्पद्रुणेवाधयः ।
तार्क्ष्येणेव फणाभृतो घनकदम्बेनेव दावाग्नयः,
सत्त्वानां परमेष्ठिमन्त्रमहसा वल्गान्ति नोपद्रवाः ॥ ९ ॥

---

जेनां पहेलां पांच पदोने त्रैलोक्यपति श्रीतीर्थंकर देवोए पंचतीर्थी* तरीके कह्यां छे, जेना जिनसिद्धान्तनां रहस्य-सारभूत एवा अडसठ अक्षरोने अडसठ तीर्थो तरीके वखाण्यां छे, जेनी आठ संपदाओने अत्यन्त अनुपम एवी आठ सिद्धिओ तरीके वर्णवेली छे, जेनी शक्तिनी जगतमां जोड नथी अने जे बन्ने लोकने विषे इच्छित फल आपनार छे ते श्री नमस्कारमंत्र जय पामो ॥ ५ ॥

भोजन समय, शयन समय, जागवानो समय, प्रवेश समय, भय समय, संकट समय, वगेरे सर्व समये पंच-नमस्कारनुं अवश्य स्मरण करो ॥ ६ ॥

परमेष्ठि-नमस्कारने वारंवार स्मरण करीने घणा लोको संसार-सागरना पारने पाम्या छे, पामे छे अने पामशे ॥ ७ ॥

श्री जिनशासनने विषे पापनो नाश करनार आ मंत्र विद्यमान छते "विश्वमां पोतानी एक छत्रता छे" एम पापो—दुष्कर्मो कदी पण न विचारे—(न माने)! ॥ ८ ॥

सिंहथी जेम मदोन्मत्त गन्धहस्तिओ, सूर्यथी जेम रात्रिसंबंधी अंधकारना समूहो, चन्द्रथी जेम ताप-संतापनी परंपराओ, कल्पवृक्षथी जेम मननी चिंताओ, गरुडथी जेम फणीधर-विषधरो अने मेघ-समुदायथी जेम दावानलो शान्त थाय छे, तेम श्री-पंच-परमेष्ठि-मंत्रनां तेजथी प्राणिओना उपद्रवो नाश पामे छे ॥ ९ ॥

---

* अरिहंतना आद्य अक्षर '**अ**' थी **अष्टापदतीर्थ**, सिद्धना आद्य अक्षर 'सि' थी **सिद्धाचल**, आचार्यना आद्य अक्षर '**आ**' थी **आबूजी**, उपाध्यायना आद्य अक्षर 'उ' थी **उज्जयन्त** (गिरनारजी) अने साधुना आद्य अक्षर 'स' थी **सम्मेतशिखर**, ए रीते पांच तीर्थो लई शकाय ।

सङ्ग्राम-सागर-करीन्द्र-भुजङ्ग-सिंह-
दुर्व्याधि-वह्नि-रिपु-बन्धन-सम्भवानि ।
चौर-ग्रह-भ्रम-निशाचर-शाकिनीनां,
नश्यन्ति पञ्च-परमेष्ठि-पदैर्भयानि ॥ १० ॥

ध्यातोऽपि पापशमनः परमेष्ठि-मन्त्रः,
किं स्यात्तपःप्रबलितो विधिनार्चितश्च ।
दुग्धं स्वयं हि मधुरं क्वथितं तु युक्त्या,
सम्मिश्रितं च सितया वसुधा-सुधेव ॥ ११ ॥

आकृष्टिं सुर-सम्पदां विदधती मुक्ति-श्रियो वश्यता-
मुच्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम् ।
स्तम्भं दुर्गमनं प्रति प्रयततां मोहस्य सम्मोहनम् ,
पायात् पञ्च-नमस्क्रियाक्षरमयी साराधना देवता ॥ १२ ॥

यो लक्षं जिनबद्ध-लक्ष्य-सुमनाः सुव्यक्त-वर्णक्रमः,
श्रद्धावान् विजितेन्द्रियो भवहरं मन्त्रं जपेच्छ्रावकः ।
पुष्पैः श्वेत-सुगन्धिभिश्च विधिना लक्ष-प्रमाणैर्जिनं,
यः सम्पूजयते स विश्वमहितः श्रीतीर्थराजो भवेत् ॥ १३ ॥

---

पंच-परमेष्ठिनां पदोवडे रण-संग्राम, सागर, हाथी, सर्प, सिंह, दुष्टव्याधि, अग्नि, शत्रु अने बंधनथी उत्पन्न तथा चोर, ग्रह, भ्रम, राक्षस अने शाकिनीथी थनारां भयो नाश पामे छे ॥ १० ॥

परमेष्ठि-मंत्र स्मरण करवा मात्रथी पापने शमावनारो थाय छे, तो पछी तपथी प्रबल करायेलो अने विधिथी पूजायेलो (आ मंत्र) शुं न करे? दूध पोतानी मेळे ज मधुर छे, पण युक्तिथी उकाळेलुं अने साकरथी मिश्रित करेलुं होय तो ते पृथ्वीना अमृत-तुल्य बने छे ॥ ११ ॥

ते पंच-परमेष्ठि-नमस्क्रियाना अक्षर स्वरूप आराधना देवता (तमारुं) रक्षण करो के जे सुर-संपदाओनुं आकर्षण छे, मुक्तिरूपी लक्ष्मीनुं वशीकरण करे छे, संसारनी चार गतिओमां रहेली विपदाओनुं उच्चाटन करे छे, आत्माना पापोनुं विद्वेषण करे छे, दुर्गतिमां जवा माटे प्रयत्न करता जीवोनुं स्तम्भन करे छे अने मोहनुं संमोहन करे छे ॥ १२ ॥

श्री जिनेश्वरमां दृढ थयुं छे लक्ष्य (ध्यान) जेनुं एवो अने एथी पवित्र मनवाळो, सुस्पष्ट वर्णक्रम-(वर्णोच्चार)वाळो, श्रद्धावान् अने जितेन्द्रिय एवो जे श्रावक संसारनो नाश करनार आ (पंच-परमेष्ठी) मंत्रनो जाप करे छे अने श्वेत सुगन्धी एक लाख पुष्पोवडे श्री जिनेश्वरनी विधिपूर्वक सम्यक् प्रकारे पूजा करे छे, ते विश्वपूज्य तीर्थंकर बने छे ॥ १३ ॥

**स्वस्थाने पूर्णमुच्चारं, मार्गे चार्धं समाचरेत् ।**
**पादमाकस्मिकातङ्के, स्मृतिमात्रं मरणान्तिके ॥ १४ ॥**

---

पोतानां स्थाने होय त्यारे पूर्ण-उच्चार पूर्वक, मार्गमां होय त्यारे अर्ध-उच्चारपूर्वक, अकस्मात् आतंक एटले तीव्र रोग अथवा वेदना थई आवे त्यारे चोथा भागना उच्चारपूर्वक अने मरण नजीक होय त्यारे केवल मानसिक स्मरण वडे नवकार गणवो जोईए ॥ १४ ॥

## परिचय

आ संदर्भ 'उपदेशतरंगिणी' नामक ग्रन्थमांथी लेवामां आव्यो छे। आ ग्रन्थ श्रीयशोविजय ग्रन्थमाला, बनारसथी वीर सं० २४३७ मां प्रकट थयेल छे। तेमां पृष्ठ १४६-१४७ पर आ संदर्भ 'नमस्कार स्मरणा' रूपे आपेल छे।

आ ग्रन्थना कर्ता श्रीसोमसुंदरसूरिना शिष्य श्रीनन्दिरत्नगणिना शिष्य श्रीरत्नमंदिरगणि छे। भोजप्रबन्ध नामनो तेमनो ग्रंथ प्रसिद्ध छे अने तेमां तेमनो जीवन समय सोळमी शताब्दि होवानो उल्लेख छे।

# श्रीविजयवर्णिविरचित- 'मन्त्रसारसमुच्चयापरनाम-ब्रह्मविद्याविधि-' ग्रन्थादर्हदादिबीजस्वरूपसंदर्भः ॥ *

(च)

ह्रींकारस्वरूपम्—

सान्तान्तं रेफमारूढं, चतुर्थस्वरयोजितम् ।
नाद-बिन्दु-कलोपेतं, धर्म-कामार्थसाधनम् ॥ १ ॥
नादो विश्वात्मकः प्रोक्तो, बिन्दुः स्यादुत्तमं पदम् ।
कलापीयूषनिःष्यन्दीत्याहुरेवं जिनोत्तमाः ॥ २ ॥
नाद-बिन्दु-कलायुक्तं, पूर्णचन्द्रकलाधरम् ।
त्वनुस्वारं भवेद् बिन्दुः, त्वर्धमात्रं विशेषतः ॥ ३ ॥

हृल्लेखा। लोकराजः। जगदधिपः। लोकपतिः। भुवनेश्वरी। माया। त्रिदेहम्। तत्त्वम्। शक्तिः। शक्तिप्रणवमित्यादि ॥ ह्रीँ ॥

---

* आ संदर्भनो अनुवाद आपेल नथी।

ॐकारस्वरूपम्—

त्रयोदशस्वरं तच्च, सर्वतत्त्वप्रकाशकम् ।
पूर्णचन्द्रेण संयुक्तं, प्रणवं सर्वसाधनम् ॥ ४ ॥

अन्यच्च—

स्मरदुःखानलज्वालाप्रशान्त्यै नवनीरदम् ।
प्रणवं वाङ्मयज्ञानप्रदीपं पुण्यशासनम् ॥ ५ ॥

तारः । तेजः । वामः । विनयः । सर्वात्मबीजम् ॥ प्रणवमित्यादि ॥ ॐ ॥

× × ×

अर्हँस्वरूपम्—

अथ मन्त्रपदाधीशं, सर्वतत्त्वैकनायकम् ।
आदि-मध्यान्तभेदेन, स्वर-व्यञ्जनसम्भवम् ॥ ६ ॥
अकारादि-हकारान्तं, रेफमध्यं सबिन्दुकम् ।
तदेव परमं तत्त्वं, यो जानाति स तत्त्ववित् ॥ ७ ॥
बुद्धः कैश्चिदजः कैश्चिद्धरिः कैश्चिन्महेश्वरः ।
शिवः सार्वस्तथेशानः, सोऽयं वर्णः प्रकीर्तितः ॥ ८ ॥

× × ×

सर्वात्मकं महातारं, सर्वज्ञं सर्वशक्तिकम् ।
सर्वमन्त्रमुखं ध्यायेत्, समर्थं सर्वशक्तिकम्(दम्) ॥ ९ ॥

× × ×

अर्हद्बीजं महापिण्डं, संजडा (? ज्ञाना)क्षरमुत्तमम् ।
बीजाक्षरं तत् सर्वं, सिद्धारिर्नैव शोधयेत् ॥ १० ॥

× × ×

आत्मनः विशुद्धिपरिणामार्थं पूज्यपूजार्थं वा । यथापूर्वं चारपञ्चोपचाराणि कार्याणि । प्रणवध्यानं सर्वात्मकमित्यादि ॥

कोमलकदलीपत्रं, स्फटिकं बालार्कहेमनीलाभम् ।
पञ्चपरमेष्ठिवर्णं, क्रमेण भव्यभवनाशनम् ॥ ११ ॥

इति प्रणवभक्तिः ॥

## परिचय

आ संदर्भ श्री जैनसिद्धान्त भवन, आरा नी प्रति 'मन्त्रसारसमुच्चयापरनाम ब्रह्मविद्याविधि' मां थी लेवामां आव्यो छे ।

# श्रीरत्नचन्द्रगणिविरचितः मातृकाप्रकरणसंदर्भः ।

(छ)

अर्हन्तोऽजा अथाचार्या उपाध्याया मुनीश्वराः ।
मिलित्वा यत्र राजन्ते, तद् 'ॐ'कारपदे मुदा ( दं मतम् )
अ अ आ उ म् ॥ (२७२) ॥ १ ॥

बीजं[1]-मूलं[2]-शिखा[3]कात्स्न्य[4]मेकक-त्रि-त्रि-पञ्चभिः ।
अक्षरैः 'ॐ नमः सिद्धं', जपानन्तफलैः(लं) क्रमात् ॥
ॐ १ । ॐ नमः २ । ॐ सिद्धम् ३ । ॐ नमः सिद्धम् ४
ॐ इत्यनुवर्तते ॥ २ ॥

नन्ता हन्त ! भवत्येको भवत्येकश्च शंसिता ।
शंसिता लभते कामान्, नन्ता लभति वा न वा ॥ ३ ॥

---

## अनुवाद

अरिहंत, अज, आचार्य, उपाध्याय अने मुनि ए पांचे ज्यां सम्मिलित रीते शोभे छे, तेने विद्वानो ॐकार पद कहे छे। (पांचे नामोना प्रथम अक्षरोनी संधि थी ॐकार निष्पन्न थाय छे) ॥ १ ॥

'ॐ नमः सिद्धम्' ए मंत्रमां त्रण पद छे। पहेलुं पद जे एकाक्षर ॐ ते प्रणव छे अने ते मंत्रनुं 'बीज' छे। पहेलुं अने बीजुं पद 'ॐ नमः' त्रण अक्षरवाळुं छे ते मंत्रनुं 'मूल' छे अने त्रीजुं पद 'ॐ सिद्धम्' पण त्रण अक्षरवाळुं छे ते मंत्रनी 'शिखा' छे; आखो सळंग अथवा संपूर्ण मंत्र 'ॐ नमः सिद्धम्' पांच अक्षरनो छे। ए प्रमाणे अक्षरना विभागथी अनुक्रमे चार प्रकारे जो मंत्रनो जाप थाय तो ते अनन्त फल आपनार थाय छे ॥ २ ॥[1]

एक नमे छे अने बीजो प्रशंसा (अनुमोदना) करे छे, प्रशंसक इच्छित वस्तुने अवश्य पामे छे; नमनार पामे अथवा न पामे ! ॥ ३ ॥

---

१ चारो के मंत्रनो १२५०० संख्या प्रमाण जाप करवानो होय तो पहेलां 'बीज' एटले केवल ॐकारनो १२५०० संख्या प्रमाण जाप करवो; पछी 'मूल' एटले 'ॐ नमः' नो १२५०० संख्या प्रमाण जाप करवो पछी 'शिखा' एटले 'ॐ सिद्धम्' नो १२५०० संख्या प्रमाण जाप करवो अने अंते संपूर्ण मंत्र 'ॐ नमः सिद्धम्' नो पण १२५०० संख्या प्रमाण जाप करवो। आ प्रमाणे जाप करवाथी प्रयास अने परिश्रम वधे पण फळ अनंतगुणुं थाय छे ॥ २ ॥

'हूँ' अर्हद् – धरणाचार्योपाध्याय-मुनिगोचरम् । ह् र् ऊ उ म् ।
सूर्युपाध्याय-मुनयः, स्पृशन्ति 'ॐ' कारमादरात् ॥ ऊ उ म् ॥ ४ ॥
'ऑं' जिनाऽजनुराचार्य - मुनितः प्रादुरस्तीह ॥ अ अ आ म् ।
अर्हद् - धरण - वाग्देव्यो 'ह्रीँ' कारस्य निबन्धनम् ॥ ह् र् ईँ ॥ ५ ॥
आद्युपान्त्यान्तिमार्हन्तो गीश्च 'अर्हं' पदमास्थिताः
(गीश्चा' ऽर्हँ 'पद - मास्थिताः) ।
ज्ञान - दर्शन - चारित्रमुक्तयो भान्ति तत्र वा ॥ अ र् हँ ॥ ६ ॥

---

बीजाक्षर 'हूँ'कारमां पांच वर्णो आ प्रमाणे छे – ह् + र् + ऊ + उ + म् — आ पांच अंशमांथी पहेला अंश 'ह' कारथी अर्हत् (अरिहंत), बीजा अंश 'र' कारथी धरण (धरणेन्द्र?) त्रीजा अंश 'ऊ'कारथी सूरि, चोथा अंश 'उ'कारथी उपाध्याय अने पांचमा अंश 'म' कारथी मुनिना अर्थने बतावे छे ॥

बीजाक्षर 'ॐ'कारमां सूरि आदिना त्रण वर्णो आ प्रमाणे छे—ऊ + उ + म्—आ त्रण अंशमांथी पहेला अंश 'ऊ'कारथी सूरि, बीजा अंश 'उ'कारथी उपाध्याय अने त्रीजा अंश 'म्'थी मुनि ॐकारने आदर पूर्वक स्पर्शे छे ॥ ४ ॥

बीजाक्षर 'ऑं'कारमां चार वर्णो आ प्रमाणे छे—अ + अ + आ + म् आ चार अंशमांथी पहेलो अंश 'अ' अरिहंतथी, बीजो अंश 'अ' अजनु अर्थात् सिद्धथी, त्रीजो अंश 'आ' आचार्यथी अने चोथो अंश 'म्' मुनि शब्दथी उत्पन्न थयेल छे।

बीजाक्षर 'ह्रीँ'कारमां त्रण वर्णो आ प्रमाणे छे—ह् + र् + ईँ—आ त्रण अंशमांथी पहेलो अंश 'ह्' अरिहंत'थी, बीजो अंश 'र्' धरण(धरणेन्द्र?)थी अने त्रीजो अंश 'ईँ' वाग्देवी एटले सरस्वतीथी निष्पन्न थाय छे ॥ ५ ॥

अर्हँ पदमां त्रण वर्णो आ प्रमाणे छे—अ + र् + हँ—आ त्रण अंशोमां आदि अंश 'अ', उपान्त्य अंश 'र्' अने अन्तिम अंश 'हँ'—ए त्रण अंशो मळीने बनेलो 'अर्हँ' अक्षर अरिहंतनो वाचक छे;[1] अने वाणी एटले वाङ्मय वर्णमाला ('अ' थी 'ह्' सुधीना वर्णो)नो वाचक छे[2]। अथवा ते पदमां प्रथम अंश 'अ' थी ज्ञान, 'र्' थी दर्शन अने 'ह्' थी चारित्र—ए त्रण रत्नो अने तेमनुं फल 'मुक्ति' शोभे छे, एम थाय छे ॥ ६ ॥

---

१ सिद्धहेमचन्द्रशब्दानुशासनमां श्रीहेमचन्द्रसूरिए प्रथम मंगलाचरणरुपे जे 'अर्हँ' सूत्र रच्युं छे तेनी व्याख्या करतां जे 'अर्हँ इत्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकम्' एम कह्युं छे। 'अर्हँ' ऊपर तेमणे पोते रचेला बृहन्न्यासमां सविस्तर निरूपण कर्युं छे, ते आ ग्रन्थमां ज अन्यत्र आपेलुं छे।

२ सरखावो :—"अक्खर आइ अयारं हयारमंतक्खरं च मज्झेण ।
मज्झे वण्णसमुच्चयरयणत्तयभूसियं अरहं ॥"— नवकारसारथवणं न. स्वा. प्राकृतविभाग.

अर्हँनो आद्य अक्षर 'अ' बाराखडीना प्रथमाक्षरने, 'ह्' बाराखडीना अंतिम अक्षरने अने 'र्' बाकीना वर्णोना समुच्चयने सूचवे छे। 'अर्हँ' थी सम्पूर्ण मातृका सूचवाय छे; अथवा संपूर्ण 'अर्हँ' रत्नत्रयथी शोभता अरिहंतने सूचवे छे।

अहम् एटले आत्मा, ए ज्यारे रेफ – रत्नत्रयीथी युक्त बने छे, त्यारे 'अर्हँ' कहेवाय छे।

'श्रीँ' कारे श्रुत-धरणौ पद्मावत्यृषयः परम्। श् र् ई म्।
'ह्रौँ' अर्हद्-धा(ध)रणाऽदेह-वाचकर्षिजमीरितम् ह् र् अ उ म्॥ ७॥
अर्हन्त-धरणाऽदेहैस्तपसा 'ह्रः' समाश्रितम्। ह् र् अ स्।
'हंसः' जिनाऽजनुर्योगी, श्रद्धा-श्रुत-तपांसि च॥ ह अ म् स् अ
'अत्यल्पमेतद् याक्षीयम्'॥ स्॥ ८॥

---

बीजाक्षर 'श्रीँ'कारमां चार वर्णो आ प्रमाणे छे— श्+र्+ई+म्—आ चार अंशोमांथी पहेलो अंश 'श्' श्रुतज्ञाननो, बीजो अंश 'र्' धरणेन्द्रनो, त्रीजो अंश 'ई' पद्मावतीनो अने चोथो अंश 'म्' मुनिनो वाचक छे।

बीजाक्षर 'ह्रौँ' कारमां पांच वर्णो आ प्रमाणे छे – ह+र्+अ+उ+म्–आ पांच अंशमांथी प्रथम अंश 'ह' अरिहंतनो, बीजो अंश 'र्' धरणेन्द्रनो (?), त्रीजो अंश 'अ' अदेह एटले सिद्धनो, चोथो अंश 'उ' उपाध्यायनो अने पांचमो अंश 'म्' मुनिनो वाचक छे, एम (विद्वानोए) कहेलुं छे॥ ७॥

बीजाक्षर 'ह्रः' मां चार वर्णो आ प्रमाणे छे—ह्+र्+अ+स्—आ चार अंशोमांथी प्रथम अंश 'ह्' अरिहंतवडे, बीजो अंश 'र्' धरणेन्द्रवडे (?), त्रीजो अंश 'अ' अदेह एटले सिद्धवडे अने चोथो अंश 'स्' (विसर्ग) तपवडे समाश्रित छे।

'हंसः' पदमां छ वर्णो आ प्रमाणे छे—ह्+अ+म्+स्+अ+स्—आ छ अंशोमांथी प्रथम अंश 'ह्' अरिहंतनो, बीजो अंश 'अ' 'सिद्धनो, त्रीजो अंश 'म्' मुनिनो, चोथो अंश 'स्' श्रद्धानो, पांचमो अंश 'अ' श्रुतज्ञाननो अने छठ्ठो अंश 'स्' (विसर्ग) तपस्नो वाचक छे॥

'आ अल्पाक्षरी यक्षोनी (संकेत) वाणी (?) छे'॥ ८॥

## परिचय

'मातृकाप्रकरण' नी एक ह० लि० प्रति पू० मु० श्रीयशोविजयजी म० पासेथी मळी हती, तेमां भाषाना संधिनियमो, छंद, वर्णप्रस्तार, उच्चारविधि वगेरे अनेक विषयोनो संग्रह करेलो छे. ते ग्रंथमां ज यक्षोनी अल्पाक्षरी संकेतविधि (?) आठ श्लोकमां दर्शावी छे, जे नमस्कार अने तेनां मंत्रबीजो उपर सुंदर प्रकाश पाथरे छे।

ए आठ श्लोकोनो संदर्भ अहीं अनुवाद साथे आप्यो छे।

आ मातृकाप्रकरणना कर्ता पायचंदगच्छीय श्रीरत्नचंद्रगणि छे, तेओ प्रायः सत्तरमा सैकामां थया हशे एवुं अनुमान छे।



श्रीमहावीरप्रभुः (कायोत्सर्गमुद्रायां)

[७२-२७]

# श्रीहेमचन्द्राचार्य-विरचितः
# अर्हन्नामसहस्रसमुच्चयः

अर्हं नामापि कर्णाभ्यां, शृण्वन् वाचा समुच्चरन् ।
जीवः पीवरपुण्यश्रीर्लभते फलमुत्तमम् ॥ १ ॥
अत एव प्रतिप्रातः, समुत्थाय मनीषिभिः ।
भक्त्याऽष्टाग्रसहस्राऽर्हन्नामोच्चारो विधीयते ॥ २ ॥
श्रीमानर्हन् जिनः स्वामी, स्वयम्भूः शम्भुरात्मभूः ।
स्वयंप्रभुः प्रभुर्भोक्ता, विश्वभूरपुनर्भवः ॥ ३ ॥
विश्वात्मा विश्वलोकेशो, विश्वतश्चक्षुरक्षरः ।
विश्वविद् विश्वविद्ये(श्वे)शो, विश्वयोनिरनीश्वरः ॥ ४ ॥
विश्वदृश्वा विभुर्धाता, विश्वेशो विश्वलोचनः ।
विश्वव्यापी विधुर्वेधाः, शाश्वतो विश्वतोमुखः ॥ ५ ॥
विश्वपो विश्वतः पादो, विश्वशीर्षः शुचिश्रवाः ।
विश्वदृग् विश्वभूतेशो, विश्वज्योतिरनश्वरः ॥ ६ ॥
विश्वसृड् विश्वसूर्विश्वेट्, विश्वभुग् विश्वनायकः ।
विश्वाशी विश्वभूतात्मा, विश्वजिद् विश्वपालकः ॥ ७ ॥
विश्वकर्मा जगद्विश्वो, विश्वमूर्तिर्जिनेश्वरः ।
भूतभाविभवद्भर्त्ता, विश्ववैद्यो यतीश्वरः ॥ ८ ॥
सर्वादिः सर्वदृक् सार्वः, सर्वज्ञः सर्वदर्शनः ।
सर्वात्मा सर्वलोकेशः, सर्ववित् सर्वलोकजित् ॥ ९ ॥
सर्वगः सुश्रुतः सुश्रूः, सुवाक् सूरिर्बहुश्रुतः ।
सहस्रशीर्षः क्षेत्रज्ञः, सहस्राक्षः सहस्रपात् ॥ १० ॥
युगादिपुरुषो ब्रह्मा, पञ्चब्रह्ममयः शिवः ।
ब्रह्मविद् ब्रह्मतत्त्वज्ञो, ब्रह्मयोनिरयोनिजः ॥ ११ ॥
ब्रह्मनिष्ठः परं ब्रह्म, ब्रह्मात्मा ब्रह्मसम्भवः ।
ब्रह्मेड् ब्रह्मपतिर्ब्रह्मचारी ब्रह्मपदेश्वरः ॥ १२ ॥
विष्णुर्जिष्णुर्जयी जेता, जिनेन्द्रो जिनपुङ्गवः ।
परः परतरः सूक्ष्मः, परमेष्ठी सनातनः ॥ १३ ॥ इति श्री प्रथमशतप्रकाशः ॥ १०० ॥

जिननाथो जगन्नाथो, जगत्स्वामी जगत्प्रभुः ।
जगत्पूज्यो जगद्वन्द्यो, जगदीशो जगत्पतिः ॥ १ ॥
जगन्नेता जगज्जेता, जगन्मान्यो जगद्विभुः ।
जगज्ज्येष्ठो जगच्छ्रेष्ठो, जगद्ध्येयो जगद्धितः ॥ २ ॥
जगदर्च्यो जगद्बन्धुर्जगच्छास्ता जगत्पिता ।
जगन्नेत्रो जगन्मैत्रो, जगद्दीपो जगद्गुरुः ॥ ३ ॥

स्वयंज्योतिरजोऽजन्मा, परंतेजः परंमहः ।
परमात्मा शमी शान्तः, परंज्योतिस्तमोऽपहः ॥ ४ ॥
प्रशान्तारिरनन्तात्मा, योगी योगीश्वरो गुरुः ।
अनन्तजिदनन्तात्मा, भव्यबन्धुरबन्धनः ॥ ५ ॥
शुद्धबुद्धिः प्रबुद्धात्मा, सिद्धार्थः सिद्धशासनः ।
सिद्धः सिद्धान्तविद् ध्येयः, सिद्धः साध्यः सुधीः सुगीः ॥ ६ ॥
सहिष्णुरच्युतोऽनन्तः, प्रभविष्णुर्भवोद्भवः ।
स्वयम्भूष्णुरसम्भूष्णुः, प्रभूष्णुरभयोऽव्ययः ॥ ७ ॥
दिव्यभाषापतिर्दिव्यः, पूतवाक् पूतशासनः ।
पूतात्मा परमज्योतिर्धर्माध्यक्षो दमीश्वरः ॥ ८ ॥
निर्मोहो निर्मदो निःस्वो, निर्दम्भो निरुपद्रवः ।
निराधारो निराहारो, निर्लोभो निश्चलोऽचलः ॥ ९ ॥
निष्कामी निर्ममो निष्वक्, निष्कलङ्को निरञ्जनः ।
निर्गुणो नीरसो निर्भीर्निर्व्यापारो निरामयः ॥ १० ॥
निर्निमेषो निराबाधो, निर्द्वन्द्वो निष्क्रियोऽनघः ।
निःशङ्कश्च निरातंको, निष्कलो निर्मलोऽमलः ॥ ११ ॥ इति द्वितीयशतप्रकाशः ॥ २०० ॥

तीर्थकृत् तीर्थसृट् तीर्थङ्करस्तीर्थकरः सुदृक् ।
तीर्थकर्त्ता तीर्थभर्त्ता, तीर्थेशस्तीर्थनायकः ॥ १ ॥
सुतीर्थोऽधिपतिस्तीर्थसेव्यस्तीर्थिकनायकः ।
धर्मतीर्थकरस्तीर्थप्रणेता तीर्थकारकः ॥ २ ॥
तीर्थाधीशो महातीर्थस्तीर्थस्तीर्थविधायकः ।
सत्यतीर्थकरस्तीर्थसेव्यस्तीर्थिकतायकः ॥ ३ ॥
तीर्थनाथस्तीर्थराजस्तीर्थेट् तीर्थप्रकाशकः ।
तीर्थवन्द्यस्तीर्थमुख्यस्तीर्थाराध्यः सुतीर्थिकः ॥ ४ ॥
स्थविष्ठः स्थविरो ज्येष्ठः, प्रेष्ठः प्रष्ठो वरिष्ठधीः ।
स्थेष्ठो गरिष्ठो बंहिष्ठो, श्रेष्ठोऽणिष्ठो गरिष्ठधीः ॥ ५ ॥
विभवो विभयो वीरो, विशोको विरजोऽजरन् ।
विरागो विमदोऽव्यक्तो, विविक्तो वीतमत्सरः ॥ ६ ॥
वीतरागो गतद्वेषो, वीतमोहो विमन्मथः ।
वियोगो योगविद् विद्वान्, विधाता विनयी नयी ॥ ७ ॥
क्षान्तिमान् पृथिवीमूर्त्तिः, शान्तिभाक् सलिलात्मकः ।
वायुमूर्तिरसंगात्मा, वह्निमूर्तिरधर्मधक् ॥ ८ ॥
सुयज्वा यजमानात्मा, सुत्रामस्तोमपूजितः ।
ऋत्विग् यज्ञपतिर्याज्यो, यज्ञाङ्गममृतं हविः ॥ ९ ॥
सोममूर्त्तिः सुसौम्यात्मा, सूर्यमूर्त्तिर्महाप्रभः ।
व्योममूर्तिरमूर्त्तात्मा, नीरजा वीरजाः शुचिः ॥ १० ॥
मन्त्रविन्मन्त्रकृन्मन्त्री, मन्त्रमूर्त्तिरनन्तरः ।
स्वतन्त्रः सूत्रकृत् स्वत्रः, कृतान्तश्च कृतान्तकृत् ॥ ११ ॥ इति तृतीयशतप्रकाशः ॥ ३०० ॥

कृती कृतार्थः संस्कृत्यः, कृतकृत्यः कृतक्रतुः ।
नित्यो मृत्युञ्जयोऽमृत्युरमृतात्माऽमृतोद्भवः ॥ १ ॥
हिरण्यगर्भः श्रीगर्भः, प्रभूतविभवोऽभवः ।
स्वयंप्रभः प्रभूतात्मा, भवो भावो भवान्तकः ॥ २ ॥
महाशोकध्वजोऽशोकः, कः स्रष्टा पद्मविष्टरः ।
पद्मेशः पद्मसम्भूतिः, पद्मनाभिरनुत्तरः ॥ ३ ॥
पद्मयोनिर्जगद्योनिरित्यः स्तुत्यः स्तुतीश्वरः ।
स्तवनार्हो हृषीकेशोऽजितो जेयः कृतक्रियः ॥ ४ ॥
विशालो विपुलो ज्योतिरतुलोऽचिन्त्यवैभवः ।
सुसंवृत्तः सुगुप्तात्मा, शुभंयुः शुभकर्मकृत् ॥ ५ ॥
एकविद्यो महावैद्यो, मुनिः परिवृढो दृढः ।
यतिर्विद्यानिधिः साक्षी, विनेता विहतान्तकः ॥ ६ ॥
पिता पितामहः पाता, पवित्रः पावनो गतिः ।
त्राता भिषग्वरो वर्यो, वरदः पारदः पुमान् ॥ ७ ॥
कविः पुराणपुरुषो, वर्षीयान् ऋषभः पुरुः ।
प्रतिष्ठाप्रसवो हेतुर्भुवनैकपितामहः ॥ ८ ॥
श्रीवत्सलक्षणः श्लक्ष्णो लक्षण्यः शुभलक्षणः ।
निरक्षः पुण्डरीकाक्षः, पुष्कलः पुष्कलेक्षणः ॥ ९ ॥
सिद्धिदः सिद्धसङ्कल्पः, सिद्धात्मा सिद्धशासनः ।
बुद्धबोध्यो महाबुद्धिर्वर्धमानो महर्द्धिकः ॥ १० ॥
वेदाङ्गो वेदविद् वेद्यो, जातरूपो विदांवरः ।
वेदवेद्यः स्वसंवेद्यो, विवेदो वदतांवरः ॥ ११ ॥

इति चतुर्थशतप्रकाशः ॥ ४०० ॥

सुधर्मो धर्मधीर्धर्मो, धर्मात्मा धर्मदेशकः ।
धर्मचक्री दयाधर्मः शुद्धधर्मो वृषध्वजः ॥ १ ॥
वृषकेतुर्वृषाधीशो, वृषाङ्कश्च वृषोद्भवः ।
हिरण्यनाभिर्भूतात्मा, भूतभृद् भूतभावनः ॥ २ ॥
प्रभवो विभवो भास्वान्, मुक्तः शक्तोऽक्षयोऽक्षतः ।
कूटस्थः स्थाणुरक्षोभ्यः, शास्ता नेताऽचलस्थितिः ॥ ३ ॥
अग्रणीर्ग्रामणीर्गण्यो, गण्यगण्यो गणाग्रणीः ।
गणाधिपो गणाधीशो, गणज्येष्ठो गणार्चितः ॥ ४ ॥
गुणाकरो गुणाम्भोधिर्गुणज्ञो गुणवान् गुणी ।
गुणादरो गुणोच्छेदी, सुगुणोऽगुणवर्जितः ॥ ५ ॥
शरण्यः पुण्यवाक् पूतो, वरेण्यः पुण्यगीर्गुणः ।
अगण्यपुण्यधीः पुण्यः, पुण्यकृत् पुण्यशासनः ॥ ६ ॥
अतीन्द्रोऽतीन्द्रियोऽधीन्द्रो, महेन्द्रोऽतीन्द्रियार्थदृक् ।
अतीन्द्रियो महेन्द्रार्च्यो [अनिद्रोऽहमिन्द्रार्च्यो (पाठांतर)],–महेन्द्रमहितो महान् ॥ ७ ॥

उद्भवः कारणं कर्त्ता, पारगो भवतारकः ।
अग्राह्यो गहनं गुह्यः, परर्द्धिः परमेश्वरः ॥ ८ ॥
अनन्तर्द्धिरमेयर्द्धिरचिन्त्यर्द्धिः समग्रधीः ।
प्राग्र्यः प्राग्र्यहरोऽत्यग्रः, प्रत्यग्रोऽग्र्योऽग्रिमोऽग्रजः ॥ ९ ॥
प्राणकः प्रणवः प्राणः, प्राणदः प्राणितेश्वरः ।
प्रधानमात्मा प्रकृतिः परमः परमोदयः ॥ १० ॥ इति पंचमशतप्रकाशः ॥ ५०० ॥

महाजिनो महाबुद्धो, महाब्रह्मा महाशिवः ।
महाविष्णुर्महाजिष्णुर्महानाथो महेश्वरः ॥ १ ॥
महादेवो महास्वामी, महाराजो महाप्रभुः ।
महाचन्द्रो महादित्यो, महाशूरो महागुरुः ॥ २ ॥
महातपा महातेजा, महोदर्को महोमयः ।
महाशयो(यशा) महाधामा(म), महासत्त्वो महाबलः ॥ ३ ॥
महाधैर्यो महावीर्यो, महाकान्तिर्महाद्युतिः ।
महाशक्तिर्महाज्योतिर्महाभूतिर्महाधृतिः ॥ ४ ॥
महामतिर्महानीतिर्महाक्षान्तिर्महाकृतिः ।
महाकीर्तिर्महास्फूर्तिर्महाप्रज्ञो महोदयः ॥ ५ ॥
महाभागो महाभोगो, महारूपो महावपुः ।
महादानो महाज्ञानो, महाशास्ता महामहाः ॥ ६ ॥
महामुनिर्महामौनी, महाध्यानो महादमः ।
महाक्षमो महाशीलो, महायोगो महालयः ॥ ७ ॥
महाव्रतो महायज्ञो, महाश्रेष्ठो महाकविः ।
महामन्त्री महातन्त्रो, महोपायो महानयः ॥ ८ ॥
महाकारुणिको मन्ता, महानादो महायतिः ।
महामोदो महाघोषो, महेज्यो महसां पतिः ॥ ९ ॥
महावीरो महाधीरो, महाधुर्यो महेष्ववाक् ।
महात्मा महसां धाम, महर्षिर्महितोदयः ॥ १० ॥
महामुक्तिर्महागुप्तिर्महासत्यो महार्जवः ।
महाबुद्धिर्महासिद्धिर्महाशौचो महावशी ॥ ११ ॥
महाधर्मो महाशर्मा, महात्मज्ञो महाशयः ।
महामोक्षो महासौख्यो, महानन्दो महोदयः ॥ १२ ॥
महाभवाब्धिसन्तारी, महामोहारिसूदनः ।
महायोगीश्वराराध्यो, महामुक्तिपदेश्वरः ॥ १३ ॥ इति षष्ठशतप्रकाशः ॥ ६०० ॥

आनन्दो नन्दनो नन्दो, वन्द्यो नन्द्योऽभिनन्दनः ।
कामहा कामदः काम्यः, कामधेनुररिञ्जयः ॥ १ ॥
मनःक्लेशापहः साधुरुत्तमोऽघहरो हरः ।
असंख्येयः प्रमेयात्मा, शमात्मा प्रशमाकरः ॥ २ ॥
सर्वयोगीश्वरश्चि(रोऽचि)न्त्यः, श्रुतात्मा विष्टरश्रवाः ।
दान्तात्मा दमतीर्थेशो, योगात्मा योगसाधकः ॥ ३ ॥

प्रमाणपरिधिर्दक्षो, दक्षिणोऽध्वर्युरध्वरः।
प्रक्षीणबन्धः कर्मारिः, क्षेमकृत् क्षेमशासनः ॥ ४ ॥
क्षेमी क्षेमङ्करोऽक्षय्यः, क्षेमध(क)र्मा क्षमापतिः।
अग्राह्यो ज्ञानिविज्ञेयो, ज्ञानिगम्यो जिनोत्तमः ॥ ५ ॥
जिनेन्दुर्जनितानन्दो, मुनीन्दुर्दुन्दुभिस्वनः।
मुनीन्द्रवन्द्यो योगीन्द्रो, यतीन्द्रो यतिनायकः ॥ ६ ॥
असंस्कृतः सुसंस्कारः, प्राकृतो वै कृतान्तवित्।
अन्तकृत् कान्तगुः कान्तश्चिन्तामणिरभीष्टदः ॥ ७ ॥
अजितो जितकामारिरमितोऽमितशासनः।
जितक्रोधो जितामित्रो, जितक्लेशो जितान्तकः ॥ ८ ॥
सत्यात्मा सत्यविज्ञानः, सत्यवाक् सत्यशासनः।
सत्याशीः सत्यसन्धानः, सत्यः सत्यपरायणः ॥ ९ ॥
सदायोगः सदाभोगः, सदातृप्तः सदाशिवः।
सदागतिः सदासौख्यः, सदाविद्यः सदोदयः ॥ १० ॥
सुघोषः सुमुखः सौम्यः, सुखदः सुहितः सुहृत्।
सुगुप्तो गुप्तिभृद् गोप्ता, गुप्ताक्षो गुप्तमानसः ॥ ११ ॥ इति सप्तमशतप्रकाशः ॥ ७०० ॥

बृहद् बृहस्पतिर्वाग्मी, वाचस्पतिरुदारधीः।
मनीषी धिषणो धीमान्, शेमुषीशो गीरांपतिः ॥ १ ॥
नैकरूपो नयोत्तुङ्गो, नैकात्मा नैकधर्मकृत्।
अविज्ञेयोऽप्रतर्क्यात्मा, कृतज्ञः कृतलक्षणः ॥ २ ॥
ज्ञानगर्भो दयागर्भो, रत्नगर्भः प्रभास्वरः।
पद्मगर्भो जगद्गर्भो, हेमगर्भः सुदर्शनः ॥ ३ ॥
लक्ष्मीशः सदयोऽध्यक्षो, दृढयोनिर्नयीशिता।
मनोहरो मनोज्ञोऽर्हो, धीरो गम्भीरशासनः ॥ ४ ॥
धर्मयूपो दयायागो, धर्मनेमिर्मुनीश्वरः।
धर्मचक्रायुधो देवः, कर्महा धर्मघोषणः ॥ ५ ॥
स्थेयान् स्थवीयान् नेदीयान्, दवीयान् दूरदर्शनः।
सुस्थितः स्वास्थ्यभाक् सुस्थो, नीरजस्को गतस्पृहः ॥ ६ ॥
वश्येन्द्रियो विमुक्तात्मा, निःसपत्नो जितेन्द्रियः।
श्रीनिवासश्चतुर्वक्त्रश्चतुरास्यश्चतुर्मुखः ॥ ७ ॥
अध्यात्मगम्योऽगम्यात्मा, योगात्मा योगिवन्दितः।
सर्वत्रगः सदाभावी, त्रिकालविषयार्थदृक् ॥ ८ ॥
शङ्करः सुखदो दान्तो, दमी क्षान्तिपरायणः।
स्वानन्दः परमानन्दः, सूक्ष्मवर्चाः परापरः ॥ ९ ॥
अमोघोऽमोघवाक् स्वाज्ञो दिव्यदृष्टिरगोचरः।
सुरूपः सुभगस्त्यागी, मूर्त्तोऽमूर्त्तः समाहितः ॥ १० ॥
एकोऽनेको निरालम्बोऽनीदृग् नाथो निरन्तरः।
प्रार्थ्योऽभ्यर्थ्यः समभ्यर्च्यस्त्रिजगन्मङ्गलोदयः ॥ ११ ॥ इति अष्टमशतप्रकाशः ॥ ८०० ॥

ईशोऽधीशोऽधिपोऽधीन्द्रो, ध्येयोऽमेयो दयामयः ।
शिवः शूरः शुभः सारः, शिष्टः स्पष्टः स्फुटोऽस्फुटः ॥ १ ॥
इष्टः पुष्टः क्षमोऽक्षामोऽकायोऽमायोऽस्मयोऽमयः ।
ह्रस्योऽह्रस्योऽणुः स्थूलो, जीर्णो नव्यो गुरुर्लघुः ॥ २ ॥
स्वभूः स्वात्मा स्वयंबुद्धः, स्वेशः स्वैरीश्वरः स्वरः ।
आद्योऽलक्ष्योऽपरोऽरूपोऽस्पर्शोऽशाब्दोऽरिहाऽरुहः ॥ ३ ॥
दीप्तोऽलेश्योऽरसोऽगन्धोऽच्छेद्योऽमेद्योऽजरोऽमरः ।
प्राज्ञो धन्यो यतिः पूज्यो, महोऽर्च्यः प्रशमी यमी ॥ ४ ॥
श्रीशः श्रीन्द्रः शुभः सुश्रीरुत्तमश्रीः श्रियः पतिः ।
श्रीपतिः श्रीपरः श्रीपः, सच्छ्रीः श्रीयुक् श्रिया श्रितः ॥ ५ ॥
ज्ञानी तपस्वी तेजस्वी, यशस्वी बलवान् बली ।
दानी ध्यानी मुनिर्मौनी, लयी लक्ष्यः क्षयी क्षमी ॥ ६ ॥
लक्ष्मीवान् भगवान् श्रेयान् , सुगतः सुतनुर्बुधः ।
बुद्धो वृद्धः स्वयंसिद्धः, प्रोच्चः प्रांशुः प्रभामयः ॥ ७ ॥ इति नवमशतप्रकाशः ॥ ९०० ॥

आदिदेवो देवदेवः, पुरुदेवोऽधिदेवता ।
युगादीशो युगाधीशो, युगमुख्यो युगोत्तमः ॥ १ ॥
दीप्तः प्रदीप्तः सूर्याभोऽरिघ्नोऽविघ्नोऽघनो घनः ।
शत्रुघ्नः प्रतिघस्तुङ्गोऽसङ्गः स्वङ्गोऽप्रगः सुगः ॥ २ ॥
स्याद्वादी दिव्यगीर्दिव्यध्वनिरुद्दामगीः प्रगीः ।
पुण्यवागर्थ्यवागर्धमागधीयोक्तिरिद्धगीः ॥ ३ ॥
पुराणपुरुषोऽपूर्वोऽपूर्वश्रीः पूर्वदेशकः ।
जिनदेवो जिनाधीशो, जिननाथो जिनाग्रणीः ॥ ४ ॥
शान्तिनिष्ठो मुनिज्येष्ठः, शिवतातिः शिवप्रदः ।
शान्तिकृत् शान्तिदः शान्तिः, कान्तिमान् कामितप्रदः ॥ ५ ॥
श्रियां निधिरधिष्ठानमप्रतिष्ठः प्रतिष्ठितः ।
सुस्थिरः स्थावरः स्थास्नुः पृ(प्र)थीयान् प्रथितः पृथुः ॥ ६ ॥
पुण्यराशिः श्रियोराशिस्तेजोराशिरसंशयी ।
ज्ञानोदधिरनन्तौजा, ज्योतिर्मूर्त्तिरनन्तधीः ॥ ७ ॥
विज्ञानोऽप्रतिमो भिक्षुर्मुमुक्षुर्मुनिपुङ्गवः ।
अनिद्रालुरतन्द्रालुर्जागरूकः प्रभामयः ॥ ८ ॥
कर्मण्यः कर्मठोऽकुण्ठो, रुद्रो भद्रोऽभयङ्करः ।
लोकोत्तरो लोकपतिर्लोकेशो लोकवत्सलः ॥ ९ ॥
त्रिलोकीशस्त्रिकालज्ञस्त्रिनेत्रस्त्रिपुरान्तकः ।
त्र्यम्बकः केवलालोकः, केवली केवलेक्षणः ॥ १० ॥
समन्तभद्रः शान्तादिर्धर्माचार्यो दयानिधिः ।
सूक्ष्मदर्शी सुमार्गज्ञः, कृपालुर्मार्गदर्शकः ॥ ११ ॥

प्रातिहार्योज्ज्वलस्फीतातिशयो विमलाशयः।
सिद्धानन्तचतुष्कश्रीर्जीयाच्छ्रीजिनपुङ्गवः ॥ १२ ॥

इति अष्टोत्तरशतनामयुक्तो दशमप्रकाशः ॥ (१००८) ॥

## उपसंहारः

एतदष्टोत्तरं नामसहस्रं श्रीमदर्हतः।
भव्याः पठन्तु सानन्दं, महानन्दैककारणम् ॥ १११ ॥
इत्येतज्जिनदेवस्य जिननामसहस्रकम्।
सर्वापराधशमनं, परं भक्तिविवर्धनम् ॥ ११२ ॥
अक्षयं त्रिषु लोकेषु, सर्वस्वर्गैकसाधनम्।
स्वर्गलोकैकसोपानं, सर्वदुःखैकनाशनम् ॥ ११३ ॥
समस्तदुःखहं सद्यः, परं निर्वाणदायकम्।
कामक्रोधादिनिःशेषमनोमलविशोधनम् ॥ ११४ ॥
शान्तिदं पावनं नृणां, महापातकनाशनम्।
सर्वेषां प्राणिनामाशु, सर्वाभीष्टफलप्रदम् ॥ ११५ ॥
जगज्जाड्यप्रशमनं, सर्वविद्याप्रवर्त्तकम्।
राज्यदं राज्यभ्रष्टानां, रोगिणां सर्वरोगहृत् ॥ ११६ ॥
वन्ध्यानां सुतदं चाशु, क्षीणानां जीवितप्रदम्।
भूत-ग्रह-विषध्वंसि, श्रवणात् पठनाज्जपात् ॥ ११७ ॥

श्रीहेमचन्द्राचार्यविरचितः श्रीअर्हन्नामसहस्रसमुच्चयः समाप्तः।

## परिचय

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यकृत 'अर्हन्नामसहस्रसमुच्चय' 'श्री जैनधर्म प्रसारक सभा,' भावनगरथी वीर सं. २४६५ मां प्रकाशित थयेली पुस्तिका ना आधारे लेवामां आव्युं छे, अने ते अति सरल होवाथी मूल मात्र आप्युं छे।

---

पाठांतरः—प्रातिहार्योज्ज्वलः कान्त्यतिशयो विमलाशयः।

[७३-२८]

# महामहोपाध्यायश्रीविनयविजयगणिविरचितम्
# श्रीजिनसहस्रनामस्तोत्रम्

नमस्ते समस्तेप्सितार्थप्रदाय, नमस्ते महार्हत्यलक्ष्मीप्रदाय।
नमस्ते चिदानन्दतेजोमयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १ ॥

नमस्ते जगन्नाथ! विश्वैकनेतः!, नमस्ते महामोहमल्लैकजेतः!।
नमस्ते सतां मोक्षशिक्षाविनेतः!, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २ ॥

नमस्ते जिनेन्द्र! प्रभो! वीतराग!, नमस्ते स्वयम्भो! जगद्गन्धनाग!।
नमस्ते स्फुरज्ज्ञानजाग्रद्विराग!, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३ ॥

नमस्ते जगज्जन्तुजीवातुजन्म!, नमस्ते प्रभो! भाग्यलभ्याङ्घ्रिपद्म!।
नमस्ते लसत्सत्यसन्तोषसद्म!, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४ ॥

---

## अनुवाद

सर्व कामित अर्थोने आपनार आपने नमस्कार थाओ। महान् आर्हत्यलक्ष्मी—अरिहंत पदने आपनार आपने नमस्कार थाओ। अनंत ज्ञान, अनंत सुख अने अनंत वीर्यमय एवा आपने नमस्कार थाओ। *आपने नमस्कार थाओ! आपने नमस्कार थाओ! आपने नमस्कार थाओ! आपने नमस्कार थाओ! ॥ १ ॥

जगत्ना नाथ! विश्वना परम नेता! आपने नमस्कार थाओ। महामोहरूप मल्लना श्रेष्ठ विजेता! आपने नमस्कार थाओ। सज्जनोने मोक्षनी शिक्षा (मोक्षमार्ग) आपनार! आपने नमस्कार थाओ ॥ २ ॥

जिनेन्द्र! प्रभो (सर्व प्रकारे समर्थ)! वीतराग (रागद्वेष रहित)! आपने नमस्कार थाओ। हे स्वयंभू (विशिष्ट प्रकारना तथाभव्यत्वथी स्वयं तीर्थंकर थयेला)! हे जगद्गंधनाग (जगतमां गंधहस्तीसमान, अन्य वादिओरूप हाथीओना मदनो नाश करनारा)! आपने नमस्कार थाओ! निर्मल ज्ञान अने निश्चल वैराग्यवाळा आपने नमस्कार थाओ ॥ ३ ॥

जगतना जंतुओने (षट्कायना प्राणीओने) जीवाडवा माटे (अभयदान आपनार अने अपावनार) जन्म लेनारा, हे प्रभो! आपने नमस्कार थाओ। परम भाग्योदयथी ज प्राप्य छे चरणकमळ जेमना एवा हे प्रभो! आपने नमस्कार थाओ। सुंदर सत्य अने संतोषना निकेतन हे प्रभो! आपने नमस्कार थाओ ॥ ४ ॥

---

* दरेक छंदना चोथा चरणनो अर्थ आ मुजब समजवो।

नमस्तेऽत्र धर्मार्थिनां धर्मबन्धो !, नमस्ते सतां पुण्यकारुण्यसिन्धो ! ।
नमस्ते निरुद्धातिदुष्टाश्रवान्धो !, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५ ॥
नमस्ते महस्विन् ! नमस्ते यशस्विन् !, नमस्ते वचस्विन् नमस्ते तपस्विन् ! ।
नमस्ते गुणैरद्भुतैरद्भुताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६ ॥
नमस्ते महात्मन् ! नमस्ते चिदात्मन् !, नमस्ते शिवात्मन् ! नमस्ते परात्मन् ! ।
नमस्ते स्थिरात्मन् ! नमस्तेऽन्तरात्मन् !, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७ ॥
नमस्ते गुणानन्त्यमाहात्म्यधाम्ने, नमस्ते मुनिग्रामणे ध्येयनाम्ने ।
नमस्ते विशुद्धाववोधात्मकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८ ॥
नमस्ते भवप्रान्तरस्वर्द्रुमाय, नमस्ते कृतास्मन्मनोविश्रमाय ।
नमस्ते गलज्जन्ममृत्युश्रमाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ९ ॥
नमस्ते सुधाधोरणीवल्लभाय, नमस्ते भवेऽस्मिन् भृशं दुर्लभाय ।
नमस्तेऽत्र लब्धाय पुण्यैः(ण्य) प्रकर्षैः, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १० ॥

---

आ लोकमां रहेला धर्मार्थी जीवोना धर्मबन्धु ! आपने नमस्कार थाओ। सत्पुरुषोने माटे पुण्य अने करुणाना सिंधु हे प्रभो ! आपने नमस्कार थाओ। अतिदुष्ट एवा आश्रवोरूपी अंधकूपमां पडता प्राणीओने रोकनार (पडवा नहीं देनार) हे प्रभो ! आपने नमस्कार थाओ ॥ ५ ॥

महस्विन् ! (महातेजवाळा) ! आपने नमस्कार थाओ। यशस्विन् ! आपने नमस्कार थाओ। वचस्विन् (पांत्रीश गुणोथी युक्त वचनवाळा)! आपने नमस्कार थाओ। तपस्विन् ! आपने नमस्कार थाओ। अद्भुत गुणोवडे अद्भुत (सर्वोत्तम गुणवान) एवा आपने नमस्कार थाओ ॥ ६ ॥

महात्मन् ! आपने नमस्कार थाओ। चिदात्मन् ! आपने नमस्कार थाओ। शिवात्मन् ! आपने नमस्कार थाओ। परमात्मन् ! आपने नमस्कार थाओ। स्थिरात्मन् ! आपने नमस्कार थाओ। अन्तरात्मन् ! आपने नमस्कार थाओ ॥ ७ ॥

अनन्त गुण अने अनन्त माहात्म्यना धाम ! आपने नमस्कार थाओ। मुनि समूहना अधिपति ! ध्यान करवा लायक नामवाळा हे प्रभो आपने नमस्कार थाओ। विशुद्ध ज्ञानमय आपने नमस्कार थाओ ॥ ८ ॥

भवरूप अरण्यमां आश्रय लेवा माटे कल्पवृक्ष समान आपने नमस्कार थाओ। अमारा मनने विश्राम आपनार आपने नमस्कार थाओ। जन्म अने मरणना श्रमथी रहित आपने नमस्कार थाओ ॥ ९ ॥

अमृत तुल्य गोष्ठी करनारा भव्य जीवोना वल्लभ एवा आपने नमस्कार थाओ। आ भवमां अत्यन्त दुर्लभ छे दर्शन जेमनुं एवा आपने नमस्कार थाओ। पुण्यना प्रकर्षवडे प्राप्त थयेला एवा आपने नमस्कार थाओ ॥ १० ॥

नमस्ते सुधासारनेत्राञ्जनाय, नमस्ते सदाऽस्मन्मनोरञ्जनाय।
नमस्ते भवभ्रान्तिभीभञ्जनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११ ॥

नमस्ते शुचिज्ञानरत्नाकराय, नमस्ते सतां कल्पकारस्कराय।
नमस्ते जगज्जीवभद्रङ्कराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२ ॥

नमो मण्डिताखण्डभूमण्डलाय, नमो भक्तिनम्राखिलाखण्डलाय।
नमो युक्तयोगाय योगीश्वराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३ ॥

नमस्ते सदा सुप्रसन्नाननाय, नमः सिद्धिसम्पल्लताकाननाय।
नमो दत्तविद्वन्मनस्सम्मदाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १४ ॥

नमस्तेऽवतीर्णाय विश्वोपकृत्यै, नमस्ते कृतार्थाय सद्धर्मकृत्यैः।
नमस्ते प्रकृत्या जगद्वत्सलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १५ ॥

नमस्तीर्थकृन्नामकर्मार्जिताय, नमोऽचिन्त्यसामर्थ्यविस्फूर्जिताय।
नमो योगिने योगमुद्रान्विताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १६ ॥

---

अमृतना सार सदृश सम्यग्ज्ञानथी अमारा नेत्रोनुं अंजन[१] करनारा! आपने नमस्कार थाओ। अमारा मननुं सदा रंजन करनारा आपने नमस्कार थाओ। भव भ्रमणना भयनो नाश करनारा आपने नमस्कार थाओ ॥ ११ ॥

पवित्र ज्ञानना रत्नाकर एवा आपने नमस्कार थाओ। सज्जनोना वांछित पूरवाने कल्पवृक्ष समान आपने नमस्कार थाओ। जगतना जीवोनुं कल्याण करनारा आपने नमस्कार थाओ ॥ १२ ॥

सकल भूमंडलना आभूषण समान आपने नमस्कार थाओ। भक्तिवडे नम्या छे सर्व इंद्रो जेमने एवा आपने नमस्कार थाओ। योगवडे युक्त अने योगीश्वर एवा आपने नमस्कार थाओ ॥ १३ ॥

निरंतर सुप्रसन्न मुखवाळा आपने नमस्कार थाओ। सिद्धिसंपत्तिरूपकल्पलताना उद्यान समान आपने नमस्कार थाओ। विद्वानोना मनने अनुपम आनंद आपनारा आपने नमस्कार थाओ ॥ १४ ॥

विश्वना उपकार माटे अवतरेला आपने नमस्कार थाओ। सद्धर्मानुष्ठान वडे कृतार्थ थयेला अपने नमस्कार थाओ। स्वभावथी ज विश्ववत्सल एवा आपने नमस्कार थाओ ॥ १५ ॥

श्रीतीर्थंकर नामकर्म उपार्जित करनार आपने नमस्कार थाओ। अचिन्त्य सामर्थ्यवडे ओजस्वी एवा आपने नमस्कार थाओ। योगमुद्रा युक्त एवा योगीश्वर आपने नमस्कार थाओ ॥ १६ ॥

---

१ 'उपमिति'कार भगवान श्री सिद्धर्षिए आ अंजन माटे 'विमलालोक' शब्दनो प्रयोग कर्यो छे।

नमोऽनुत्तरस्वर्गिभिः पूजिताय, नमस्तन्मनःसंशयच्छेदकाय ।
नमोऽनुत्तरज्ञानलक्ष्मीश्वराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १७ ॥

नमस्ते धरित्रीव(त्र्येव) सर्वंसहाय, नमस्तेऽन्तरङ्गारिभिर्दुस्सहाय ।
नमस्ते तपस्सत्यधूर्धुर्वहाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १८ ॥

नमस्ते शुभोपार्जितार्हत्पदाय, नमस्ते तृतीये भवे निश्चिताय ।
नमो धर्मसम्य फलावञ्चिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १९ ॥

नमो नव्यदिव्योपभोगाभिधाय, नमस्तेषु तत्रापि वैरङ्गिकाय ।
नमो योगसात्म्यैकतासङ्गताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २० ॥

नमस्ते भुवि स्वर्गलोकच्युताय, नमस्ते सतीकुक्षिकोशङ्गताय ।
नमस्ते त्रिलोकोपकारोद्यताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २१ ॥

नमस्ते शुभस्वप्नसंसूचिताय, नमस्ते जनन्याप्तसद्दोहदाय ।
नमस्ते भवत्तद्वपुः सौष्ठवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २२ ॥

---

अनुत्तरविमानना देवो वडे पूजित एवा आपने नमस्कार थाओ। अनुत्तर विमानमां रहेला देवोना मनमां उत्पन्न थनारा संशयने छेदनारा आपने नमस्कार थाओ। अनुत्तर एवी ज्ञानलक्ष्मीना (केवळज्ञानना) स्वामी एवा आपने नमस्कार थाओ ॥ १७ ॥

पृथ्वीनी जेम सर्वंषह (सर्व परिषह–उपसर्गोने सहन करनार) आपने नमस्कार थाओ। अंतरंग शत्रुओने दुस्सह एवा आपने नमस्कार थाओ। तप अने सत्यरूपी धुराने वहन करवामां वृषभ समान आपने नमस्कार थाओ ॥ १८ ॥

पुण्यप्रकर्षथी अरिहंत पदने उपार्जन करनारा आपने नमस्कार थाओ। त्रीजे भवे तीर्थंकरपदने निश्चित (निकाचित) करनारा आपने नमस्कार थाओ। धर्मना सम्यक् फळथी अवंचित एवा आपने नमस्कार थाओ ॥ १९ ॥

नव्य (सुंदर) दिव्योपभोगने पामेला (?) एवा आपने नमस्कार थाओ (आ विशेषण त्रीजे भवे तीर्थंकर नामकर्म निकाचित कर्या पछी प्राप्त थयेल देवपणाने अंगे छे)। देवभवमां पण भोगोथी विरक्त एवा आपने नमस्कार थाओ। योगोनी सात्म्यरूप एकताने पामेला आपने नमस्कार थाओ ॥ २० ॥

स्वर्गमांथी च्यवीने पृथ्वीपर अवतरेला आपने नमस्कार थाओ। मनुष्यपणामां सती स्त्रीना गर्भमां रहेला आपने नमस्कार थाओ। त्रिलोकना उपकार माटे उद्यत थयेला आपने नमस्कार थाओ ॥ २१ ॥

शुभ स्वप्नवडे सूचित अवतारवाळा आपने नमस्कार थाओ। जेमनी माताने शुभ दोहला उत्पन्न थया छे एवा आपने नमस्कार थाओ। माताना शरीरने सुखकारक एवा आपने नमस्कार थाओ ॥ २२ ॥

नमस्ते जनुर्भूषिताढ्यान्वयाय, नमो रत्नरैवृष्टिपूर्णालयाय ।
नमो वर्द्धमानद्विधावैभवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २३ ॥

नमो दिक्कुमारीकृतस्वोचिताय, नमस्ताभिरर्चाविधिस्वञ्चिताय ।
नमो ज्ञानरत्नत्रयोदञ्चिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २४ ॥

नमो द्योतिताशेषविश्वत्रयाय, नमः सर्वलोकैकसौख्यावहाय ।
नमः प्रोल्लसज्जङ्गमस्थावराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २५ ॥

नमः सुप्रसन्नीकृताशामुखाय, नमस्ते समुज्जृम्भितोर्वीसुखाय ।
नमो नारकेभ्योऽपि दत्तोत्सवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २६ ॥

नमस्तेऽद्भुतकम्पितेन्द्रासनाय, नमस्ते मुदा तैः कृतोपासनाय ।
नमः कल्पितध्वान्तनिर्वासनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २७ ॥

नमस्ते सुराद्रौ सुरैः प्रापिताय, नमस्ते कृतस्नात्रपूजोत्सवाय ।
नमस्ते विनीताप्सरःपूजिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २८ ॥

---

जन्म वडे वंशने शोभित अने समृद्ध करनारा आपने नमस्कार थाओ। (देवोए करेली) रत्न ने सुवर्णनी वृष्टिथी घरने पूर्ण करनारा आपने नमस्कार थाओ। बन्ने प्रकारना (द्रव्य ने भाव) वैभवथी वधता एवा आपने नमस्कार थाओ ॥ २३ ॥

दिक्कुमारीओए जेमनुं स्वोचित (प्रसूति) कर्तव्य कर्युं छे एवा आपने नमस्कार थाओ। तेओ वडे अर्चा विधिथी पूजित एवा आपने नमस्कार थाओ। जन्मथी ज त्रण ज्ञान वडे युक्त एवा आपने नमस्कार थाओ ॥ २४ ॥

जन्मकल्याणक वखते समस्त विश्वत्रयने द्योतित करनारा आपने नमस्कार थाओ। जन्मकल्याणक वखते सर्व लोकने अनुपम सुखने आपनारा आपने नमस्कार थाओ। (तीर्थंकरना जन्म वखते जगतना सर्व जीवो क्षणमात्र सुखी थाय छे।) ते वखते जंगम ने स्थावर सर्व वस्तुने उल्लसायमान करनार आपने नमस्कार थाओ ॥ २५ ॥

सर्व दिशाओना मुखने सुप्रसन्न करनारा आपने नमस्कार थाओ। पृथ्वीना सुखमां वृद्धि करनारा एवा आपने नमस्कार थाओ। नारकोने पण आनंद आपनारा आपने नमस्कार थाओ ॥ २६ ॥

अद्भुत रीते इन्द्रना आसनने कंपावनारा आपने नमस्कार थाओ। हर्ष वडे इन्द्रोथी स्तवायेला आपने नमस्कार थाओ; (अहीं शक्रस्तव वडे इन्द्रे करेली स्तवना सूचवी छे) अज्ञानअंधकारनो नाश करनारा आपने नमस्कार थाओ ॥ २७ ॥

देवताओ वडे मेरु पर्वत उपर लावायेला एवा आपने नमस्कार थाओ। त्यां जेमनो स्नात्रपूजानो उत्सव करवामां आव्यो एवा आपने नमस्कार थाओ। विनीत अप्सराओथी पूजित एवा आपने नमस्कार थाओ ॥ २८ ॥

नमोऽङ्गुष्ठपीयूषपानोच्छ्रिताय, नमस्ते वपुःसर्वनष्टामयाय।
नमस्ते यथायुक्तसर्वाङ्गकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ २९ ॥

नमस्ते मलस्वेदखेदोज्झिताय, नमस्ते शुचिक्षीररुक्शोणिताय।
नमस्ते मुखश्वासह्रीणाम्बुजाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३० ॥

नमस्ते मणिस्वर्णजिद्गौरभाय, नमस्ते प्रसर्पद्वपुःसौरभाय।
नमोऽनीक्षिताहारनीहारकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३१ ॥

नमस्ते सुरौघैरनुक्रीडिताय, नमस्ते शिशुक्रीडया व्रीडिताय।
नमस्ते सुराधीश्वरैरीडिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३२ ॥

नमो राजहंसेभगोवद्गताय, नमश्चातुरीमाधुरीसङ्गताय।
नमः सर्वशास्त्राब्धिपारंगताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३३ ॥

नमः कोमलालापपीयूषवर्ष !, नमो बाललीलाकृतज्ञातिहर्ष।
नमस्ते प्रभो ! प्राज्यपुण्यप्रकर्ष !, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३४ ॥

---

अंगूठामां इन्द्रे संचारेला अमृतना पान वडे उछरता एवा आपने नमस्कार थाओ। जेमना शरीरना सर्व रोगो नाश पाम्या छे एवा आपने नमस्कार थाओ। सर्व अंगनी यथोचित रचनाथी शोभता एवा आपने नमस्कार थाओ (अहीं प्रभुनुं उत्कृष्ट समचतुरस्र संस्थान सूचव्युं छे) ॥ २९ ॥

मल, प्रस्वेद अने खेदथी रहित शरीरवाळा आपने नमस्कार थाओ। पवित्र एवा दुग्ध समान श्वेतवर्णी रुधिरवाळा आपने नमस्कार थाओ। मुखना श्वासनी सुगंधवडे कमळने पण शरमावनारा (कमळ जेवा सुगंधी श्वासोच्छ्वासवाळा) आपने नमस्कार थाओ ॥ ३० ॥

मणि अने सुवर्णने जीतनारी गौर (उज्ज्वल) कांतिवाळा आपने नमस्कार थाओ। जेमना शरीरनी सुगंध चारे बाजु प्रसरी रही छे एवा आपने नमस्कार थाओ। जेमनो आहार-नीहार छद्मस्थ मनुष्यो जोई शकता नथी एवा आपने नमस्कार थाओ ॥ ३१ ॥

(२९ श्लो. थी अहीं सुधी जन्मथी थनारा चार अतिशय सूचव्या छे।)

बाळपणामां देवोना समूहो वडे रमाडाता एवा आपने नमस्कार थाओ। बाळपणानी क्रीडाथी लज्जा पामेला एवा आपने नमस्कार थाओ। (बाळपणामां पण) इन्द्रो वडे प्रशंसित एवा आपने नमस्कार थाओ ॥ ३२ ॥

राजहंस, हस्ती अने वृषभ जेवी गतिवाळा आपने नमस्कार थाओ। चतुरता अने मधुरताथी युक्त एवा आपने नमस्कार थाओ। सर्व शास्त्ररूप समुद्रना पारने पामेला एवा आपने नमस्कार थाओ ॥ ३३ ॥

कोमळ आलापरूप अमृतने वरसावनारा हे प्रभो ! आपने नमस्कार थाओ। बाळक्रीडा वडे ज्ञातिजनने हर्ष पमाडनारा हे प्रभो ! आपने नमस्कार थाओ। अतिशय पुण्यना प्रकर्षवाळा हे प्रभो ! आपने नमस्कार थाओ ॥ ३४ ॥

नमः स्फारकौमारलीलालसाय, नमस्ते स्वतस्त्यक्तदुर्लालसाय ।
नमस्ते शुचित्वेऽपि (?) निःसाध्वसाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३५ ॥

नमस्ते कृतान्वर्थयुक्ताभिधाय, नमस्ते स्वतःसिद्धविद्याविधाय ।
नमस्ते स्वतो लब्धशिक्षोपधाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३६ ॥

नमोऽष्टाढ्यसाहस्रसल्लक्षणाय, नमस्ते कृतप्राणिसंरक्षणाय ।
नमोऽक्षीणदाक्षिण्यधीदक्षिणाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३७ ॥

नमोऽनङ्कराकेन्दुजैत्राननाय, नमो दक्षहृल्लक्ष्यसन्दानकाय ।
नमस्ते कपोलान्तशान्तस्मिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३८ ॥

नमोऽनन्तगाम्भीर्यवर्याशयाय, नमः संवृतानन्तशक्त्याश्रयाय ।
नमो धैर्यनिस्तर्जितेन्द्राचलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३९ ॥

नमो यौवनेऽप्युद्धतस्थावराय, नमः प्रातिभोत्थव्यवस्थावराय ।
नमो विष्वगुद्यत्प्रभापीवराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४० ॥

---

कुमारावस्थानी विपुल क्रीडाओमां मंद (विरक्त) एवा आपने नमस्कार थाओ। जेमनो दुष्ट लालसाओए स्वयं त्याग कर्यो छे एवा आपने नमस्कार थाओ। (शरीर) पवित्र अने निर्भय (?) एवा आपने नमस्कार थाओ ॥ ३५ ॥

जेमनुं सार्थक अने युक्त एवुं वर्द्धमानादि नाम पाडवामां आव्युं एवा आपने नमस्कार थाओ। जेमने नानाविध विद्याओ स्वतः सिद्ध हती एवा आपने नमस्कार थाओ। पोतानी मेळे ज शिक्षणना उपायो मेळवनारा एवा आपने नमस्कार थाओ ॥ ३६ ॥

उत्तम एवा एक हजार ने आठ लक्षणोवाळा आपने नमस्कार थाओ। सर्व प्राणिओना रक्षणहार आपने नमस्कार थाओ। अक्षीण एवी दक्षिणता अने बुद्धिना कारणे दक्ष एवा आपने नमस्कार थाओ ॥ ३७ ॥

पूर्णिमाना निर्मल चन्द्रने जीतनार मुखवाळा आपने नमस्कार थाओ। निपुण पुरुषोना हृदयना लक्ष्यने पोतामां बांधी लेनारा आपने नमस्कार थाओ। जेना कपोळमां शान्त स्मित रमी रह्युं छे एवा आपने नमस्कार थाओ ॥ ३८ ॥

अनन्त गांभीर्यरूप (अथवा अनंत गांभीर्यना कारणे) श्रेष्ठ आशयवाळा एवा आपने नमस्कार थाओ। संवृत एवी अनन्त शक्तिओना आश्रयरूप आपने नमस्कार थाओ। धैर्य वडे मेरुपर्वतने पण अधरित करनार [मेरु करतां पण अधिक धैर्यवान (स्थिर)] एवा आपने नमस्कार थाओ ॥ ३९ ॥

यौवनावस्थामां पण अत्यंत स्थिरतावाळा (विषयोमां चंचलता रहित) आपने नमस्कार थाओ। उच्च प्रकारनी प्रतिभाथी प्राप्त थयेल श्रेष्ठ औचित्यवाळा आपने नमस्कार थाओ। देहमांथी चोतरफ प्रसरती प्रभा वडे शोभता एवा आपने नमस्कार थाओ ॥ ४० ॥

नमो जन्मतोऽप्यार्यमार्गाध्वगाय, नमो रुद्धदुर्नीतिचर्याऽपगाय ।
नमस्ते विनाऽध्यापकं शिक्षिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४१ ॥

नमो यौवने प्राप्तपाणिग्रहाय, नमो मुक्तभोगोपभोगाग्रहाय ।
नमस्ते कृतप्राच्यकर्मौषधाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४२ ॥

नमस्ते त्रिवर्गक्रियासाधकाय, नमस्ते यथार्हं तदाराधकाय ।
नमस्तुर्यवर्गेऽप्यनिर्बाधकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४३ ॥

नमो दान्तपञ्चेन्द्रियान्तःस्थलाय, नमःकीलिताजस्रकम्प्रोच्चलाय[1] ।
नमो ज्ञानधाराधुतान्तर्मलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४४ ॥

नमो बिभ्रते सात्त्विकाश्चित्तवृत्तिं, नमो बिभ्रते मानसैनोनिवृत्तिं ।
नमः पश्यते सर्वतस्तत्त्वदृष्ट्या, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४५ ॥

नमो भोगभङ्गीप्रसङ्गानुगाय, नमो नोपलिप्ताय तत्तद्रजोभिः ।
नमः प्रोल्लसत्पुण्डरीकोपमाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४६ ॥

---

जन्मथी ज आर्य (नीति) मार्गना पथिक एवा आपने नमस्कार थाओ। दुर्नीतिनी चर्यारूप नदीना प्रवाहने रोकनारा आपने नमस्कार थाओ। अध्यापक विना पण शिक्षणने प्राप्त थयेला एवा आपने नमस्कार थाओ ॥ ४१ ॥

यौवनावस्थामां पाणिग्रहणने (लग्नने) पामेला एवा आपने नमस्कार थाओ। भोगोपभोगमां आसक्ति रहित एवा आपने नमस्कार थाओ। भोगोपभोगमां पण पूर्वार्जित कर्मोनुं औषध (क्षपण) करनारा एवा आपने नमस्कार थाओ ॥ ४२ ॥

यथायोग्यपणे प्रथम त्रण पुरुषार्थोनी क्रियाने साधता एवा आपने नमस्कार थाओ। तेने उचित रीते आराधनारा एवा आपने नमस्कार थाओ। ते वखते चोथा मोक्ष पुरुषार्थने पण बाधा नहीं पमाडनारा एवा आपने नमस्कार थाओ ॥ ४३ ॥

पांचे इन्द्रियोना मर्मने दमनारा एवा आपने नमस्कार थाओ। निरंतर चंचल एवा मनने ध्येयरूप खीले बांधता एवा आपने नमस्कार थाओ। ज्ञानधारावडे अंतरमळने धोनारा एवा आपने नमस्कार थाओ ॥ ४४ ॥

सात्त्विक चित्तवृत्तिने धारण करनारा आपने नमस्कार थाओ। मानसिक पापोनी निवृत्तिने धारण करनारा आपने नमस्कार थाओ। सर्व तरफ तत्त्वदृष्टिथी जोता एवा आपने नमस्कार थाओ ॥ ४५ ॥

अनेक भोगोना प्रसंगोने अनुसरतां (भोगोने भोगवतां) छतां पण ते वखते ते ते भोगोनी रज (कर्माश्रव) थी अलिप्त एवा आपने नमस्कार थाओ। विकस्वर पुंडरीक कमळनी उपमावाळा आपने नमस्कार थाओ ॥ ४६ ॥

---

१ उच्चल = मन (शब्दरत्नमहोदधि कोश)।

नमः सम्पतद्देवलोकान्तिकाय, नमस्तैः स्तुताङ्घ्रिद्वयोपान्तिकाय ।
नमो ज्ञाततीर्थप्रवृत्त्यर्थनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४७ ॥

नमो निश्चितात्मीयदीक्षाक्षणाय, नमो ज्ञानशुद्धोपयोगेक्षणाय ।
नमस्ते निरीहाय वीतस्पृहाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४८ ॥

नमस्ते कृतज्ञातिवर्गार्हणाय, नमः प्रीणितैतत्कृतोद्बृंहणाय ।
नमस्तेऽर्पितस्वापतेयाय तेभ्यो, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ४९ ॥

नमो दत्तसांवत्सरोत्सर्जनाय, नमो विश्वदारिद्र्यनिस्तर्जनाय ।
नमस्ते कृतार्थी-कृतार्थिव्रजाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५० ॥

नमः प्रत्यहं कारितोद्घोषणाय, नमो भो वृणीतेति लोकम्पृणाय ।
नमो दानवीराधिवीरोद्धुराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५१ ॥

नमस्तेऽर्पितानेकगर्जद्द्विजाय, नमस्तेर्पितानेकवाहव्रजाय ।
नमस्ते समुत्तानदानध्वजाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५२ ॥

---

जेमनी पासे लोकान्तिक देवो भेगा थईने आव्या छे एवा आपने नमस्कार थाओ । तेओए चरणद्वय पासे आवीने जेमनी स्तुति करी छे एवा आपने नमस्कार थाओ । तीर्थप्रवर्तननी प्रार्थनाने जाणनारा एवा आपने नमस्कार थाओ । ॥ ४७ ॥

पोताना दीक्षा समयने निश्चित करनारा आपने नमस्कार थाओ । ज्ञानरूप शुद्ध उपयोग वडे जोता एवा आपने नमस्कार थाओ; निरीह अने निःस्पृह एवा आपने नमस्कार थाओ ॥ ४८ ॥

ज्ञातिवर्गनो धनदानादि वडे सत्कार करता एवा आपने नमस्कार थाओ । प्रसन्न थयेला ज्ञातिवर्गे प्रशंसा करी छे एवा आपने नमस्कार थाओ; स्वजनोने संपत्तिनो योग्य भाग आपता एवा आपने नमस्कार थाओ ॥ ४९ ॥

सांवत्सरिक दानने आपनारा एवा आपने नमस्कार थाओ । विश्वना दारिद्र्यनी निस्तर्जना (दारिद्र्यने दूर) करनारा आपने नमस्कार थाओ । अर्थिवर्गने कृतार्थ (संतुष्ट) करनारा आपने नमस्कार थाओ ॥ ५० ॥

दररोज दाननी उद्घोषणा करावनार आपने नमस्कार थाओ । 'हे लोको ! मागो ! मागो' वगेरे कहेवा वडे जगतने आनंद आपनार आपने नमस्कार थाओ; दानवीरोमां श्रेष्ठमां श्रेष्ठ एवा आपने नमस्कार थाओ ॥ ५१ ॥

गर्जना करता अनेक हाथीओ दानमां आपनार आपने नमस्कार थाओ । अश्वोना अनेक समूहो दानमां आपनार आपने नमस्कार थाओ । जेमना दाननो ध्वज सर्वत्र ऊंचे फरकी रह्यो छे एवा आपने नमस्कार थाओ ॥ ५२ ॥

नमस्ते प्रभो ! दत्तदिव्याम्बराय, नमस्तेऽर्पितस्वर्णरत्नोत्कराय ।
नमो दीनदीनारधाराधराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५३ ॥
नमः प्रत्यहं यच्छते हेमकोटिं, नमो यच्छतेऽष्टौ च लक्षाणि तेषाम् ।
नमो यच्छतेऽन्यद्यथेच्छं जनानाम्, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५४ ॥
नमस्ते वदान्यीभवन्मार्गणाय, नमस्ते धनापूर्णगेहाङ्गणाय ।
नमस्ते कृतानेककोटिध्वजाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५५ ॥
नमस्ते मनःकामकल्पद्रुमाय, नमस्ते प्रभो ? कामधेनूपमाय ।
नमस्ते निरस्तार्थिनामाश्रमा(या)य, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५६ ॥
नमस्त्यक्तसप्ताङ्गराज्येन्दिराय, नमस्त्यक्तसत्सुन्दरीमन्दिराय ।
नमस्त्यक्तमाणिक्यमुक्ताफलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५७ ॥
नमस्तत्क्षणोपागतस्वर्भवाय, नमस्तत्कृतप्रौढदीक्षोत्सवाय ।
नमस्तत्र तत्तत्स्फुरद्वैभवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५८ ॥

---

दिव्य वस्त्रो दानमां आपनार एवा हे प्रभो ! आपने नमस्कार थाओ । रत्न ने सुवर्णनां ढगलांओ दानमां आपनार आपने नमस्कार थाओ । दीन जनोने दीनाररूप[1] जलनुं दान देवामां मेघ समान एवा आपने नमस्कार थाओ ॥ ५३ ॥

दररोज दानमां एक करोड ने आठ लाख सोनैया आपनार आपने नमस्कार थाओ। अर्थी जनोने इच्छा मुजब बीजुं पण आपनार आपने नमस्कार थाओ ॥ ५४ ॥

याचकोने माटे उदार दातारूप थता एवा आपने नमस्कार थाओ। जेमनुं गृहाङ्गण धन वडे पूर्ण छे एवा आपने नमस्कार थाओ। अनेक जनोने कोटिध्वज करनार आपने वारंवार नमस्कार थाओ ॥ ५५ ॥

मनोवांछित आपवाने कल्पवृक्ष सरखा आपने नमस्कार थाओ। मनोवांछित आपवाने कामधेनु समान आपने नमस्कार थाओ। 'अर्थी' एवा नामना आश्रयनो निरास करनार आपने नमस्कार थाओ। (प्रभुए एटलुं बधुं दान आप्युं के जगतमां कोई अर्थी ज रह्यो नहीं ! तेथी 'अर्थी' एवुं नाम पण न रह्युं !) ॥ ५६ ॥

सप्तांग[2] राज्यलक्ष्मीनो त्याग करनारा आपने नमस्कार थाओ। सुंदर स्त्रीओथी युक्त एवा अन्तः-पुरनो त्याग करनार आपने नमस्कार थाओ। मणिओ अने मोतीओनो त्याग करनार आपने नमस्कार थाओ ॥ ५७ ॥

दीक्षाना महोत्सव माटे जेमनी पासे तत्काळ इंद्रो आव्या एवा आपने नमस्कार थाओ। तेओए जेमनो प्रौढ दीक्षा महोत्सव कर्यो एवा आपने नमस्कार थाओ। त्यां (दीक्षा महोत्सवमां) ते ते प्रकारना दिव्य वैभवथी शोभता एवा आपने नमस्कार थाओ ॥ ५८ ॥

---

१ सिक्को।

२ स्वामी, अमात्य, सुहृत्, कोष, राष्ट्र, दुर्ग (किल्लो) अने सैन्य।

नमस्ते प्रभो ! याप्ययानस्थिताय, नमस्तेऽवनाय प्रभो ! प्रस्थिताय ।
नमस्ते शमस्पृग्मनःसुस्थिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ५९ ॥

नमो यानधुर्यीभवद्वासवाय, नमो दूरविक्षिप्तगर्वासवाय ।
नमः शुद्धभावावरुद्धाश्रवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६० ॥

नमस्तेऽग्रगच्छन्महेन्द्रध्वजाय, नमस्तेऽग्रगच्छद्गजाश्वव्रजाय ।
नमस्तेऽभितःसञ्चरद्राजकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६१ ॥

नमोऽमर्त्यसङ्कीर्णितोर्वीतलाय, नमो देवदीप्यन्नभोमण्डलाय ।
नमस्ते नदद्दिव्यतूर्यत्रिकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६२ ॥

नमो दीप्ररत्नप्रभाडम्बराय, नमो बन्दिशब्दोर्जिताशाम्बराय ।
नमो नागरीनागरैर्वीक्षिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६३ ॥

नमस्त्यक्तसर्वाङ्गिकाभूषणाय, नमो निर्गतत्रित्रिधादूषणाय ।
नमः पञ्चमुष्टयाऽलकोल्लुञ्चकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६४ ॥

---

दीक्षायोग्य वाहन(शिबिका)मां रहेला आपने हे प्रभो! नमस्कार थाओ। जगतना जीवोनुं रक्षण करवा माटे प्रस्थान करता (दीक्षा माटे वन तरफ जता एवा) हे प्रभो! आपने नमस्कार थाओ। शान्तिमां मग्न मनना कारणे सुस्थित एवा आपने नमस्कार थाओ ॥ ५९ ॥

जेमनी दीक्षाशिबिकाने इन्द्रोए वहन करी छे एवा आपने नमस्कार थाओ। गर्वरूपी मदिराने दूर फेंकनार एवा आपने नमस्कार थाओ। शुद्ध भाववडे आश्रवोने रोकनारा आपने नमस्कार थाओ ॥ ६० ॥

दीक्षाना वरघोडामां जेमनी आगळ महेन्द्रध्वज चाले छे एवा अपाने नमस्कार थाओ। त्यारपछी हाथीओ अने अश्वोना समूहो जेमना वरघोडामां चाले छे एवा आपने नमस्कार थाओ। जेमनी चारे बाजुए राजाओनो समूह चाले छे एवा आपने नमस्कार थाओ ॥ ६१ ॥

जेमनां दर्शनादि माटे ऊतरता देवो वडे पृथ्वीतल संकीर्ण थयुं छे एवा आपने नमस्कार थाओ। जेमनां दर्शनादि माटे ऊतरता देवो वडे आकाशमंडल दीपी रह्युं छे एवा आपने नमस्कार थाओ। जेमनी आगळ त्रण प्रकारना दिव्यवाजिंत्रो वागी रह्या छे एवा आपने नमस्कार थाओ ॥ ६२ ॥

देदीप्यमान रत्न सदृश प्रभा वडे शोभता आपने नमस्कार थाओ। जेमना बंदीजनोए करेल 'जय जय' आदि शब्दोथी दिशाओ अने आकाश निनादित थया एवा आपने नमस्कार थाओ। नगरना पुरुषो अने स्त्रीओथी दर्शन कराता आपने नमस्कार थाओ ॥ ६३ ॥

सर्व अंगोनां सर्व आभूषणोनो त्याग करता आपने नमस्कार थाओ। जेमना त्रिविध त्रिविध दूषणो नाश पाम्या छे एवा आपने नमस्कार थाओ। पांच मुष्टिवडे केशनुं लुंचन करनारा आपने नमस्कार थाओ ॥ ६४ ॥

नमस्ते समुद्दीर्णसामायिकाय, नमः सर्वदैव त्रिधाऽमायिकाय ।
नमस्सर्वसावद्ययोगोज्झिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६५ ॥

नमस्ते मनःपर्यवज्ञानशालिन् !, नमश्चारुचारित्रपावित्र्यमालिन् ॥
नमो नाथ ! षड्जीवकायावकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६६ ॥

नमस्ते समुद्यद्विहारक्रमाय, नमःकर्मवैरिस्फुरद्विक्रमाय ।
नमः स्वीयदेहेऽपि ते निर्ममाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६७ ॥

नमो ग्राम एकैकरात्रोषिताय, नमः पत्तने पञ्चरात्रोषिताय ।
नमो भावशुद्धैषणापोषिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६८ ॥

नमस्तुल्यरूपाय रात्रौ दिवा वा, नमस्तुल्यरूपाय तेऽन्तर्बहिश्च ।
(नमस्तुल्यचित्ताय दुःखे सुखे वा), नमस्ते नमस्ते नमस्ते नमस्ते ॥ ६९ ॥

नमस्तुल्यचित्ताय मित्रे रिपौ वा, नमस्तुल्यचित्ताय लोष्ठे मणौ वा ।
नमस्तुल्यचित्ताय गालौ स्तुतौ वा, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७० ॥

---

सामायिकव्रतनो उच्चार करता आपने नमस्कार थाओ। सर्वदा त्रिविधे अमायी एवा आपने नमस्कार थाओ। सर्व सावद्ययोगोथी रहित एवा आपने नमस्कार थाओ ॥ ६५ ॥

दीक्षासमये प्राप्त थयेल मनःपर्यवज्ञान वडे शोभता हे प्रभो ? आपने नमस्कार थाओ । मनोहर चारित्रनी पवित्रताथी शोभता हे प्रभो ? आपने नमस्कार थाओ। षट्जीवनिकायनुं रक्षण करनार हे नाथ ! आपने नमस्कार थाओ ॥ ६६ ॥

उद्यत विहारनी परंपरावाळा आपने नमस्कार थाओ । कर्मवैरीनो नाश करवामां प्रखर पराक्रमवाळा आपने नमस्कार थाओ। पोताना देह उपर पण ममता विनाना आपने वारंवार नमस्कार थाओ ॥ ६७ ॥

गाममां एक एक रात्रि रहेता आपने नमस्कार थाओ । नगरमां पांच पांच रात्रि रहेता आपने नमस्कार थाओ । भावशुद्ध एषणा वडे पोषित एवा आपने नमस्कार थाओ ॥ ६८ ॥

रात्रिमां के दिवसमां समभाववाळा आपने नमस्कार थाओ। आंतरिक अने बाह्य वस्तुओमां समान भाववाळा आपने नमस्कार थाओ। (सुखमां के दुःखमां समान चित्तवाळा आपने नमस्कार थाओ)॥ ६९ ॥

शत्रु के मित्रमां, लोष्ठ (ढेफुं) के मणिमां समान चित्तवाळा आपने नमस्कार थाओ। निंदा के स्तुतिमां सम चित्तवाळा आपने नमस्कार थाओ ॥ ७० ॥

---

१ सावद्य योगोनुं मन-वचन-कायाथी करण-'करापण-अनुमोदन'।

नमस्तुल्यचित्ताय मोक्षे भवे वा, नमस्तुल्यचित्ताय जीर्णे नवे वा।
नमस्तुल्यचित्ताय मेध्येऽशुचौ वा, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७१ ॥

नमस्ते प्रभो! मृत्युतो निर्भयाय, नमस्ते प्रभो! जीविते निःस्पृहाय।
नमस्ते प्रभो! ते स्वरूपे स्थिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७२ ॥

नमस्ते प्रभोऽनुत्तरक्षान्तिकर्त्रे, नमस्ते प्रभो! भुक्तिसम्भुक्तिकर्त्रे।
नमस्ते प्रभो! मार्दवाढ्यार्जवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७३ ॥

नमस्ते प्रभो! सत्तपस्संयमाय, नमस्ते स्फुरद्ब्रह्मणेऽकिञ्चनाय।
(नमस्ते प्रभो! सत्यशौचान्विताय), नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७४ ॥

नमस्ते प्रभो! युक्तिमन्निर्णयाय, नमो गुप्तवाक्कायचेतस्त्रयाय।
नमो धर्मसद्ध्यानतानैकताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७५ ॥

नमः श्रेणिमारोहते निष्प्रपातं, नमस्तन्वते सप्तदृग्मोहघातम्।
नमस्ते प्रभो! निर्गतायुस्त्रयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७६ ॥

---

मोक्ष के संसारमां समान चित्तवाळा आपने नमस्कार थाओ। जीर्ण के नवीनमां समान चित्तवाळा आपने नमस्कार थाओ। पवित्र के अशुचिमां सम चित्तवाला एवा आपने नमस्कार थाओ ॥ ७१ ॥

मृत्युथी निर्भय एवा हे प्रभो! आपने नमस्कार थाओ। जीवितमां पण स्पृहा विनाना एवा हे प्रभो! आपने नमस्कार थाओ। स्वरूपमां स्थित एवा हे प्रभो! आपने नमस्कार थाओ ॥ ७२ ॥

अनुत्तर क्षांति (क्षमा) ने करनारा (धरनारा) एवा हे प्रभो! आपने नमस्कार थाओ। निर्लोभिता सुखने करनारा (अनुभवनारा) एवा हे प्रभो! आपने नमस्कार थाओ। मृदुताथी सहित ऋजुतावाळा एवा हे प्रभो! आपने नमस्कार थाओ ॥ ७३ ॥

श्रेष्ठ तप अने संयमवाळा हे प्रभु! आपने नमस्कार थाओ। श्रेष्ठ ब्रह्मचर्यवाळा तथा अकिंचनतावाळा एवा आपने नमस्कार थाओ। (सत्य अने शौचथी युक्त एवा हे प्रभो! आपने नमस्कार थाओ) ॥ ७४ ॥

युक्तिसंगत निर्णयवाळा हे प्रभो! आपने नमस्कार थाओ। मन वचन ने कायाथी गुप्त एवा आपने नमस्कार थाओ। श्रेष्ठ प्रकारना धर्मध्यानमां एकतान एवा आपने नमस्कार थाओ ॥ ७५ ॥

अप्रतिपातिनी (क्षपक) श्रेणि पर आरोहण करता आपने नमस्कार थाओ। सात प्रकारना दर्शनमोहनीयनो घात करता आपने नमस्कार थाओ। त्रण प्रकारना आयुःकर्म (देवायु, तिर्यंचायु अने नारकायु) नी सत्ताथी रहित एवा हे प्रभो! आपने नमस्कार थाओ ॥ ७६ ॥

नमस्ते क्रमोद्यद्गुणस्थानकाय, नमस्ते परिक्षीणनिद्राभयाय ।
नमस्तेऽजुगुप्साय वेदोज्झिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७७ ॥

नमो विप्रमुक्ताय हास्येन रत्या, नमो विप्रमुक्ताय शोकारतिभ्याम् ।
नमस्ते क्षरन्नोकषायाय मूलात्, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७८ ॥

नमश्छिन्दते क्रोधमानौ दुरन्तौ, नमो निघ्नते दम्भलोभौ समूलम् ।
नमस्ते यथाख्यातचारित्रराज्ञे, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ७९ ॥

नमः क्षीणमोहाय सुस्नातकाय, नमो घातिकर्मद्विषद्घातकाय ।
नमो जातकर्मत्रिषष्टिक्षयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८० ॥

नमः प्रज्वलद्ध्यानदावानलाय नमोदग्धनिश्शेषकर्मोपलाय (कर्मेन्धनाय) ।
नमस्ते चतुःकर्मशेषोदयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८१ ॥

नमस्तेऽत्र कर्मद्वयोदीरकाय, नमस्सत्तयाऽशीतियुक्पञ्चकाय ।
नमो बध्नते त्रिक्षणस्थायिसातं, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८२ ॥

---

क्रमथी गुणठाणे चडता एवा आपने नमस्कार थाओ। त्रण निद्रा, भय, जुगुप्सा, अने त्रण वेदनो क्षय करनारा आपने नमस्कार थाओ ॥ ७७ ॥

हास्य नें रति थी रहित एवा आपने नमस्कार थाओ। शोक ने अरतिथी विमुक्त एवा आपने नमस्कार थाओ। नवे नोकषायनो मूळथी क्षय करनारा आपने नमस्कार थाओ ॥ ७८ ॥

दुरंत एवा क्रोध अने माननो छेद करनारा आपने नमस्कार थाओ। दंभ (माया) तथा लोभनो समूळ नाश करनारा आपने नमस्कार थाओ। यथाख्यात चारित्रना राजा (स्वामी) एवा आपने नमस्कार थाओ ॥ ७९ ॥

क्षीणमोह गुणठाणे पहोंचेला ने सुस्नातक (वीतराग) एवा आपने नमस्कार थाओ। चार घातीकर्मरूपी शत्रुनो घात करनारा आपने नमस्कार थाओ। जेमनी त्रेसठ कर्मप्रकृतिओनो क्षय थयो छे एवा आपने नमस्कार थाओ (आठ कर्मनी १४८ प्रकृतिनी गणनाए ६३ प्रकृति जतां ८५ प्रकृति रहे छे। तेनो क्षय चौदमे गुणठाणे ज थाय छे।) ॥ ८० ॥

जेमनो ध्यानरूपी दावानल प्रज्वलित छे एवा आपने नमस्कार थाओ। सकल घातिकर्मरूप इन्धनने भस्मसात करनार आपने नमस्कार थाओ। जेमने शेष चार अघातिकर्मो उदयमां छे एवा आपने नमस्कार थाओ ॥ ८१ ॥

नाम अने गोत्र कर्मनी उदीरणा करनार आपने नमस्कार थाओ। जेमने सत्तामां ८५ प्रकृतिओ रहेली छे एवा आपने नमस्कार थाओ। त्रिक्षणनी स्थितिवाळा सातावेदनीयने बांधनारा आपने नमस्कार थाओ। (पहेले समये बंधाय, बीजे समये वेदाय ने त्रीजे समये क्षय थाय ॥ ८२ ॥

नमो ध्यातशुक्लाद्यभेदद्वयाय, नमस्ते तृतीयान्तरालस्थिताय ।
नमः शुक्लेश्यास्थितौ निश्चलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८३ ॥

नमः केवलज्ञानसद्दर्शनाय, नमस्ते कृतार्हत्पदस्पर्शनाय ।
नमस्ते हताष्टादशाऽऽदीनवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८४ ॥

नमो जानते पश्यते सर्वलोकमलोकं तथैवाशु विद्वन्नमस्ते ।
नमो द्रव्यभावावबोधात्मकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८५ ॥

नमस्तत्क्षणायातदेवासुराय, नमोऽनुत्तरर्द्धिप्रभाभासुराय ।
नमो रत्नरैरूप्यवप्रत्रयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८६ ॥

नमस्ते चतुर्दिग्विराजन्मुखाय, नमस्तेऽभितः संसदां सत्सुखाय ।
नमो योजनच्छायचैत्यद्रुमाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८७ ॥

नमो योजनासीनतावज्जनाय, नमश्चैकवाग्बुद्धनानाजनाय ।
नमो भानुजैत्रप्रभामण्डलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८८ ॥

---

शुक्लध्यानना प्रथमना बे पायाओनुं ध्यान करता आपने नमस्कार थाओ । ध्यानांतरिकामां (बीजा त्रीजा पायाना आंतरामां—१३ मे गुणठाणे) वर्तता आपने नमस्कार थाओ । शुक्ललेश्यानी स्थितिमां निश्चळ एवा आपने नमस्कार थाओ ॥८३॥

केवळज्ञान अने केवलदर्शनवाळा आपने नमस्कार थाओ । अरिहंत पदनी स्पर्शना करनारा (तीर्थंकर नामकर्मने धर्मोपदेश वडे वेदता) आपने नमस्कार थाओ । अढार दोषथी रहित एवा आपने नमस्कार थाओ ॥ ८४ ॥

सर्व लोकने जोता अने जाणता आपने नमस्कार थाओ । तेवी ज रीते शीघ्रतः अलोकने जाणता आपने नमस्कार थाओ । सकल द्रव्यो अने तेमना सकल भावोना अवबोधरूप आपने नमस्कार थाओ ॥ ८५ ॥

जेमनी पासे तत्क्षण (केवळज्ञान थतां ज) सुरो अने असुरो आव्या छे एवा आपने नमस्कार थाओ । अनुत्तर एवी ऋद्धि अने प्रभाथी देदीप्यमान एवा आपने नमस्कार थाओ । जेमना समवसरणमां रत्न, सुवर्ण अने रूपाना त्रण गढ छे एवा आपने नमस्कार थाओ ॥ ८६ ॥

जेमनुं मुख चारे दिशाओमां शोभी रह्युं छे (चतुर्मुख) एवा आपने नमस्कार थाओ । चारे दिशाओमां बेठेली पर्षदाने श्रेष्ठ सुख आपनारा आपने नमस्कार थाओ । समवसरण पर एक योजनप्रमाण छाया करनार अशोकवृक्षनी नीचे शोभता एवा आपने नमस्कार थाओ ॥ ८७ ॥

जेमना समवसरणनी योजनप्रमाण भूमिमां करोडो जनो समाईने बेसी गया छे एवा आपने नमस्कार थाओ । एक ज वाणीथी अनेक जनोने जुदी जुदी रीते समजावनारा (वाणीना ३५ गुणोवाळा) आपने नमस्कार थाओ । सूर्यना तेजने जीतनार भामंडलवाळा आपने नमस्कार थाओ ॥ ८८ ॥

नमो दूरनष्टेतिवैरज्वराय, नमो नष्टदुर्वृष्टिरुग्विड्वराय ।
नमो नष्टसर्वप्रजोपद्रवाय, नमस्ते नमस्ते नमस्ते नमस्ते ।। ८९ ।।

नमो धर्मचक्रत्रसत्तामसाय, नमः केतुहृष्यत्सुदृग्मानसाय ।
नमो व्योमसञ्चारिसिंहासनाय, नमस्ते नमस्ते नमस्ते नमस्ते ।। ९० ।।

नमश्चामरैरष्टभिर्वीजिताय, नमः स्वर्णपद्माहिताङ्घ्रिद्वयाय ।
(नमो नाथ ! छत्रत्रयेणान्विताय), नमस्ते नमस्ते नमस्ते नमस्ते ।। ९१ ।।

नमोऽधोमुखाग्रीभवत्कण्टकाय, नमो ध्वस्तकर्मारिनिष्कण्टकाय ।
नमस्तेऽभितो नम्रमार्गद्रुमाय, नमस्ते नमस्ते नमस्ते नमस्ते ।। ९२ ।।

नमस्तेऽनुकूलीभवन्मारुताय, नमस्ते सुखाक्रन्दिहायोरुताय ।
नमस्तेऽम्बुसिक्ताभितो योजनाय, नमस्ते नमस्ते नमस्ते नमस्ते ।। ९३ ।।

नमो योजनाजानुपुष्पोच्चयाय, नमोऽवस्थितश्मश्रुकेशादिकाय ।
नमस्ते सुपञ्चेन्द्रियार्थोदयाय, नमस्ते नमस्ते नमस्ते नमस्ते ।। ९४ ।।

---

जेमनां संनिधाननां कारणे इति, जातिवैर अने ज्वरो दूर नासी गया छे एवा आपने नमस्कार थाओ। जेमनां संनिधानथी भयंकर वृष्टि, व्याधि अने अपशब्दो नाश पाम्या छे एवा आपने नमस्कार थाओ । जेमनां संनिधानथी प्रजाना सर्व उपद्रवो नाश पाम्या छे एवा आपने नमस्कार थाओ ॥ ८९ ॥

जेमनां धर्मचक्र (ना प्रकाश) वडे अंधकार त्रास पाम्यो छे एवा आपने नमस्कार थाओ। जेमना धर्मध्वजने जोवाथी सुदृष्टि जीवोनां मन हर्ष पाम्यां छे एवा आपने नमस्कार थाओ। जेमनी साथे सिंहासन पण आकाशमां चाले छे एवा आपने नमस्कार थाओ ॥ ९० ॥

आठ चामर वडे वींझाता आपने नमस्कार थाओ। स्वर्णकमळ उपर चरणद्वयने मूकनारा आपने नमस्कार थाओ। (हे नाथ ! छत्रत्रयथी सहित एवा आपने नमस्कार थाओ) ॥ ९१ ॥

जेमनां मार्गमांना कांटाओ अधोमुख थई जाय छे एवा आपने नमस्कार थाओ। कर्मशत्रुनो नाश करवाथी निष्कंटक थयेला आपने नमस्कार थाओ। जेमनी आजुबाजुना मार्गवृक्षो नमी रह्या छे एवा आपने नमस्कार थाओ ॥ ९२ ॥

जेमनां संनिधानमां पवन अनुकूल वाय छे एवा आपने नमस्कार थाओ। जेमनां संनिधानमां पक्षिओ मधुर ध्वनि करी रह्या छे एवा आपने नमस्कार थाओ। जेमनी आजुबाजु एक योजनमां सुगंधी जलनो छंटकाव थाय छे एवा आपने नमस्कार थाओ ॥ ९३ ॥

जेमना एक योजन प्रमाण समवसरणमां जानु पर्यंत पुष्पोनो समुच्चय (ढगलो) थाय छे एवा आपने नमस्कार थाओ; जेमना मस्तकना अने दाढी मूछना केश वगेरे अवस्थित रहे छे (दीक्षा लीधा पछी वधता नथी) एवा आपने नमस्कार थाओ। पांचे इन्द्रियोने अनुकूल विषयोनी प्राप्तिवाळा आपने नमस्कार थाओ ॥ ९४ ॥

नमो नाकिकोट्याऽविविक्तान्तिकाय, नमो दुन्दुभिप्रष्टभूमित्रिकाय ।
नमोऽभ्रंलिहाग्रोदितेन्द्रध्वजाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ९५ ॥
नमः प्रातिहार्याष्टकालङ्कृताय, नमो योजनव्याप्तवाक्यामृताय ।
नमस्ते विनालङ्कृतिं सुन्दराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ९६ ॥
नमस्तेऽन्वहं द्विर्भवद्देशनाय, नमस्सप्ततत्त्वाश्रितोद्देशनाय ।
नमः प्रोक्तषड्द्रव्यरूपत्रयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ९७ ॥
नमस्ते मतोत्पत्तिसत्त्वव्ययाय, नमस्ते त्रिपद्यात्तविश्वत्रयाय ।
नमस्त्रासितैकान्तवादिद्विपाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ९८ ॥
नमः क्लृप्ततीर्थस्थितिस्थापनाय, नमः सच्चतुःसङ्घसत्यापनाय ।
नमस्ते चतुर्भेदधर्मार्पकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ९९ ॥
नमः प्रोक्तनिःश्रेयसश्रीपथाय, नमो नाशितश्रावकान्तर्व्यथाय ।
नमस्तेऽस्तु रत्नत्रयीदीपकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०० ॥

---

जेमनी सेवामां जघन्यथी एक करोड देवताओ सदा रहे छे एवा आपने नमस्कार थाओ। जेमनी पासे वागती दुंदुभिनो नाद त्रण गढनी अन्तर्गत भूमिमां प्रसरी रहे छे एवा आपने नमस्कार थाओ। जेमनी आगल चालतो इन्द्रध्वज ऊँचे आकाशने स्पर्शे छे एवा आपने नमस्कार थाओ ॥ ९५ ॥

उपर प्रमाणेना आठ प्रातिहार्यथी अलंकृत एवा आपने नमस्कार थाओ। जेमनुं वचनामृत योजन सुधी प्रसरे छे एवा आपने नमस्कार थाओ। अलंकार विना पण अत्यन्त सुंदर एवा आपने नमस्कार थाओ ॥ ९६ ॥

दररोज बे वखत देशना आपता एवा आपने नमस्कार थाओ। सात तत्त्वने आश्रयीने देशना देनारा आपने नमस्कार थाओ। षड्द्रव्यना त्रण प्रकारना स्वरूपने कहेनारा आपने नमस्कार थाओ ॥ ९७ ॥

वस्तुमात्र उत्पाद, व्यय अने ध्रौव्य स्वरूप छे, एवुं जेमने अभिमत छे, एवा आपने नमस्कार थाओ। त्रिपदीवडे विश्वत्रयने ग्रहण करनार (जाणनार अने जणावनार) एवा आपने नमस्कार थाओ। एकान्तवादीरूप हस्तिओने त्रास पमाडनारा आपने नमस्कार थाओ ॥ ९८ ॥

केवलज्ञानवडे तीर्थनी मर्यादाने जाणीने तेने स्थापनारा एवा आपने नमस्कार थाओ। चतुर्विध संघनी सत्यापना (स्थापना) करनारा आपने नमस्कार थाओ। चतुर्विध[२] धर्मने आपनारा आपने नमस्कार थाओ ॥ ९९ ॥

मोक्षलक्ष्मीने प्राप्त करवानो मार्ग कहेनारा आपने नमस्कार थाओ। श्रावकोनी अन्तर्व्यथानो नाश करनार आपने नमस्कार थाओ, रत्नत्रयीना दीपक–प्रकाशक एवा आपने नमस्कार थाओ ॥ १०० ॥

---

१ उत्पाद, व्यय अने ध्रौव्य।
२ दान-शील-तप-भावरूप।

नृतिर्यक्सुरात्तस्वसामायिकाय, नमस्ते नमोऽमोघवाक्जायुकाय ।
नमो द्वादशप्रौढपर्षत्प्रियाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०१ ॥

नमः सार्थवाहाय मुक्त्यध्वगानाम्, नमोऽपारपाराय सूक्त्यापगानाम् ।
विहारैर्नमः पावितोर्वीतलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०२ ॥

नमो द्वादशाङ्गीनदीभूधराय, नमः सप्तभङ्गीचमूदुर्धराय ।
नमस्ते प्रमाणोपपन्नागमाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०३ ॥

नमो बुद्धतत्त्वाय तद्बोधकाय, नमः कर्ममुक्ताय तन्मोचकाय ।
नमस्तीर्णजन्माब्धये तारकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०४ ॥

नमो लोकनाथाय लोकोत्तमाय, नमस्ते त्रिलोकप्रदीपोपमाय ।
नमो निर्निदानं जनेभ्यो हिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०५ ॥

नमः पावनेभ्योऽपि ते पावनाय, नमः सिद्धियोगैः(गे) कृतोद्भावनाय ।
नमो दत्तनिःशेषजीवाभयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०६ ॥

---

जेमनी पासेथी मनुष्य, तिर्यंच अने देवोए स्वयोग्य सामायिक स्वीकार्युं छे एवा आपने नमस्कार थाओ। अमोघ वाणीवडे (भव्य जीवोनां हृदयने) जीतनारा आपने नमस्कार थाओ। प्रौढ बार पर्षदाओने प्रिय एवा आपने नमस्कार थाओ ॥ १०१ ॥

मुक्तिमार्गे गमन करनाराओना सार्थवाह (मुक्तिमार्गना पथिकोना स्वार्थ-योगक्षेमने वहन करनारा) एवा आपने नमस्कार थाओ। सूक्तिरूपी नदीओना समुद्र एवा आपने नमस्कार थाओ (जेम नदीओनो स्वामी समुद्र छे तेम सूक्तिओना स्वामी परमात्मा छे)। विहारो वडे पृथ्वीतलने पवित्र करनार एवा आपने नमस्कार थाओ ॥ १०२ ॥

द्वादशांगी-नदीना पर्वत—उद्गमस्थानभूत आपने नमस्कार थाओ। सप्तभंगीरूप सेनाथी दुर्धर एवा आपने नमस्कार थाओ। जेमना आगमो प्रमाणोवडे उपपन्न—युक्तिसंगत छे एवा आपने नमस्कार थाओ ॥ १०३ ॥

स्वयं तत्त्वने जाणनारा अने बीजाओने ते जणावनारा एवा आपने नमस्कार थाओ। स्वयं कर्मोथी मुक्त थयेला अने बीजा जीवोने कर्मोथी मुक्त करनारा एवा आपने नमस्कार थाओ। स्वयं संसार समुद्रने तरेला अने बीजाओने तारनारा एवा आपने नमस्कार थाओ ॥ १०४ ॥

लोकना नाथ अने लोकमां उत्तम एवा आपने नमस्कार थाओ। त्रणे लोकने प्रकाशवामां प्रदीप तुल्य एवा आपने नमस्कार थाओ। जीवोनुं निष्कारण (स्वभावथी ज) हित करनारा आपने नमस्कार थाओ ॥ १०५ ॥

पवित्रोथी पण पवित्र एवा आपने नमस्कार थाओ। मोक्षना योगोवडे (योगोनी) प्रभावना करनारा [सिद्धिना योग माटे तैयार थयेला (?)] आपने नमस्कार थाओ। सर्व जीवोने अभय आपनारा आपने नमस्कार थाओ ॥ १०६ ॥

नमोऽन्तर्मुहूर्तावशिष्टे यताय, नमः सारशैलेश्यवस्थोचिताय ।
नमस्ते चतुःकर्मतुल्यांशताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०७ ॥

नमस्ते क्रमाद्रुद्धयोगत्रयाय, नमो लेश्यया शुक्लयाऽप्युज्झिताय ।
नमः पूर्णशुक्लान्त्यभेदद्वयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०८ ॥

नमस्ते विशुद्धया महानिर्जराय, नमोऽशीतियुक्पञ्चकर्मोत्किराय ।
नमस्ते त्रिभागोनदेहोच्छ्रयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १०९ ॥

नमस्ते पतत्कार्मणौदारिकाय, नमोऽनादिसम्बन्धमुक्ताणुकाय ।
नमस्तत्क्षणाप्तस्थिरस्थानकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११० ॥

नमस्तत्र गत्याऽस्पृशन्त्या गताय, नमः सिद्धबुद्धाय पारङ्गताय ।
नमः साद्यनन्तस्थितिस्थायुकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १११ ॥

नमो वीतसंसारसत्क(त्ता)कथाय, नमो निर्जराजन्ममृत्युव्यथाय ।
नमः शाश्वतायामलायाचलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११२ ॥

---

आयुष्य अंतर्मुहूर्त बाकी रहे त्यारे योग निरोध माटे तैयार थयेला आपने नमस्कार थाओ । सारभूत एवी शैलेशी अवस्थाने योग्य एवा आपने नमस्कार थाओ । चार अघाति कर्मोना अंशोने केवलिसमुद्घातवडे सरखा करनारा आपने नमस्कार थाओ ॥ १०७ ॥

अनुक्रमे त्रण योगोने रोकनारा आपने नमस्कार थाओ । शुक्ललेश्याथी पण रहित एवा आपने नमस्कार थाओ । शुक्ल ध्यानना अंत्य बे भेदने पूर्ण करता आपने नमस्कार थाओ ॥ १०८ ॥

आत्म विशुद्धिवडे महानिर्जरा करनारा आपने नमस्कार थाओ । सत्तामां रहेली ८५ कर्मप्रकृतिने उखेडी नाखनारा आपने नमस्कार थाओ । जेमना देहनी ऊंचाई त्रिभागोन थयेल छे एवा आपने नमस्कार थाओ ॥ १०९ ॥

जेमनां कार्मण अने औदारिक शरीर खरी रह्यां छे एवा आपने नमस्कार थाओ । अनादि संबंधवाळा परमाणुओथी रहित बनेला आपने नमस्कार थाओ । ते ज क्षणमां (एक ज समयमां) मोक्षस्थानने प्राप्त करनारा एवा आपने नमस्कार थाओ ॥ ११० ॥

अस्पृशद् गतिवडे सिद्धस्थानमां गयेल आपने नमस्कार थाओ । सिद्ध, बुद्ध अने पारंगत एवा आपने नमस्कार थाओ । सादि-अनन्त स्थितिवडे (सिद्धस्थानमां) स्थित थयेला आपने नमस्कार थाओ ॥ १११ ॥

संसार संबंधी कथाथी रहित एवा आपने नमस्कार थाओ । जरा, जन्म ने मरणनी व्यथाथी रहित एवा आपने नमस्कार थाओ । शाश्वत, अमल अने अचल एवा आपने नमस्कार थाओ ॥ ११२ ॥

नमः केवलज्ञानदृग्लक्षणाय, नमोऽनुक्रमैकैकबोधक्षणाय ।
नमो ज्ञातदृष्टाखिलार्थप्रथाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११३ ॥

नमस्तेऽनुपाख्येयसौख्याह्वयाय, नमः स्वोत्थितानन्तवीर्योदयाय ।
नमोऽर्वाग्दृशां वाङ्मनोऽगोचराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११४ ॥

नमो देहभृद्देहदेवालयाय, नमस्तेऽत्र चैत्याय चैतन्यमूर्त्यां ।
नमः स्वाविभेदेन दक्षेक्षिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११५ ॥

नमो निर्विकाराय नीरञ्जनाय, नमो योगिलक्ष्याय निर्व्यञ्जिताय ।
नमस्तेऽनुमानोपमानातिगाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११६ ॥

नमः स्थापनाद्रव्यनामात्मकाय, नमस्ते पुनानाय कालत्रयेऽस्मान् ।
नमो भागधेयाय भव्याङ्गभाजां, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११७ ॥

नमस्ते प्रभो ! श्रीयुगादीश्वराय, नमस्तेऽजिताय प्रभो ! शम्भवाय ।
नमो नाथ ! सैद्धार्थतीर्थेश्वराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११८ ॥

---

केवलज्ञान ने केवलदर्शन स्वरूप आपने नमस्कार थाओ । क्रमसर (समयांतरे) ज्ञानदर्शनना बोध (उपयोग) वाळा आपने नमस्कार थाओ । सर्व पदार्थोना विस्तार (सर्व पर्यायो) ने जाणनारा अने जोनारा एवा आपने वारंवार नमस्कार थाओ ॥ ११३ ॥

जेमनुं सुख वाणीद्वारा कही शकाय तेवुं नथी एवा आपने नमस्कार थाओ । आत्मामांथी ज उत्पन्न थयेला अनन्तवीर्यना उदयवाळा आपने नमस्कार थाओ । छद्मस्थोनी वाणीने अने मनने अगोचर एवा आपने नमस्कार थाओ ॥ ११४ ॥

प्राणीओनो देह छे मंदिर जेमनुं एवा आपने नमस्कार थाओ । ते मंदिरमां चैतन्यमूर्तिवडे चैत्यरूप आपने नमस्कार थाओ । दक्ष जनो वडे अविभेदपणे (अभेद ध्यानवडे) जोवाता एवा आपने नमस्कार थाओ ॥ ११५ ॥

निर्विकार अने निरंजन एवा आपने नमस्कार थाओ । योगी जनोने लक्ष्य, तथा जेमनुं स्वरूप व्यंजना वृत्तिथी जाणी शकाय तेवुं नथी एवा आपने नमस्कार थाओ । अनुमान अने उपमान प्रमाणथी पण पर स्वरूपवाळा आपने नमस्कार थाओ ॥ ११६ ॥

स्थापना, द्रव्य अने नामात्मक एवा आपने नमस्कार थाओ । अमने (संसारी जीवोने) त्रणे काळमां पवित्र करता एवा आपने नमस्कार थाओ । भव्य प्राणिओना भाग्यरूप आपने नमस्कार थाओ ॥ ११७ ॥

श्रीयुगादीश्वर रूप हे प्रभो ! आपने नमस्कार थाओ । श्रीअजितनाथ तथा श्रीसंभवनाथरूप हे प्रभो ! आपने नमस्कार थाओ । हे नाथ ! श्रीसिद्धार्था माताना पुत्र श्रीअभिनंदन, आपने नमस्कार थाओ ॥ ११८ ॥

---

१. अहींथी सामान्य अरिहंत (आर्हन्त्य शक्ति) नी स्तुति होवाथी एक वचननो प्रयोग समजवो ।

नमो माङ्गलीयस्फुरन्मङ्गलाय, नमस्ते महःसद्मपद्मप्रभाय ।
नमस्ते सुपार्श्वाय चन्द्रप्रभाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ ११९ ॥

नमः पुष्पदन्ताय ते शीतलाय, नमः श्रीजितेन्द्राय ते वैष्णवाय ।
नमो वासुपूज्याय पूज्याय सद्भिः, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२० ॥

नमः श्यामया सुप्रसूताय नेतः, नमोऽनन्तनाथाय धर्मेश्वराय ।
नमः शान्तये कुन्थुनाथाय तुभ्यं, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२१ ॥

नमस्तेऽप्यराख्येश ! नम्रामराय, नमो मल्लिदेवाय ते सुव्रताय ।
नमस्ते नमिस्वामिने नेमयेऽर्हन् !, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२२ ॥

नमस्ते प्रभो ! पार्श्वविश्वेश्वराय, नमस्ते विभो ! वर्द्धमानाभिधाय ।
नमोऽचिन्त्यमाहात्म्यचिद्वैभवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२३ ॥

नमस्तेऽवसर्प्पिण्यभिख्येऽत्र काले, नमस्ते चतुर्विंशतावर्चिताङ्घ्रे ।
नमः केवलज्ञानिमुख्याह्वयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२४ ॥

---

मंगला माताना पुत्र परम मंगलरूप श्रीसुमतिनाथरूप आपने नमस्कार थाओ। तेजना धामरूप श्रीपद्मप्रभप्रभु रूप आपने नमस्कार थाओ। श्रीसुपार्श्वनाथ अने श्रीचन्द्रप्रभ रूप आपने नमस्कार थाओ ॥ ११९ ॥

श्रीपुष्पदंत (सुविधिनाथ) तथा शीतलनाथ रूप आपने नमस्कार थाओ। श्रीविष्णुमाताना पुत्र श्रीश्रेयांसनाथ रूप आपने नमस्कार थाओ। सज्जनोने पूज्य एवा श्रीवासुपूज्यस्वामी रूप आपने नमस्कार थाओ ॥ १२० ॥

श्यामा माताना सुपुत्र श्रीविमलनाथरूप हे परमनेता ! आपने नमस्कार थाओ। श्रीअनंतनाथ तथा श्रीधर्मनाथरूप आपने नमस्कार थाओ। श्रीशान्तिनाथ तथा श्रीकुंथुनाथरूप आपने नमस्कार थाओ ॥ १२१ ॥

देवोथी वंदित श्री अरनाथ नामक प्रभो ! आपने नमस्कार थाओ। श्रीमल्लिदेव अने श्रीमुनिसुव्रत-रूप आपने नमस्कार थाओ। श्रीनमिनाथ अने श्रीनेमिनाथरूप हे अरिहंत ! आपने नमस्कार थाओ ॥ १२२ ॥

विश्वेश्वर श्रीपार्श्वनाथरूप हे प्रभो आपने नमस्कार थाओ। श्रीवर्द्धमान नामक हे विभो ! आपने नमस्कार थाओ। अचिन्त्य माहात्म्य अने अचिंत्य ज्ञानरूप वैभवथी शोभता आपने नमस्कार थाओ ॥ १२३ ॥

अवसर्पिणी नामना आ काळमां थयेली चोवीशीमां पूजायेला चरणकमळवाळा आपने नमस्कार थाओ। (अतीतकाळे थयेला) श्री केवळज्ञानी वगेरे नामवाळा चोवीश तीर्थंकरोने नमस्कार थाओ ॥ १२४ ॥

नमोऽनागतोत्सर्प्पिणीकालभोगे, चतुर्विंशतावेष्यदार्हन्त्यशक्त्यै ।
नमः स्वामिने पद्मनाभादिनाम्ने, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२५ ॥

दशस्वप्यथैवं नमः कर्मभूषु, चतुर्विंशतौ ते नमोऽनन्तमूर्त्यै ।
नमोऽध्यक्षमूर्त्यै विदेहावनीषु, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२६ ॥

नमस्ते प्रभो ! स्वामिसीमन्धराय, नमस्तेऽधुनार्हन्त्यलक्ष्मीवराय ।
नमः प्राग्विदेहावनीमण्डनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२७ ॥

नमस्तेऽधुना द्विग्विदेहोद्गताय, नमस्ते दशद्वैतदेवाद्भुताय ।
नमः सन्ततप्रातिहार्याष्टकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२८ ॥

नमो भूर्भुवः स्वस्त्रयीशाश्वताय, नमस्ते त्रिलोकीस्थिरस्थापनाय ।
नमो देवमर्त्त्यासुराभ्यर्चिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १२९ ॥

नमः स्वर्विमानेषु देवार्चिताय, नमो ज्योतिष्केष्विन्दुसूर्यैर्नताय ।
नमोऽथापि नम्रासुरव्यन्तराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३० ॥

---

अनागत (आवता) उत्सर्पिणी काळ संबंधी चोवीशीमां आर्हन्त्य (अरिहंतपणुं) रूप शक्तिने धारण करनारा श्रीपद्मनाभादि नामवाळा श्री जिनेश्वरोने नमस्कार थाओ ॥ १२५ ॥

ए ज प्रमाणे दशे कर्मभूमि (पांच भरत अने पांच ऐरवत) मां नी चोवीशीओमां अनंत मूर्तिरूप आपने नमस्कार थाओ। महाविदेहनी भूमिओमां अध्यक्ष (प्रत्यक्ष) मूर्तिवाळा विहरमान तीर्थंकरोने नमस्कार थाओ ॥ १२६ ॥

विरहमान तीर्थंकर श्रीसीमंधरस्वामिरूप हे प्रभो ! आपने नमस्कार थाओ। अत्यारे अर्हंतपणानी लक्ष्मीना स्वामी एवा हे श्रीसीमंधर प्रभो ! आपने नमस्कार थाओ। पूर्व महाविदेहनी भूमिना मंडन हे सीमंधर प्रभो ! आपने नमस्कार थाओ ॥ १२७ ॥

अत्यारे प्रत्यक्षपणे बन्ने बाजुना विदेहोमां रहेला वीश अद्भुत तीर्थंकररूप आपने नमस्कार थाओ। सदा (सुंदर) अष्ट महाप्रातिहार्य सहित एवा आपने नमस्कार थाओ ॥ १२८ ॥

स्वर्ग, मर्त्य ने पाताळ रूप त्रणे लोकमां शाश्वत एवा आपने नमस्कार थाओ। त्रणे लोकमां स्थिर छे स्थापना जेमनी एवा आपने (शाश्वत स्थापना जिनोने) नमस्कार थाओ। मनुष्यो, देवो अने असुरोथी अर्चित एवा आपने नमस्कार थाओ ॥ १२९ ॥

स्वर्गलोकना विमानोमां देवोथी पूजित एवा आपने नमस्कार थाओ। ज्योतिष्क विमानोमां सूर्येंद्रो अने चन्द्रेन्द्रोवडे नमस्कार कराता आपने नमस्कार थाओ। असुरो (भवनपति देवो) अने व्यंतरो वडे नमस्कार कराता आपने नमस्कार थाओ ॥ १३० ॥

नमोऽलङ्कृतस्वेष्टभूभृद्वराय, नमो व्याप्तनिश्शेषशस्यास्पदाय ।
नमः सर्वविश्वस्थितिस्थापकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३१ ॥

नमस्तीर्थराजाय तेऽष्टापदाय, नमः स्वर्णरत्नार्हदर्चास्पदाय ।
नमस्ते नतश्राद्धविद्याधराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३२ ॥

नमस्तीर्थसम्मेतशैलाह्वयाय, नमो विंशतिप्राप्तनिःश्रेयसाय ।
नमःश्रव्यदिव्यप्रभावाश्रयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३३ ॥

नमश्चोज्जयन्ताद्रितीर्थोत्तमाय, नमो जातनेमित्रिकल्याणकाय ।
नमः शोभितोद्धारसौराष्ट्रकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३४ ॥

नमस्तेऽर्बुदायाप्तचैत्यार्बुदाय, नमो भव्यहृत्केकिलोकाम्बुदाय ।
नमः प्राच्यवंशेभ्यकीर्तिध्वजाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३५ ॥

नमस्ते प्रभो ! पार्श्वशङ्खेश्वराय, नमस्ते यशोगौरगोडीधराय ।
नमस्ते वरकाणतीर्थेश्वराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३६ ॥

---

जेणे (आर्हन्त्यशक्तिए) पोतानी स्थापनाओ वडे श्रेष्ठ पर्वतो अलङ्कृत कर्या छे एवा आपने नमस्कार थाओ । सर्व प्रशस्त स्थानोमां व्याप्त एवा आपने नमस्कार थाओ । सर्व विश्वस्थितिना स्थापक एवा आपने नमस्कार थाओ ॥ १३१ ॥

तीर्थाधिराज अष्टापदने नमस्कार थाओ । स्वर्ण अने रत्ननी जिन प्रतिमाओथी शोभता ते तीर्थने नमस्कार थाओ । श्रद्धावान विद्याधरो वडे नमस्कृत ते तीर्थने नमस्कार थाओ ॥ १३२ ॥

सम्मेतशैल नामना तीर्थने नमस्कार थाओ । ज्यां वर्तमान चोवीशीना २० तीर्थंकरो मोक्ष पाम्या एवा ते तीर्थने नमस्कार थाओ । सांभळवा योग्य दिव्य प्रभावना आश्रयभूत ते तीर्थने नमस्कार थाओ ॥ १३३ ॥

श्री उज्जयन्ताद्रि (गिरनार) नामना उत्तम तीर्थने नमस्कार थाओ । ज्यां श्री नेमिनाथ प्रभुना त्रण कल्याणक थया छे एवा ते तीर्थने नमस्कार थाओ । सुंदर उद्धारोवडे जे सौराष्ट्रदेशने शोभावी रह्युं छे एवा श्री शत्रुंजय तीर्थाधिराजने नमस्कार थाओ । ॥ १३४ ॥

परम-आप्त श्री जिनेश्वर भगवंतना चैत्यो वडे अर्बुद (शोभित) एवा अर्बुदाचलने नमस्कार थाओ । भव्यजनोना हृदयरूप मयूरोने आह्लादित करनार मेघसमान ए तीर्थने नमस्कार थाओ । प्राच्य (प्राग्वाट) वंशना धनाढ्योनी कीर्तिना ध्वजरूप ए तीर्थने वारंवार नमस्कार थाओ ॥ १३५ ॥

श्रीशंखेश्वर पार्श्वनाथ नामना हे प्रभु ! आपने नमस्कार थाओ । यशवडे उज्ज्वल एवा श्री गोडी पार्श्वनाथने नमस्कार थाओ । वरकाणा तीर्थना स्वामी श्री वरकाणा पार्श्वनाथने नमस्कार थाओ ॥ १३६ ॥

नमस्तेऽन्तरिक्षाय वामाऽङ्गजाय, नमः सूरतस्थाय ते दिग्गजाय ।
नमो नाथ ! जीराउलीमण्डनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३७ ॥

नमो देशपूर्यादिनानाह्वयाय, नमो ध्येयनाम्ने महिम्नाऽव्ययाय ।
नमस्ते कृतारिष्टदुष्टक्षयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३८ ॥

नमो वर्द्धमानप्रभोः शासनाय, नमस्ते चतुर्वर्णसङ्घाय नित्यम् ।
नमो मन्त्रराजाय ते ध्येयपञ्च !, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १३९ ॥

नमो जैनसिद्धान्तदुग्धार्णवाय, नमोऽनेकतत्त्वार्थरत्नाश्रयाय ।
नमो हृ (हृ)द्यविद्येन्दिरासुन्दराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १४० ॥

नमो दर्शनज्ञानचारित्रशुद्ध्यै, नमो भव्यसर्वोपधा(पाप) शुद्ध्यै ।
नमो भावनिर्ग्रन्थतथ्यक्रियायै, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १४१ ॥

नमः श्राद्धधर्माय दानोत्तमाय, नमस्ते चतुर्वर्गसिद्धिक्षमाय ।
नमस्ते चतुःशालकल्पद्रुमाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥ १४२ ॥

---

वामा माताना पुत्र अंतरिक्ष पार्श्वनाथने नमस्कार थाओ। सुरतमां रहेला दिग्गज पार्श्वनाथने नमस्कार थाओ। श्री जीराउली मंडन पार्श्वनाथने नमस्कार थाओ ॥ १३७ ॥

देश, नगर वगेरेने अनुसरता अनेक नामोवाळा आपने नमस्कार थाओ। जेमनुं नाम ध्येय छे अने महिमा वडे अव्यय एवा आपने नमस्कार थाओ। दुष्ट अरिष्टोनो क्षय करनारा आपने वारंवार नमस्कार थाओ ॥ १३८ ॥

श्रीवर्द्धमान प्रभुना शासनने नमस्कार थाओ। श्रीचतुर्विध संघने सदा नमस्कार थाओ। पांच ध्येयवाळा मंत्रराज (नवकार) ने नमस्कार थाओ ॥ १३९ ॥

जैन सिद्धान्तरूपी क्षीरसमुद्रने नमस्कार थाओ। अनेक तत्त्वार्थरूप रत्नना आश्रयभूत ते जैनसिद्धान्तरूप क्षीरसमुद्रने नमस्कार थाओ। मनोहर विद्यालक्ष्मीवडे शोभता ते जैनसिद्धान्तरूप क्षीरसमुद्रने नमस्कार थाओ ॥ १४० ॥

दर्शन ज्ञान अने चारित्रनी शुद्धिने नमस्कार थाओ। भव्य एवां सर्व साधनो वडे थती पापशुद्धिने नमस्कार थाओ। भावनिर्ग्रंथनी तथ्य (यथार्थ) क्रियाने नमस्कार थाओ। (अथवा दर्शन ज्ञान चारित्रनी शुद्धिने करनारी अने भव्य एवां सर्व साधनोवडे पापशुद्धिने करनारी एवी भावनिर्ग्रन्थनी तथ्य क्रियाने नमस्कार हो) ॥ १४१ ॥

दानवडे उत्तम एवा श्राद्धधर्मने नमस्कार थाओ। चारे वर्गनी (पुरुषार्थनी) सिद्धि करवामां समर्थ एवा श्राद्धधर्मने नमस्कार थाओ। दानादि चार प्रकारना धर्मरूप शाखाओवाळा कल्पवृक्ष समान श्रावकधर्मने नमस्कार थाओ ॥ १४२ ॥

नमो जैनवागीश्वरीदेवतायै, नमो वैनयिक्या सुधीसेवितायै ।
नमो वाङ्मयामोघपीयूषवृष्ट्यै, नमस्ते नमस्ते नमस्ते नमस्ते ।। १४३ ।।
नमस्कार एकोऽपि चेत्तीर्थनेतुर्जनांस्तारयत्येव संसारवार्द्धेः ।
तदेतत्सहस्रं पुनः किं न हन्यान्नृणाङ्किल्बिषम्भूरिजन्मान्तरोत्थम् ।। १४४ ।।

तथा चाहु :—

इक्को वि नमुक्कारो, जिणवरवसहस्स वद्धमाणस्स ।
संसारसागराओ, तारेइ नरं व नारिं वा ।। १४५ ।।
स्तवोऽयं प्रातरुदित-स्तमस्स्तोमच्छिदर्हताम् ।
नमस्कारसहस्रेण, सहस्रकिरणायताम् ।। १४६ ।।
सहस्रकिरणस्येव, स्तवस्यास्य प्रभावतः ।
दूरे दोषाः पलायन्ते, पुण्याहः प्रकटो भवेत् ।। १४७ ।।
स्थित्वा वर्षारात्रं, गन्धारे, क्ष्माग्निसंयममितेऽब्दे (१७३१)
श्रीविजयप्रभसूरि-, प्रसादतः स्तोत्रमिदमुदितम् ।। १४८ ।।

---

जिनवाणीनी अधिष्ठात्री श्रीवागीश्वरीदेवीने नमस्कार थाओ। विनय वडे बुद्धिमानोए सेवेली एवी ते देवीने नमस्कार थाओ। वाणीमय अमोघ अमृतने वरसावनारी ते देवीने नमस्कार थाओ अथवा वैनयिकी बुद्धि वडे (विनय वडे) बुद्धिमान पुरुषो वडे सेवित अने सुवचनरूप अमोघ अमृतने वरसावनारी एवी श्री जिनवाणी-रूप देवताने नमस्कार थाओ ।। १४३ ।।

(उपर प्रमाणेना १४३ काव्योमां दरेकमां सात सात वार '**नमः**' शब्द आवतो होवाथी एकंदर एक हजारने एक वार नमस्कार थयेल छे।)

तीर्थंकर भगवंतने एक वार करेलो नमस्कार पण मनुष्योने संसार-समुद्रथी तारे छे तो पछी आ हजार वार करेल नमस्कार मनुष्योनां अनेक जन्मोनां करेलां पापोनो नाश शुं न करे ? अर्थात् जरूर करे ।। १४४ ।।

कह्युं छे के—

जिनेश्वरोमां वृषभ समान श्रीवर्द्धमान स्वामीने करायेलो एक पण नमस्कार संसार-सागरथी पुरुष अथवा स्त्रीने तारे छे ।। १४५ ।।

सवारमां गवायेलुं आ अरिहंतोनुं स्तवन हजार नमस्कार वडे सहस्र (हजार) किरणवाळा सूर्य सदृश अज्ञानांधकारनुं नाशक थाओ ।। १४६ ।।

सहस्र किरणवाळा सूर्यनी जेम आ स्तवना प्रभावथी सर्व दोष रूप दोषा (रात्रि) दूर थाय छे अने पुण्यरूप दिवस प्रगट थाय छे ।। १४७ ।।

गंधार नगरमां वर्षारात्र (चातुर्मास) रहीने संवत १७३१ वर्षे गच्छाधिपति श्रीविजयप्रभसूरिनी कृपाथी आ स्तोत्र रचवामां आव्युं छे ।। १४८ ।।

श्रीहीरहीरविजयाह्वयसूरिशिष्य-
श्रीकीर्तिकीर्तिविजयाभिधवाचकानाम् ।
शिष्येण ढौकितमिदं भगवत्पदाग्रे,
स्तोत्रं सुवर्णरचितं विनयाभिधेन ॥ १४९ ॥

॥ इति महामहोपाध्यायश्रीविनयविजयवाचकपुङ्गवविरचितं श्रीजिनसहस्रनाम स्तोत्रं सम्पूर्णम् ।

---

हीरला श्रीहीरविजयसूरि[1]'ना शिष्य सुंदर कीर्तिवाळा श्रीकीर्तिविजय उपाध्यायना श्रीविनयविजय नामना शिष्ये सुवर्ण (सारा अक्षरो) वडे रचेलुं आ स्तोत्र भगवंतना चरणकमलोमां धर्युं छे ॥ १४९ ॥

इति श्रीजिनसहस्रनामस्तोत्र सार्थ सम्पूर्ण ।

## परिचय

श्री 'जिनसहस्रनामस्तोत्र' (गुजराती अर्थयुक्त) श्रीजैनधर्मप्रसारक सभा, भावनगर तरफथी वि. सं. १९९४ मां प्रकाशित थयेलुं छे ।

आ स्तोत्रना कर्ता महामहोपाध्याय श्रीविनयविजयजी महाराज छे। तेओ काव्य, व्याकरण, न्याय, आगम वगेरे अनेक शास्त्रोमां निपुण हता। तेमना लोकप्रकाश, कल्पसूत्रसुबोधिका, शान्त-सुधारस, विनयविलास वगेरे अनेक ग्रंथो प्रसिद्ध छे। तेओश्रीए आ स्तोत्र वि. सं. १७३१ मां गांधार नगरमां चातुर्मासमां रचेलुं छे। आखुं स्तोत्र भुजङ्गवृत्तमां होवाथी गेय छे अने तेथी ज कर्णप्रिय, मनोहर अने शुभभाववर्धक छे ।

तेना मुख्य श्लोक १४३ छे। ते दरेकमां सात वार 'नमः' पद आवे छे। ए रीते एकन्दर १००१ वार परमात्माने नमस्कार थाय छे। तेथी 'जिनसहस्रनामस्तोत्र' ए नाम सार्थक छे। वळी 'नम्' धातु उपर भाववाचक नाम 'नाम' पण थई शके छे। ए अपेक्षाए प्रस्तुत ग्रन्थनुं नाम अधिक सार्थक लागे छे.

श्लोक २१ थी ११७ मां श्रीतीर्थंकर भगवंतोनुं स्वर्ग-च्यवनथी मांडीने मोक्षगमन सुधीनुं सामान्य चरित्र क्रमशः अत्यन्त सुन्दर रीते रजु कर्युं छे। त्यार पछी सर्व नमस्करणीय तत्त्वोने सुंदर रीते स्तव्यां छे। आ स्तोत्रमांना केटलांक विशेषणो तो अर्थनी दृष्टिए बहुज गंभीर छे। उच्च प्रकारना आराधक-भाव विना ए विशेषणोनुं सर्जन शक्य नथी।

श्रीतीर्थंकर परमात्मानी भक्ति जेमने अत्यन्त प्रिय छे, एवा मुमुक्षुओ माटे आ स्तोत्र कंठस्थ करवा योग्य छे। कंठस्थ कर्या पछी प्रभु सन्मुख प्रशान्त वातावरणमां ज्यारे एने गावामां आवे छे, त्यारे एनाथी जे चित्तनी प्रसन्नता प्राप्त थाय छे, तेनुं वर्णन अहीं शी रीते करी काय ?

'नमस्कार महामन्त्र'ना प्रथम-पदना अर्थने आ स्तोत्र सुंदर रीते व्यक्त करनारुं होवाथी प्रस्तुत ग्रन्थमां अमे एनो संग्रह करेल छे.

---

१ श्री अने ह्री देवताओ जेमने सुप्रसन्न छे एवा श्री हीरविजयसूरि अने श्री अने कीर्ति जेमने सुप्रसन्न छे एवा श्री कीर्तिविजय उपाध्याय००० एवो अर्थ पण कदाच ग्रंथकर्ताने अभिप्रेत होय ।

# पण्डित-आशाधरविरचितं
# जिनसहस्रनामस्तवनम् ॥

प्रभो भवाङ्गभोगेषु, निर्विण्णो दुःखभीरुकः ।
एष विज्ञापयामि त्वां, शरण्यं करुणार्णवम् ॥ १ ॥
सुखलालसया मोहाद्, भ्राम्यन् बहिरितस्ततः ।
सुखैकहेतोर्नामापि, तव न ज्ञातवान् पुरा ॥ २ ॥
अद्य मोहग्रहावेशशैथिल्यात् किञ्चिदुन्मुखः ।
अनन्तगुणमाप्तेभ्यस्त्वां श्रुत्वा स्तोतुमुद्यतः ॥ ३ ॥
भक्त्या प्रोत्साह्यमानोऽपि, दूरं शक्त्या तिरस्कृतः ।
त्वां नामाष्ट(ष्टाग्र)सहस्रेण, स्तुत्वाऽऽत्मानं पुनाम्यहम् ॥ ४ ॥
जिन-सर्वज्ञ-यज्ञार्ह-तीर्थकृन्नाथ-योगिनाम् ।
निर्वाण-ब्रह्म-बुद्धान्तकृतां चाष्टोत्तरैः शतैः ॥ ५ ॥

तद्यथा—

## १ अथ जिनशतम्

जिनो जिनेन्द्रो जिनराड्, जिनपृष्ठो जिनोत्तमः ।
जिनाधिपो जिनाधीशो, जिनस्वामी जिनेश्वरः ॥ ६ ॥
जिननाथो जिनपतिर्जिनराजो जिनाधिराट् ।
जिनप्रभुर्जिनविभुर्जिनभर्ता जिनाधिभूः ॥ ७ ॥
जिननेता जिनेशानो, जिनेनो जिननायकः ।
जिनेट् जिनपरिवृढो, जिनदेवो जिनेशिता ॥ ८ ॥
जिनाधिराजो जिनपो, जिनेशी जिनशासिता ।
जिनाधिनाथोऽपि जिनाधिपतिर्जिनपालकः ॥ ९ ॥
जिनचन्द्रो जिनादित्यो, जिनार्को जिनकुञ्जरः ।
जिनेन्दुर्जिनधौरेयो, जिनधुर्यो जिनोत्तरः ॥ १० ॥
जिनवर्यो जिनवरो, जिनसिंहो जिनोद्वहः ।
जिनर्षभो जिनवृषो, जिनरत्नं जिनोरसम् ॥ ११ ॥
जिनेशो जिनशार्दूलो, जिनाग्र्यो जिनपुङ्गवः ।
जिनहंसो जिनोत्तंसो, जिननागो जिनाग्रणीः ॥ १२ ॥
जिनप्रवेकश्च जिनग्रामणीर्जिनसत्तमः ।
जिनप्रवर्हः परमजिनो, जिनपुरोगमः ॥ १३ ॥
जिनश्रेष्ठो जिनज्येष्ठो, जिनमुख्यो जिनाग्रिमः ।
श्रीजिनश्चोत्तमजिनो, जिनवृन्दारकोऽरिजित् ॥ १४ ॥

निर्विघ्नो विरजाः शुद्धो, निस्तमस्को निरञ्जनः ।
घातिकर्मान्तकः कर्ममर्मावित् , कर्महाऽनघः ॥ १५ ॥
वीतरागोऽक्षुद(ब)द्वेषो, निर्मोहो निर्मदोऽगदः ।
वि(वै)तृष्णो निर्ममोऽसंगो, निर्भयो वीतविस्मयः ॥ १६ ॥
अस्वप्नो निःश्रमोऽजन्मा, निःस्वेदो निर्जरोऽमरः ।
अरत्यतीतो निश्चिन्तो, निर्विषादस्त्रिषष्टिजित् ॥ १७ ॥

## २ अथ सर्वज्ञशतम्

सर्वज्ञः सर्ववित्सर्वदर्शी सर्वावलोकनः ।
अनन्तविक्रमोऽनन्तवीर्योऽनन्तसुखात्मकः ॥ १८ ॥
अनन्तसौख्यो विश्वज्ञो, विश्वदृश्वाऽखिलार्थदृक् ।
न्यक्षदृग्विश्वतश्चक्षुर्विश्वचक्षुरशेषवित् ॥ १९ ॥
आनन्दः परमानन्दः, सदानन्दः सदोदयः ।
नित्यानन्दो महानन्दः, परानन्दः परोदयः ॥ २० ॥
परमोजः परंतेजः, परंधाम परंमहः ।
प्रत्यग्ज्योतिः परंज्योतिः, परंब्रह्म परंरहः ॥ २१ ॥
प्रत्यगात्मा प्रबुद्धात्मा, महात्माऽऽत्ममहोदयः ।
परमात्मा प्रशान्तात्मा, परात्माऽऽत्मनिकेतनः ॥ २२ ॥
परमेष्ठी महिष्ठात्मा, श्रेष्ठात्मा स्वात्मनिष्ठितः ।
ब्रह्मनिष्ठो महानिष्ठो, निरूढात्मा दृढात्मदृक् ॥ २३ ॥
एकविद्यो महाविद्यो, महाब्रह्मपदेश्वरः ।
पंचब्रह्ममयः सार्वः, सर्वविद्येश्वरः स्वभूः ॥ २४ ॥
अनन्तधीरनन्तात्माऽनन्तशक्तिरनन्तदृक् ।
अनन्तानन्तधीशक्तिरनन्तचिदनन्तमुत् ॥ २५ ॥
सदाप्रकाशः सर्वार्थसाक्षात्कारी समग्रधीः ।
कर्मसाक्षी जगच्चक्षुरलक्ष्यात्माऽचलस्थितिः ॥ २६ ॥
निराबाधोऽप्रतर्क्यात्मा, धर्मचक्री विदांवरः ।
भूतात्मा सहजज्योतिर्विश्वज्योतिरतीन्द्रियः ॥ २७ ॥
केवली केवलालोको, लोकालोकविलोकनः ।
विविक्तः केवलोऽव्यक्तः, शरण्योऽचिन्त्यवैभवः ॥ २८ ॥
विश्वभृद्विश्वरूपात्मा, विश्वात्मा विश्वतोमुखः ।
विश्वव्यापी स्वयंज्योतिरचिन्त्यात्माऽमित(मल)प्रभः ॥ २९ ॥
महौदार्यो महाबोधिर्महालाभो महोदयः ।
महोपभोगः सुगतिर्महाभोगो महाबलः ॥ ३० ॥

## ३ अथ यज्ञार्हशतम्

यज्ञार्हो भगवानर्हन्महार्हो मघवार्चितः ।
भूतार्थयज्ञपुरुषो, भूतार्थक्रतुपूरुषः ॥ ३१ ॥

पूज्यो भट्टारकस्तत्रभवानत्रभवान् महान् ।
महामहा(हो ऽ)र्हस्तत्रायुस्ततो दीर्घायुरर्घ्यवाक् ॥ ३२ ॥
आराध्यः परमाराध्यः, पञ्चकल्याणपूजितः ।
दृग्विशुद्धिगणोदग्रो, वसुधारार्चितास्पदः ॥ ३३ ॥
सुस्वप्नदर्शी दिव्यौजाः, शचीसेवितमातृकः ।
*स्याद्रत्नगर्भः श्रीपूतगर्भो गर्भोत्सवोच्छ्रितः ॥ ३४ ॥
दिव्योपचारोपचितः, पद्मभूर्निष्कलः स्वजः ।
सर्वीयजन्मा पुण्याङ्गो, भास्वानुद्भूतदैवतः ॥ ३५ ॥
विश्वविज्ञातसंभूतिर्विश्वदेवागमाद्भुतः ।
शचीसृष्टप्रतिच्छन्दः सहस्राक्षो दृगुत्सवः ॥ ३६ ॥
नृत्यदैरावतासीनसर्वशक्रनमस्कृतः ।
हर्षाकुलामरखगचारणर्षिमनोत्सवः ॥ ३७ ॥
व्योमविष्णुपदा(द)रक्षा,-स्नानपीठायिताद्रिराट् ।
तीर्थेशंमन्यदुग्धाब्धि,-स्नानाम्बुस्नातवासवः ॥ ३८ ॥
गन्धाम्बुपूतत्रैलोक्यो, वज्रसूचीशुचिश्रवाः ।
कृतार्थितशचीहस्तः,-शक्रोद्घुष्टेष्टनामकः ॥ ३९ ॥
शक्रारब्धानन्दनृत्यः, शचीविस्मापिताम्बिकः ।
इन्द्रनृत्यन्तपितृको, रैदपूर्णमनोरथः ॥ ४० ॥
आज्ञार्थीन्द्रकृतासेवो, देवर्षीष्टशिवोद्यमः ।
दीक्षाक्षणक्षुब्धजगद् भूर्भुवःस्वःपतीडितः ॥ ४१ ॥
कुबेरनिर्मितास्थानः, श्रीयुग्योगीश्वरार्चितः ।
ब्रह्मेड्यो *ब्रह्मविद् वेद्यो, याज्यो यज्ञपतिः क्रतुः ॥ ४२ ॥
यज्ञाङ्गममृतं यज्ञो, हविः स्तुत्यः स्तुतीश्वरः ।
भावो महामहपतिर्महायज्ञोऽग्रयाजकः ॥ ४३ ॥
दयायागो जगत्पूज्यः, पूजार्हो जगदर्चितः ।
देवाधिदेवः शक्रार्च्यो, देवदेवो जगद्गुरुः ॥ ४४ ॥
संहूतदेवसंघार्च्यः, पद्मयानो जयध्वजी ।
भामण्डली चतुःषष्टिचामरो देवदुन्दुभिः ॥ ४५ ॥
वागस्पृष्टासनः छत्रत्रयराट् पुष्पवृष्टिभाक् ।
दिव्याशोको मानमर्दी, सङ्गीतार्होऽष्टमङ्गलः ॥ ४६ ॥

## ४ अथ तीर्थकृच्छतम्

तीर्थकृत्तीर्थसृट् तीर्थकरस्तीर्थङ्करः सुदृक् ।
तीर्थकर्ता तीर्थभर्ता, तीर्थेशस्तीर्थनायकः ॥ ४७ ॥
धर्मतीर्थकरस्तीर्थप्रणेता तीर्थकारकः ।
तीर्थप्रवर्त्तकस्तीर्थवेधास्तीर्थविधायकः ॥ ४८ ॥
सत्यतीर्थकरस्तीर्थसेव्यस्तैर्थिकतारकः ।
सत्यवाक्याधिपः सत्यशासनोऽप्रतिशासनः ॥ ४९ ॥

स्याद्वादी दिव्यगीर्दिव्यध्वनिरव्याहतार्थवाक् ।
पुण्यवागर्थ्यवागर्धमागधीयोक्तिरिद्धवाक् ॥ ५० ॥
अनेकान्तदिगेकान्तध्वान्तभिद् दुर्णयान्तकृत् ।
सार्थवागप्रयत्नोक्तिः प्रतितीर्थमदघ्नवाक् ॥ ५१ ॥
स्यात्कारध्वजवागीहापेतवागचलौष्ठवाक् ।
अपौरुषेयवाक्छास्ता, रुद्धवाक् सप्तभङ्गिवाक् ॥ ५२ ॥
अवर्णगीः सर्वभाषामयगीर्व्यक्तवर्णगीः ।
अमोघवागक्रमवागवाच्यानन्तवागवाक् ॥ ५३ ॥
अद्वैतगीः सूनृतगीः, सत्यानुभयगीः सुगीः ।
योजनव्यापिगीः क्षीरगौरगीस्तीर्थकृत्त्वगीः ॥ ५४ ॥
भव्यैकश्रव्यगुः सद्गुश्चित्रगुः परमार्थगुः ।
प्रशान्तगुः प्राश्निकगुः, सुगुर्नियतकालगुः ॥ ५५ ॥
सुश्रुतिः सुश्रुतो याज्यश्रुतिः सुश्रुन्महाश्रुतिः ।
धर्मश्रुतिः श्रुतिपतिः, श्रुत्युद्धर्ता ध्रुवश्रुतिः ॥ ५६ ॥
निर्वाणमार्गदिग्मार्गदेशकः सर्वमार्गदिक् ।
सारस्वतपथस्तीर्थपरमोत्तमतीर्थकृत् ॥ ५७ ॥
देष्टा वाग्मीश्वरो धर्मशासको धर्मदेशकः ।
वागीश्वरस्त्रयीनाथस्त्रिभङ्गीशो गिरांपतिः ॥ ५८ ॥
सिद्धाज्ञः सिद्धवागाज्ञासिद्धः सिद्धैकशासनः ।
जगत्प्रसिद्धसिद्धान्तः, सिद्धमन्त्रः सुसिद्धवाक् ॥ ५९ ॥
शुचिश्रवा निरुक्तोक्तिस्तन्त्रकृन्न्यायशास्त्रकृत् ।
महिष्ठवाग्महानादः, कवीन्द्रो दुन्दुभिस्वनः ॥ ६० ॥

## ५ अथ नाथशतकम्

नाथः पतिः परिवृढः, स्वामी भर्ता विभुः प्रभुः ।
ईश्वरोऽधीश्वरोऽधीशोऽधीशानोऽधीशितेशिता ॥ ६१ ॥
ईशोऽधिपतिरीशान इन इन्द्रोऽधिपोऽधिभूः ।
महेश्वरो महेशानो महेशः परमेशिता ॥ ६२ ॥
अधिदेवो महादेवो, देवस्त्रिभुवनेश्वरः ।
विश्वेशो विश्वभूतेशो विश्वेड् विश्वेश्वरोऽधिराट् ॥ ६३ ॥
लोकेश्वरो लोकपतिर्लोकनाथो जगत्पतिः ।
त्रैलोक्यनाथो लोकेशो जगन्नाथो जगत्प्रभुः ॥ ६४ ॥
पिताः परः परतरो, जेता जिष्णुरनीश्वरः ।
कर्ता प्रभूष्णुर्भ्राजिष्णुः, प्रभविष्णुः स्वयंप्रभः ॥ ६५ ॥
लोकजिद्विश्वजिद्विश्वविजेता विश्वजित्वरः ।
जगज्जेता जगज्जैत्रो, जगज्जिष्णुर्जगज्जयी ॥ ६६ ॥
अग्रणीर्ग्रामणीर्नेता, भूर्भुवःस्वरधीश्वरः ।
धर्मनायक ऋद्धीशो, भूतनाथश्च भूतभृत् ॥ ६७ ॥

गतिः पाता वृषो वर्यो, मन्त्रकृच्छुभलक्षणः ।
लोकाध्यक्षो दुराधर्षो, भव्यबन्धुर्निरुत्सुकः ॥ ६८ ॥
धीरो जगद्धितोऽजय्यस्त्रिजगत्परमेश्वरः ।
विश्वासी सर्वलोकेशो, विभवो भुवनेश्वरः ॥ ६९ ॥
त्रिजगद्वल्लभस्तुङ्गस्त्रिजगन्मङ्गलोदयः ।
धर्मचक्रायुधः सद्योजातस्त्रैलोक्यमङ्गलः ॥ ७० ॥
वरदोऽप्रतिघोऽच्छेद्यो, दृढीयानभयङ्करः ।
महाभागो निरौपम्यो, धर्मसाम्राज्यनायकः ॥ ७१ ॥

## ६ अथ योगिशतम्

योगी प्रव्यक्तनिर्वेदः, साम्यारोहणतत्परः ।
सामायिकी सामयिको, निःप्रमादोऽप्रतिक्रमः ॥ ७२ ॥
यमः(मी)प्रधाननियमः, स्वभ्यस्तपरमासनः ।
प्राणायामचणः सिद्धप्रत्याहारो जितेन्द्रियः ॥ ७३ ॥
धारणाधीश्वरो धर्मध्याननिष्ठः समाधिराट् ।
स्फुरत्समरसीभाव, एकीकरणनायकः ॥ ७४ ॥
निर्ग्रन्थनाथो योगीन्द्रः, ऋषिः साधुर्यतिर्मुनिः ।
महर्षिः साधुधौरेयो, यतिनाथो मुनीश्वरः ॥ ७५ ॥
महामुनिर्महामौनी, महाध्यानी महाव्रती ।
महाक्षमो महाशीलो, महाशान्तो महादमः ॥ ७६ ॥
निर्लेपो निर्भ्रमस्वान्तो, धर्माध्यक्षो दयाध्वजः ।
ब्रह्मयोनिः स्वयंबुद्धो, ब्रह्मज्ञो ब्रह्मतत्त्ववित् ॥ ७७ ॥
पूतात्मा स्नातको दान्तो, भदन्तो वीतमत्सरः ।
धर्मवृक्षायुधोऽक्षोभ्यः, प्रपूतात्माऽमृतोद्भवः ॥ ७८ ॥
मन्त्रमूर्त्तिः स्व(सु)सौम्यात्मा, स्वतन्त्रो ब्रह्मसंभवः ।
सुप्रसन्नो गुणाम्भोधिः, पुण्यापुण्यनिरोधकः ॥ ७९ ॥
सुसंवृत्तः सुगुप्तात्मा, सिद्धात्मा निरुपप्लवः ।
महोदर्को महोपायो, जगदेकपितामहः ॥ ८० ॥
महाकारुणिको गुण्यो, महाक्लेशाङ्कुशः शुचिः ।
अरिञ्जयः सदायोगः, सदाभोगः सदाधृतिः ॥ ८१ ॥
परमौदासिताऽनाश्वान्, सत्याशीः शान्तनायकः ।
अपूर्ववैद्यो योगज्ञो, धर्ममूर्त्तिरधर्मध(मु)क् ॥ ८२ ॥
ब्रह्मेड् महाब्रह्मपतिः, कृतकृत्यः कृतक्रतुः ।
गुणाकरो गुणोच्छेदी, निर्निमेषो निराश्रयः ॥ ८३ ॥
सूरिः सुनयतत्त्वज्ञो, महामैत्रीमयः शमी ।
*प्रक्षीणबन्धो निर्द्वन्द्वः, परमर्षिरनन्तगः ॥ ८४ ॥*

## ७ अथ निर्वाणशतम्

निर्वाणः सागरः प्राज्ञैर्महासाधुरुदाहृतः ।
विमलाभोऽथ शुद्धाभः, श्रीधरो दत्त इत्यपि ॥ ८५ ॥
अमलाभोऽप्युद्धरोऽग्निः, संयमश्च शिवस्तथा ।
पुष्पाञ्जलिः शिवगुण, उत्साहो ज्ञानसंज्ञकः ॥ ८६ ॥
परमेश्वर इत्युक्तो, विमलेशो यशोधरः ।
कृष्णो ज्ञानमतिः शुद्धमतिः श्रीभद्रशान्तयुक् ॥ ८७ ॥
वृषभस्तद्वदजितः, संभवश्चाभिनन्दनः ।
मुनिभिः सुमतिः पद्मप्रभः प्रोक्तः सुपार्श्वकः ॥ ८८ ॥
चन्द्रप्रभः पुष्पदन्तः, शीतलः श्रेयसाह्वयः ।
वासुपूज्यश्च विमलोऽनन्तजिद्धर्म इत्यपि ॥ ८९ ॥
शान्तिः कुन्थुररो मल्लिः सुव्रतो नमिरप्यतः ।
नेमिः पार्श्वो वर्धमानो, महावीरः सुवीरकः ॥ ९० ॥
सन्मतिश्चाकथि महति महावीर इत्यथ ।
महापद्मः सूरदेवः, सुप्रभश्च स्वयंप्रभः ॥ ९१ ॥
सर्वायुधो जयदेवो, भवेदुदयदेवकः ।
प्रभादेव उदङ्कश्च, प्रश्नकीर्तिर्जयाभिधः ॥ ९२ ॥
पूर्णबुद्धिर्निष्कषायो, विज्ञेयो विमलप्रभः ।
बहलो निर्मलश्चित्रगुप्तः समाधिगुप्तकः ॥ ९३ ॥
स्वयम्भूश्चापि कन्दर्पो, जयनाथ इतीरितः ।
श्रीविमलो दिव्यवादोऽनन्तवीरोऽप्युदीरितः ॥ ९४ ॥
पुरुदेवोऽथ सुविधिः, प्रज्ञापारमितोऽव्ययः ।
पुराणपुरुषो धर्मसारथिः शिवकीर्तनः ॥ ९५ ॥
विश्वकर्माऽक्षरोऽछद्मा, विश्वभूर्विश्वनायकः ।
दिगम्बरो निरातङ्को, निरारेको भवान्तकः ॥ ९६ ॥
दृढव्रतो नयोत्तुङ्गो, निःकलङ्कोऽकलाधरः ।
सर्वक्लेशापहोऽक्षय्यः, क्षान्तः श्रीवृक्षलक्षणः ॥ ९७ ॥

## ८ अथ ब्रह्मशतम्

ब्रह्मा चतुर्मुखो धाता, विधाता कमलासनः ।
अब्जभूरात्मभूः स्रष्टा, सुरज्येष्ठः प्रजापतिः ॥ ९८ ॥
हिरण्यगर्भो वेदज्ञो, वेदाङ्गो वेदपारगः ।
अजो मनुः शतानन्दो, हंसयानस्त्रयीमयः ॥ ९९ ॥
विष्णुस्त्रिविक्रमः शौरिः, श्रीपतिः पुरुषोत्तमः ।
वैकुण्ठः पुण्डरीकाक्षो, हृषीकेशो हरिः स्वभूः ॥ १०० ॥
विश्वम्भरोऽसुरध्वंसी, माधवो बलिबन्धनः ।
अधोक्षजो मधुद्वेषी, केशवो विष्टरश्रवाः ॥ १०१ ॥

श्रीवत्सलाञ्छनः श्रीमानच्युतो नरकान्तकः ।
विष्वक्सेनश्चक्रपाणिः, पद्मनाभो जनार्दनः ॥ १०२ ॥
श्रीकण्ठः शङ्करः शम्भुः, कपाली वृषकेतनः ।
मृत्युञ्जयो विरूपाक्षो, वामदेवस्त्रिलोचनः ॥ १०३ ॥
उमापतिः पशुपतिः, स्मरारिस्त्रिपुरान्तकः ।
अर्धनारीश्वरो रुद्रो, भवो भर्गः सदाशिवः ॥ १०४ ॥
जगत्कर्त्ताऽन्धकारातिरनादिनिधनो हरः ।
महासेनस्तारकजिद्गणनाथो विनायकः ॥ १०५ ॥
विरोचनो वियद्रत्नं, द्वादशात्मा विभावसुः ।
द्विजाराध्यो बृहद्भानुश्चित्रभानुस्तनूनपात् ॥ १०६ ॥
द्विजराजः सुधारोचिरौषधीशः कलानिधिः ।
नक्षत्रनाथः शुभ्रांशुः, सोमः कुमुदबान्धवः ॥ १०७ ॥
लेखर्षभोऽनिलः पुण्यजनः पुण्यजनेश्वरः ।
धर्मराजो भोगिराजः, प्रचेता भूमिनन्दनः ॥ १०८ ॥
सिंहिकातनयश्छायानन्दनो बृहतीपतिः ।
पूर्वदेवोपदिष्टा च, द्विजराजसमुद्भवः ॥ १०९ ॥

## ९ अथ बुद्धशतम्

बुद्धो दशबलः शाक्यः, षडभिज्ञस्तथागतः ।
समन्तभद्रः सुगतः, श्रीघनो भूतकोटिदिक् ॥ ११० ॥
सिद्धार्थो मारजिच्छास्ता, क्षणिकैकसुलक्षणः ।
बोधिसत्त्वो निर्विकल्पदर्शनोऽद्वयवाद्यपि ॥ १११ ॥
महाकृपालुर्नैरात्म्यवादी सन्तानशासकः ।
सामान्यलक्षणचणः, पंचस्कन्धमयात्मदृक् ॥ ११२ ॥
भूतार्थभावनासिद्ध-,श्चतुर्भूमिकशासनः ।
चतुरार्यसत्यवक्ता निराश्रयचिदन्वयः ॥ ११३ ॥
योगो वैशेषिकस्तुच्छाभावभित् षट्पदार्थदृक् ।
नैयायिकः षोडशार्थवादी पञ्चार्थवर्णकः ॥ ११४ ॥
ज्ञानान्तराध्यक्षबोधः, समवायवशार्थभित् ।
भुक्तैकसाध्यकर्मान्तो, निर्विशेषगुणामृतः ॥ ११५ ॥
सांख्यः समीक्ष्यः कपिलः, पञ्चविंशतितत्त्ववित् ।
व्यक्ताव्यक्तज्ञविज्ञानी, ज्ञानचैतन्यभेददृक् ॥ ११६ ॥
अस्वसंविदितज्ञानवादी सत्कार्यवादसात् ।
त्रिःप्रमाणोऽक्षप्रमाणः, स्याद्वाहंकारिकाक्षदिक् ॥ ११७ ॥
क्षेत्रज्ञ आत्मा पुरुषो, नरो ना चेतनः पुमान् ।
अकर्त्ता निर्गुणोऽमूर्त्तो, भोक्ता सर्वगतोऽक्रियः ॥ ११८ ॥
द्रष्टा तटस्थः कूटस्थो, ज्ञाता निर्बन्धनोऽभवः ।
बहिर्विकारो निर्मोक्षः, प्रधानं बहुधानकम् ॥ ११९ ॥

प्रकृतिः ख्यातिरारूढप्रकृतिः प्रकृतिप्रियः ।
प्रधानभोज्योऽप्रकृतिर्विरम्यो विकृतिः कृती ॥ १२० ॥
मीमांसकोऽस्तसर्वज्ञः श्रुतिपूतः सदोत्सवः ।
परोक्षज्ञानवादीष्टपावकः सिद्धकर्मकः ॥ १२१ ॥
चार्वाको भौतिकज्ञानो, भूताभिव्यक्तचेतनः ।
प्रत्यक्षैकप्रमाणोऽस्तपरलोको गुरुश्रुतिः ॥ १२२ ॥
पुरन्दरविद्धकर्णो, वेदान्ती संविदद्वयी ।
शब्दाद्वैती स्फोटवादी, पाखण्डघ्नो नयौघयुक् ॥ १२३ ॥

## १० अथ अन्तकृच्छतम्

अन्तकृत्पारकृत्तीरप्राप्तः पारेतमःस्थितः ।
त्रिदण्डी दण्डितारातिर्ज्ञानकर्मसमुच्चयी ॥ १२४ ॥
संहृ(ह्न)तध्वनिरुच्छन्नयोगः सुप्तार्णवोपमः ।
योगस्नेहापहो योगकिट्टिनिर्लेपनोद्यतः ॥ १२५ ॥
स्थितस्थूलवपुर्योगो, गीर्म्मणोयोगकार्श्यकः ।
सूक्ष्मवाक्चित्तयोगस्थः सूक्ष्मीकृतवपुःक्रियः ॥ १२६ ॥
सूक्ष्मकायक्रियास्थायी, सूक्ष्मवाक्चित्तयोगहा ।
एकदण्डी च परमहंसः परमसंवरः ॥ १२७ ॥
नैःकर्म्यसिद्धः परमनिर्जरः प्रज्वलत्प्रभः ।
मोघकर्मा त्रुटत्कर्मपाशः शैलेश्यलंकृतः ॥ १२८ ॥
एकाकाररसास्वादो, विश्वाकाररसाकुलः ।
अजीवन्नमृतोऽजाग्रदसुप्तः शून्यतामयः ॥ १२९ ॥
प्रेयानयोगी चतुरशीतिलक्षगुणोगुणः ।
निःपीतानन्तपर्यायो विद्यासंस्कारनाशकः ॥ १३० ॥
वृद्धोऽनिर्वचनीयोऽणुरणीयाननणुप्रियः ।
प्रेष्ठः स्थेयान् स्थिरो निष्ठः, श्रेष्ठो ज्येष्ठः सुनिष्ठितः ॥ १३१ ॥
भूतार्थशूरो भूतार्थदूरः परमनिर्गुणः ।
व्यवहारसुषुप्तोऽतिजागरूकोऽतिसुस्थितः ॥ १३२ ॥
उदितोदितमाहात्म्यो, निरुपाधिरकृत्रिमः ।
अमेयमहिमात्यन्तशुद्धः सिद्धिस्वयंवरः ॥ १३३ ॥
सिद्धानुजः सिद्धपुरीपान्थः सिद्धगणातिथिः ।
सिद्धसङ्गोन्मुखः सिद्धालिङ्ग्यः सिद्धोपगूहकः ॥ १३४ ॥
पुष्टोऽष्टादशसहस्रशीलाङ्गपुण्यशम्बलः ।
वृत्ताग्रयुग्मः परमशुक्ललेश्योऽपचारकृत् ॥ १३५ ॥
क्षेपिष्ठोऽन्त्यक्षणसखा पञ्चलघ्वक्षरस्थितिः ।
द्वासप्ततिप्रकृत्यासी त्रयोदशकलिप्रणुत् ॥ १३६ ॥
अवेदोऽयाजकोऽयज्योऽयाज्योऽनग्निपरिग्रहः ।
अनग्निहोत्री परमनिःस्पृहोऽत्यन्तनिर्दयः ॥ १३७ ॥

अशिष्योऽशासकोऽदीक्ष्योऽदीक्षकोऽदीक्षितोऽक्षयः ।
अगम्योऽगमकोऽरम्योऽरमको ज्ञाननिर्भरः ॥ १३८ ॥
महायोगीश्वरो द्रव्यसिद्धोऽदेहोऽपुनर्भवः ।
ज्ञानैकविज्जीवघनः, सिद्धो लोकाग्रगामुकः ॥ १३९ ॥

## जिनसहस्रनामस्तवनफलम्

इदमष्टोत्तरं नाम्नां, सहस्रं भक्तितोऽर्हताम् ।
योऽनन्तानामधीतेऽसौ, मुक्त्यन्तां भक्तिमश्नुते ॥ १४० ॥
इदं लोकोत्तमं पुंसामिदं शरणमुल्बणम् ॥
इदं मङ्गलमग्रीयमिदं परमपावनम् ॥ १४१ ॥
इदमेव परं तीर्थमिदमेवेष्टसाधनम् ।
इदमेवाखिलक्लेशसङ्क्लेशक्षयकारणम् ॥ १४२ ॥
एतेषामेकमप्यर्हन्नाम्नामुच्चारयन्नघैः ।
मुच्यते किं पुनः सर्वाण्यर्थज्ञस्तु जिनायते ॥ १४३ ॥

॥ इति जिनसहस्रनामस्तवनं समाप्तम् ॥

---

## परिचय

दिगम्बर संप्रदायना श्रेष्ठ विद्वान् पं. आशाधर कृत प्रस्तुत 'जिनसहस्रनाम स्तवन' भारतीय ज्ञानपीठ काशी तरफथी वि० सं० २०१० मां प्रकाशित थयेल छे। जेना आधारे अमोए अहीं मूलमात्र उद्धृत कर्युं छे।

पं. आशाधर विक्रमनी तेरमी शताब्दिमां थया छे। पं. नाथूराम प्रेमी 'जैन साहित्य और इतिहास' नामक पोताना पुस्तकमां लखे छे के "शायद दिगम्बर सम्प्रदाय में उनके बाद उन जैसा प्रतिभाशाली, प्रौढ ग्रन्थकर्ता और जैन धर्म का उद्योतक दूसरा नहीं हुआ।....वे अपने समय के अद्वितीय विद्वान् थे।" तेमणे 'प्रमेय रत्नाकर', 'धर्मामृत' आदि अनेक ग्रन्थोनी रचना करी छे। अनेक विद्वानो तेमनी पासे अध्ययन करता हता।

उपरनी वातनी साक्षि पूरतुं तेमनुं आ जिनसहस्रनाम स्तवन छे, जे तेमणे जिन, सर्वज्ञ, यज्ञार्ह, तीर्थकृत्, नाथ, योगि, निर्वाण, ब्रह्म, बुद्ध, अन्तकृत् शब्दोथी शरु थता दस शतकोमां विभक्त कर्युं छे। तेमां श्री जिनेश्वरनां १००८ नामो १४३ श्लोकोमां आव्या छे।

आचार्य श्री जिनसेने महापुराणना २५ मा पर्वना ९९ श्लोकमां कह्युं छे के अरिहंत भगवान १००८ लक्षणोथी युक्त होय छे, तेथी तेमनी एक हजार ने आठ नामोथी स्तुति करवामां आवे छे।



श्रीगोमटेश्वर बाहुबलिः (कायोत्सर्गमुद्रायां)

## [७५-३०]

# याकिनीमहत्तरासूनु-भवविरहाङ्क-भगवत्-श्रीहरिभद्रसूरिकृत-'षोडशकप्रकरण' संदर्भः

अस्मिन् हृदयस्थे सति, हृदयस्थस्तत्त्वतो मुनीन्द्र इति ।
हृदयस्थिते च तस्मिन्, नियमात्सर्वार्थसंसिद्धिः ॥ २ ॥ १४ ॥

चिन्तामणिः परोऽसौ, तेनैव भवति समरसापत्तिः ।
सैषेह योगिमाता, निर्वाणफलप्रदा प्रोक्ता ॥ २ ॥ १५ ॥

× × × ×

एतदिह भावयज्ञः, सद्गृहिणो जन्मफलमिदं परमम् ।
अभ्युदयाव्युच्छित्त्या, नियमादपवर्गबीजमिति ॥ ६ ॥ १४ ॥

× × × ×

---

### अनुवाद

आ जिन प्रवचन ज्यारे हृदयमां स्वाध्यायादि द्वारा प्रतिष्ठित थाय छे त्यारे परमार्थथी श्रीजिनेश्वर परमात्मा ज हृदयमां प्रतिष्ठित थाय छे अने ज्यारे श्रीजिनेश्वर भगवंत हृदयमां प्रतिष्ठित थाय छे त्यारे अवश्यमेव सर्वप्रयोजनोनी सिद्धि थाय छे ॥ २–१४ ॥

सर्व प्रयोजनोनी सिद्धि थवानुं कारण ए छे के आ श्रीजिनेश्वर भगवंत परम चिन्तामणि छे, तेओ हृदयमां प्रतिष्ठित थतां तेमनी साथे ध्यातानी समरसापत्ति थाय छे। आ समरसापत्ति योगीओनी माता छे अने निर्वाणफलनी प्रसाधक छे। [आत्मा ज्यारे सर्वज्ञना स्वरूपमां उपयोगवाळो बने छे त्यारे तेनो अन्यत्र उपयोग न होवाथी ते स्वयं सर्वज्ञरूप थाय छे। नयविशेष एम माने छे के जे जे वस्तुना उपयोगमां आत्मा वर्ते छे ते ते वस्तुना स्वरूपने ते धारण करे छे. जेम निर्मल स्फटिकमणिमां उपाधि (जेनुं मणिमां प्रतिबिम्ब पडे ते वस्तु) प्रतिबिम्बित देखाय छे अने ते मणि उपाधिना वर्णादिने धारण करे छे, तेम निर्मल आत्मा पण ध्यान वडे परमात्मरूपताने धारण करे छे। ए ज समापत्ति। अथवा ध्याता, ध्यान अने ध्येयनी एकता पण समापति कहेवाय छे.] ॥ २–१५ ॥

× × × ×

आ जिनभवननुं कराववुं ते सद्गृहस्थनी भावपूजा छे, आ जन्मनुं परमफळ छे। अने अनुक्रमे अविच्छिन्न रीते स्वर्गादि सुखोने आपीने अंते मोक्षने आपनारुं छे ॥ ६–१४ ॥

× × × ×

मुक्त्यादौ तत्त्वेन, प्रतिष्ठिताया न देवतायास्तु ।
स्थाप्ये न च मुख्येयं, तदधिष्ठानाद्यभावेन ॥ ८ ॥ ६ ॥

भवति च खलु प्रतिष्ठा, निजभावस्यैव देवतोद्देशात् ।
स्वात्मन्येव परं यत्, स्थापनमिह वचननीत्योच्चैः ॥ ८ ॥ ४ ॥

न्याससमये तु सम्यक्, सिद्धानुस्मरणपूर्वकमसंगम् ।
सिद्धौ तत् स्थापनमिव, कर्तव्यं स्थापनं मनसा ॥ ८ ॥ १२ ॥

बीजमिदं परमं यत्, परमाया एव समरसापत्तेः ।
स्थाप्येन तदपि मुख्या, हन्तैषैवेति विज्ञेया ॥ ८ ॥ ५ ॥

---

मुक्तिमां रहेला एवा श्रीऋषभादि परमात्मानी मुख्य प्रतिष्ठा जिनबिंबमां थवी शक्य नथी, कारण के ते बहु दूर छे अने मंत्रादि संस्कारोथी तेमनुं मूर्तिमां अधिष्ठान के संनिधान संभवित नथी । एवी ज रीते सांसारिक इन्द्रादि देवताओनी पण प्रतिष्ठा मुख्य नथी कारण के मंत्रादिवडे ते देवता मूर्तिमां आवे ज एवो नियम नथी (आवे अथवा न पण आवे) ॥ ८–६ ॥

तेथी अहीं ते प्रतिष्ठा मुख्य देवताने उद्देशीने करेला प्रतिष्ठा करावनारना पोताना भावनी ज समजवी । अहीं (प्रतिष्ठाना विषयमां) 'मुक्तिमां रहेला श्रीऋषभादि परमात्मा ते ज हुं छुं,' एवो भाव आत्मामां उत्पन्न थवो जोईए । आ तात्त्विक प्रतिष्ठा थई । पछी ए भावनो (बाह्य) जिनबिंबादिमां उपचार करवामां आवे छे । आ बाह्य प्रतिष्ठा थई । अहीं बाह्य प्रतिष्ठा वखते 'ते (परमात्म विषयक भाव) ज आ (बिंब) छे,' एवो *भावोपचार होय छे ॥ ८–४ ॥

बिंबमां 'ॐ नमः ऋषभाय' वगेरे मंत्रोनो न्यास करवानो होय छे । ते पूर्वे परमपदे रहेला एवा श्रीसिद्ध परमात्मानुं सारी रीते स्मरण करवुं जोईए । ए वखते शारीरिक अने मानसिक संगनो त्याग करीने केवलज्ञानादि गुणो वडे सहित श्रीसिद्ध परमात्मा सिद्धशिला पर जेवी रीते रहेला छे, तेवी ज रीते पोताना मनमां लावीने मनना शुभव्यापार वडे भावरूपे बिंबमां स्थापवा जोईए । ए रीते श्रीसिद्धस्मरणरूप जे पोतानो भाव तेनी ज अहीं प्रतिष्ठा छे । तात्पर्य के बिंबमां पोताना भाव द्वारा श्रीसिद्धपरमात्माना गुणोनो आरोप करवामां आवे छे, तेथी ते बिंबने जोतां ज जोनारने 'आ मूर्ति प्रतिष्ठित छे' एवो ख्याल आवतां सर्व गुणो वडे 'ते (सिद्ध ज) हुं छुं' ए प्रकारे पोताना आत्मामां परमात्मानुं स्थापन थाय छे ॥ ८–१२ ॥

आवी जे निजभावनी प्रतिष्ठा ते स्थाप्य–श्री सर्वज्ञ परमात्मा साथेनी परम समरसापत्तिनुं बीज छे । ए ज प्रधान प्रतिष्ठा छे ॥ ८–५ ॥

---

* सूक्ष्म दृष्टिए विचारतां एवुं लागे छे के–आ भावोपचारना प्रभावथी ज दर्शन करवा आवनार बुद्धिमान पुरुषना भावनो प्रतिष्ठापकना ए भावनी साथे अभेद उत्पन्न थाय छे, तेथी तेना (दर्शन करनारना) हृदयमां पण बिंबने जोतां "ते (परमात्मा) ज आ (बिंब) छे" एवो भाव जागे छे अने अंते ए भावना प्रभावे "ते (परमात्मा) ज हुं छुं" एवो भाव तेना आत्मामां उत्पन्न थाय छे । ए रीते ते पण परमात्मानी साथे समरसापत्ति अनुभवे छे अने अचिंत्य लाभ ते मेळवे छे । प्रतिष्ठापकने प्रथम बाह्यालंबन विना सिद्धभावने आत्मामां स्थापवो पडे छे; ज्यारे दर्शन करनारने प्रतिष्ठित जिनबिंबना आलंबनथी ए भाव उत्पन्न थाय छे, ए अहीं विशेष समजवो ।

भावरसेन्द्रात्तु ततो, महोदयाज्जीवतास्त्र(म्र)रूपस्य ।
कालेन भवति परमाऽप्रतिबद्धा सिद्धकाञ्चनता ॥ ८ ॥ ८ ॥

× × × ×

स्नानविलेपनसुगन्धिपुष्पधूपादिभिः शुभैः कान्तम् ।
विभवानुसारतो यत्, काले नियतं विधानेन ॥ ९ ॥ १ ॥
अनुपकृतपरहितरतः, शिवदस्त्रिदशेशपूजितो भगवान् ।
पूज्यो हितकामानामिति भक्त्या पूजनं पूजा ॥ ९ ॥ २ ॥
इति जिनपूजां धन्यः, शृण्वन् कुर्वंस्तदोचितां नियमात् ।
भवविरहकारणं खलु, सदनुष्ठानं द्रुतं लभते ॥ ९ ॥ १६ ॥

× × × ×

सालम्बनो निरालम्बनश्च, योगः परो द्विधा ज्ञेयः ।
जिनरूपध्यानं खल्वाद्यस्तत्तत्त्वगस्त्वपरः ॥ १४ ॥ १ ॥
अष्टपृथग्जनचित्तत्यागाद्योगिकुलचित्तयोगेन ।
जिनरूपं ध्यातव्यं, योगविधावन्यथा दोषः ॥ १४–२ ॥

× × × ×

---

आवो भाव ('सर्वैं गुणैः स एवाहम्' वगेरे भाव) ते परम रसेन्द्र (पारो–पारसमणि) छे। एना वडे अनुक्रमे जीवरूप ताम्र श्रेष्ठ एवी सिद्धरूपी कांचनताने पामे छे. ॥ ८–८ ॥

× × × ×

मुमुक्षुओए, स्नात्र, विलेपन, सुगन्धिपुष्प, धूप वगेरे वडे करीने पोताना वैभव, नियतकाळे, आगमोक्तरीते, भक्तिभावपूर्वक – निष्कारण वत्सल, मोक्षने आपनार कल्याणना अभिलाषीओने पूज्य अने देवेन्द्रोथी पूजाएला श्रीतीर्थंकर परमात्माना बिंबनी पूजा करवी जोईए. ॥ ९–१/२ ॥

अहीं कहेली जिनपूजाने सांभळीने जे धन्य पुरुष शास्त्रोक्त रीते सर्व औचित्य सहित श्रीजिनेश्वर भगवंतनी पूजा करे छे ते संसारना उच्छेदक एवा सदनुष्ठानने शीघ्रतः नियमा पामे छे ॥ ९–१६ ॥

× × × ×

योग सालम्बन अने निरालम्बन एम बे प्रकारनो छे । समवसरणमां विराजमान एवा श्रीजिनेश्वर परमात्मानुं ध्यान ते सालंबन योग छे, मुक्तिगत परमात्माना स्वरूपनुं ध्यान ते निरालंबन योग छे । आ मुक्तिगत रूप ते सिद्धात्माना जीवप्रदेशोना संघातरूप छे अने केवलज्ञान वगेरे तेनो स्वभाव छे ॥ १४–१ ॥

सामान्य माणसोनुं चित्त खेदादि* आठ दोषोथी सहित होय छे । एवा चित्तनो त्याग करीने योगी सदृश निर्मल चित्तवडे योग क्रिया समये श्रीजिनरूपनुं ध्यान करवुं । एथी बीजी रीते (चित्तना दोषो सहित) करातुं ध्यान ते दोषरूप छे ॥ १४–२ ॥

× × × ×

---

* विशेष वर्णन माटे जुओ—षोडशक १४, गा. १/११.

एतद्दोषविमुक्तं, शान्तोदात्तादिभावसंयुक्तम् ।
सततं परार्थनियतं, संक्लेशविवर्जितं चैव ॥ १४–१२ ॥

सुस्वप्नदर्शनपरं, समुल्लसद्‌गुणगणौघमत्यन्तम् ।
कल्पतरुबीजकल्पं, शुभोदयं योगिनां चित्तम् ॥ १४–१३ ॥

× × × ×

शुद्धे विविक्ते देशे, सम्यक्-संयमितकाययोगस्य ।
कायोत्सर्गेण दृढं, यद्वा पर्यङ्कबन्धेन ॥ १४–१५ ॥

साध्वागमानुसाराच्चेतो विन्यस्य भगवति विशुद्धम् ।
स्पर्शविधात्तत्सिद्धयोगिसंस्मरणयोगेन ॥ १४–१६ ॥

× × × ×

सर्वजगद्धितमनुपममतिशयसन्दोहमृद्धिसंयुक्तम् ।
ध्येयं जिनेन्द्ररूपं, सदसि गदत्तत्परं चैव ॥ १५–१ ॥

सिंहासनोपविष्टं, छत्रत्रयकल्पपादपस्याधः ।
सत्त्वार्थसंप्रवृत्तं, देशनया कान्तमत्यन्तम् ॥ १५–२ ॥

---

योगीओनुं चित्त खेदादि आठ दोषोथी रहित, शान्त, उदात्त (उदार, गंभीर, धीर) वगेरे भाववाळुं, सतत परोपकारमां निरत, संक्लेशथी रहित, श्वेत तथा सुगन्धि पुष्प, वस्त्र, छत्र, चामर वगेरेना शुभ स्वप्न जेने आवे छे एवुं, प्रवर्धमान अनेक गुणोवाळुं, कल्पवृक्षना बीज सदृश अने शुभ उदयवाळुं होय छे ॥ १४–१२/१३ ॥

× × × ×

पवित्र एकान्त प्रदेशमां प्रथम कायानी चेष्टाओने सारी रीते नियन्त्रित करवी। पछी कायोत्सर्गमुद्रा अथवा पर्यङ्कासनमां स्थिर थवुं। पछी तत्त्वज्ञानना संस्कार वडे जेओए ध्यानमां रहीने आत्मस्वरूपने प्राप्त कर्युं छे, एवा सिद्धयोगी पुरुषोनुं स्मरण करवुं। पछी आगमोक्त रीते सम्यक् प्रकारे परमात्मामां विशुद्ध चित्तने स्थापवुं। पछी श्रीजिनरूपनुं ध्यान करवुं। ए रीते ध्यान शीघ्रतः सिद्ध थाय छे ॥ १४–१५/१६ ॥

× × × ×

ते सालंबन ध्यान आ रीते करवुं :—

सर्व प्राणीओने हितकर, जेना शरीरादिना सौन्दर्यने कोई उपमा नथी एवा अनुपम, अनेक अतिशयोथी सम्पन्न, आमर्षौषधि वगेरे नाना प्रकारनी लब्धिओथी सहित, समवसरणमां सातिशय वाणीवडे देशना आपता, देवनिर्मित सिंहासन पर विराजमान, छत्रत्रय अने कल्पवृक्ष नीचे रहेला, देशना द्वारा सर्व सत्त्वोना परम अर्थ–मोक्ष माटे प्रवृत्त, अत्यन्त मनोहर, शारीरिक अने मानसिक

आधीनां परमौषधमव्याहतमखिलसम्पदां बीजम् ।
चक्रादिलक्षणयुतं, सर्वोत्तमपुण्यनिर्माणम् ॥ १५–३ ॥

निर्वाणसाधनं भुवि, भव्यानामग्र्यमतुलमाहात्म्यम् ।
सुरसिद्धयोगिवन्द्यं, वरेण्यशब्दाभिधेयं च ॥ १५–४ ॥

तनुकरणादिविरहितं, तच्चाचिन्त्यगुणसमुदयं सूक्ष्मम् ।
त्रैलोक्यमस्तकस्थं, निवृत्तजन्मादिसङ्क्लेशम् ॥ १५–१३ ॥

ज्योतिः परं परस्तात्तमसो यद्गीयते महामुनिभिः ।
आदित्यवर्णममलं, ब्रह्माद्यैरक्षरं ब्रह्म ॥ १५–१४ ॥

नित्यं प्रकृतिवियुक्तं, लोकालोकावलोकनाभोगम् ।
स्तिमिततरङ्गोदधिसममवर्णमस्पर्शमगुरुलघु ॥ १५–१५ ॥

सर्वाबाधरहितं, परमानन्दसुखसङ्गतमसङ्गम् ।
निःशेषकलातीतं, सदाशिवाद्यादिपदवाच्यम् ॥ १५–१६ ॥

× × × ×

---

पीडाओनुं परम औषध, सर्व संपत्तिओनुं अनुपहत–अवन्ध्य बीज, चक्रादि लक्षणोथी युक्त, सर्वोत्तम पुण्यना परमाणुओथी बनेला, पृथ्वी पर भव्योने माटे निर्वाणनुं परम साधन, असाधारण माहात्म्यवाळा, देवो अने सिद्धयोगिओ ( विद्यामंत्रादिसिद्धो ) ने पण वंदनीय अने 'वरेण्य' शब्द वडे वाच्य एवा श्रीजिनेन्द्र-रूपनुं ध्यान करवुं ( ए सालंबन योग छे ) ॥ १५–१/४ ॥

श्रीसिद्धरूपनुं निरालंबन ध्यान आ रीते छे :—ते सिद्धरूप–शरीर, इन्द्रियो अने मन विनानुं, अचिन्त्य एवा केवलज्ञानादि गुणोवाळुं, केवलज्ञान विना सम्पूर्ण रीते न जाणी शकाय एवुं, त्रणे लोकना मस्तकरूप सिद्धशिला पर विराजमान, जन्म-जरादि संक्लेशोथी रहित, ज्ञानसंपन्न एवा ब्रह्मादि महामुनिओ जेने परंज्योति, अन्धकारथी पर–अस्पृष्ट, आदित्यवर्ण कहे छे एवुं अत्यन्त निर्मल, अक्षर, ब्रह्म, नित्य, ज्ञानावरणीयादि कर्मप्रकृतिथी रहित, लोकालोकना अवलोकनना उपयोगवाळुं, निस्तरङ्ग–प्रशान्त महासागर सदृश, अवर्ण, अस्पर्श, अगुरुलघु, अमूर्त, सर्व बाधाओथी रहित, परमानंदवाळा सुखथी युक्त, असंग, सर्वकलाओ ( तथाभव्यत्व, असिद्धत्व, वगेरे संसारि–जीव–स्वभावो ) थी रहित अने 'सदाशिव' वगेरे पदोवडे वाच्य छे ॥ १५–१३/१६ ॥

× × × ×

---

१ टीका :—परम आनन्दो यस्मिन् सुखे, तेन संगतम् ।

एतद् दृष्ट्वा तत्त्वं, परममनेनैव समरसापत्तिः।
सञ्जायतेऽस्य परमा, परमानन्द इति यामाहुः ॥ १६–१ ॥
सैषाऽविद्यारहिताऽवस्था परमात्मशब्दवाच्येति।
एषैव च विज्ञेया, रागादिविवर्जिता तथता ॥ १६–२ ॥
वैशेषिकगुणरहितः, पुरुषोऽस्यामेव भवति तत्त्वेन।
विध्यातदीपकल्पस्य, हन्त जात्यन्तराप्राप्तेः ॥ १६–३ ॥
एवं पशुत्वविगमो, दुःखान्तो भूतविगम इत्यादि।
अन्यदपि तन्त्रसिद्धं, सर्वमवस्थान्तरेऽत्रैव ॥ १६–४ ॥

---

एवा (उपर कहेल) परम तत्त्वने जोईने अयोगी केवलीने ए परम तत्त्व (सिद्धरूप) नी साथे परम समरसापत्ति थाय छे। आ समरसापत्तिने वेदान्तिओ 'परमानन्द' कहे छे। परमात्म शब्दथी वाच्य ए पर तत्त्वने केटलाक 'अविद्यारहित अवस्था' कहे छे। केटलाक एने रागादिरहित तथता (तथ्य–सत्यरूप) कहे छे। वैशेषिक दर्शनवाळाओ एने वैशेषिक गुण रहित पुरुष कहे छे। बौद्धो एने विध्यातदीप–निर्वाण कहे छे। पशुत्वविगम, दुःखान्त, भूतविगम वगेरे अनेक शब्दो वडे ते ते तन्त्रोमां ते कहेवाय छे। आ बधा नामोनो परमार्थ आत्माने परिणामि नित्य मान्या विना घटतो नथी, तेथी एकान्त मतोमां ते नामो नाममात्र ज रहे छे ॥ १६–१/४ ॥

## परिचय

श्री 'षोडशक प्रकरण'ना कर्ता श्रीहरिभद्रसूरिनो संक्षिप्त परिचय प्रस्तुत ग्रंथना प्राकृत विभागना 'संबोध प्रकरण संदर्भ' (वि. नं. ३२) मां आपेल छे। 'षोडशक प्रकरण' मां जुदा जुदा सोळ विषयो पर गंभीर विचारणा छे। तेमांथी श्रीअरिहंत परमात्मा विषयक समरसापत्ति, भावप्रतिष्ठा, पूजा, सालंबन–निरालंबन योग, योगिचित्त, ध्येयनुं स्वरूप, वगेरेने दर्शावता श्लोकोने तारवीने अनुवाद सहित अहीं रजू करेल छे।



श्रीचतुर्विंशतिजिनरम्यपटः

# [७६–३१ (अ)]

## श्रीजयतिलकसूरिविरचित-
## श्रीहरिविक्रमचरितान्तर्गतसंदर्भः

श्रीतीर्थाय नमस्तस्मै, पंचशाखश्रिये सदा।
पंचैते वितता यस्य, शाखाः श्रीपरमेष्ठिनः ॥ १ ॥
अर्हंतस्ते जयन्त्यत्र, निःस्नेहाः रत्नदीपकाः।
स्पर्धां करोत्यलोकेन, येषां ज्ञानमयं महः ॥ २ ॥
सिद्धेभ्योऽपि नमस्तेभ्यो, मुक्तेभ्यो कर्मकश्मलैः।
मूर्ध्नि चूडामणीयन्ते, लोकपुंसः सदैव हि ॥ ३ ॥
शिवंगतेषु सार्वेषु, शासनं धारयन्ति ये।
पंचधाचारधारिभ्य, आचार्येभ्यो नमः सदा ॥ ४ ॥
उपाध्याया जयन्त्यत्र, सूत्रार्थजलराशयः।
गृहीत्वा (च) जलं येभ्यो, घना वर्षन्ति साधवः ॥ ५ ॥
मूलोत्तरगुणैः शुद्धं, चारित्रं पालयन्ति ये।
सर्वेभ्योऽपि त्रिधा तेभ्यः, साधुभ्यो भुवने नमः ॥ ६ ॥

---

### अनुवाद

जेनी आ पांच परमेष्ठि भगवंतो पांच विशाळ शाखाओ छे एवा ते जगप्रसिद्ध श्रीतीर्थने हुं मतिज्ञानादि पांच शाखाओवाळी ज्ञानलक्ष्मीनी प्राप्ति माटे सदा नमस्कार करुं छुं ॥ १ ॥

तेल विनाना रत्नदीप जेवा ते (वीतराग) अरिहंतो आ विश्वमां सदा जय पामे छे के जेमनो ज्ञानमय प्रकाश अलोकाकाश साथे स्पर्धा करे छे (तात्पर्य के ते ज्ञानप्रकाश अलोकाकाशने पण प्रतिक्षण पोतानो विषय बनावे छे) ॥ २ ॥

ते सिद्धोने पण सर्वदा नमस्कार हो के जेओ कर्ममलथी मुक्त छे अने जेओ लोकरूप महापुरुषना मस्तक उपर सर्वदा चूडामणिनी जेम शोभी रह्या छे ॥ ३ ॥

श्रीतीर्थंकर भगवंतोना निर्वाण पछी जेओ श्री जिनशासनने धारण[१] करे छे, ते पांच प्रकारना आचारने धारण करनारा श्री आचार्य भगवंतोने सर्वदा नमस्कार हो ॥ ४ ॥

सूत्रार्थरूप जलना महासागर एवा ते उपाध्याय भगवंतो पण आ लोकमां जय पामे छे के जेमनी पासेथी साधुरूप वादळांओ जल ग्रहण करीने वरसे छे—लोकमां श्री जिनवाणीरूप जलनी सदा वर्षा करे छे ॥ ५ ॥

जेओ मूल अने उत्तर गुणोथी शुद्ध चारित्रने पाळे छे, लोकमां रहेला ते सर्व साधु भगवंतोने हुं त्रिकरणशुद्ध नमस्कार करुं छुं ॥ ६ ॥

---

१ धारण = धारण, रक्षण, प्रचार वगेरे.

## परिचय

ग्रन्थकर्ता श्री जयतिलकसूरिजीना विषयमां खास माहिती उपलब्ध नथी। तेओ आगमिक गच्छना हता। श्रीचारित्रप्रभसूरिजीना शिष्य हता। श्री अमरकीर्ति गणीना बन्धु हता। मुनिश्री जिनेन्द्र प्रमुख तेमना शिष्यो हता। ग्रन्थकर्ता व्याकरण, काव्य, कोश, साहित्य, अलंकार, तर्क, आगम वगेरे अनेक विषयोना पारगामी हता, ए हकीकत तो स्वयं ग्रन्थ ज कही आपे छे। तेओए रचेलो 'मलयसुंदरीचरित्र' ग्रन्थ पण चरित्रनी दृष्टिए सुंदर अने मनोहर छे।

'श्री हरिविक्रमचरित्र'नी प्रथम आवृत्ति सं. १९७२ मां जामनगरना पं. श्री हीरालाल हंसराजे बहार पाडी हती। ते पछी सं. १९९१ मां शा. मणिलाल देवचंद, महेसाणा तरफथी प्रस्तुत ग्रंथ प्रकाशित करवामां आव्यो हतो। ए ग्रन्थमांथी प्रस्तुत संदर्भ अहीं अनुवाद सहित आपेल छे।

# [७६-३१ (ब)]

# श्री नवतत्त्वसंवेदनान्तर्गतसंदर्भः

**अर्हं यत्प्राणिभिः पुण्यै-रुपायैरुपयाच्यते ।**
**तस्मै कल्याणकन्दाय, स्वानन्दाय नमो नमः ॥ १ ॥**

**व्याख्या**—अर्हमिति **अर्हं** योग्यं यद्वा पूज्यं अथवा परममन्त्राक्षरबीजं नादबिन्दुकलाज्योतिःकलितं, यदि वा (यद्वा) अकारादिहकारपर्यन्तं वाङ्मयं आहोस्विद् अर्हमित्यक्षरस्य पञ्चपरमेष्ठिवाचकत्वेन अर्हदादिरूपं **यत्**परमतत्त्वं **प्राणिभिः पुण्यैः पवित्रैः** पुण्यहेतुत्वेन वा पुण्यै**रुपायै**र्गुरूपासना[दि]भिः कारणै**रुपयाच्यते तस्मै** परमतत्त्वाय **कल्याणकन्दाय** श्रेयःप्रभवाय **स्वानन्दाय नमो नम** इति सम्बन्धः ॥ १ ॥

---

## अनुवाद

प्राणिओवडे (श्री जिनबिंबादि) पवित्र उपायोवडे जे नी उपासना कराय छे ते मोक्षना उद्गम स्थानभूत अने परमानंदमय एवा अर्हं ने पुनः पुनः नमस्कार करुं छुं ॥ १ ॥

## परिचय

नवतत्त्वसंवेदन प्रकरणमांथी 'नमस्कार स्वाध्याय' ने उपयोगी प्रस्तुत श्लोक, टीका अने अनुवाद सहित अहीं प्रगट करेल छे।

[ ७७-३२ ]

## श्रीसिद्धसेनदिवाकरविरचितः
## शक्रस्तवः

ॐ नमोऽर्हते भगवते परमात्मने परमज्योतिषे परमपरमेष्ठिने परमवेधसे परमयोगिने परमेश्वराय तमसःपरस्तात् सदोदितादित्यवर्णाय समूलोन्मूलितानादिसकलक्लेशाय ॥ १ ॥

ॐ नमोऽर्हते भूर्भुवःस्वस्त्रयीनाथमौलिमन्दारमालार्चितक्रमाय सकलपुरुषार्थयोनिनिरवद्यविद्याप्रवर्तनैकवीराय नमःस्वस्तिस्वधास्वाहावषडर्थैकान्तशान्तमूर्तये भवद्भाविभूतभावावभासिने कालपाशनाशिने सत्त्वरजस्तमोगुणातीताय अनन्तगुणाय वाङ्मनोऽगोचरचरित्राय पवित्राय करणकारणाय तरणतारणाय सात्त्विकदैवताय तात्त्विकजीविताय निर्ग्रन्थपरमब्रह्महृदयाय योगीन्द्रप्राणनाथाय त्रिभुवनभव्यकुलनित्योत्सवाय विज्ञानानन्दपरब्रह्मैकात्म्यसात्म्यसमाधये हरिहरहिरण्यगर्भादिदेवतापरिकलितस्वरूपाय सम्यक्श्रद्धेयाय सम्यग्ध्येयाय सम्यक्शरण्याय सुसमाहितसम्यक्स्पृहणीयाय ॥ २ ॥

ॐ नमोऽर्हते भगवते आदिकराय तीर्थङ्कराय स्वयंसम्बुद्धाय पुरुषोत्तमाय पुरुषसिंहाय पुरुषवरपुण्डरीकाय पुरुषवरगन्धहस्तिने लोकोत्तमाय लोकनाथाय लोकहिताय लोकप्रदीपाय लोकप्रद्योतकारिणे अभयदाय दृष्टिदाय मुक्तिदाय मार्गदाय बोधिदाय जीवदाय शरणदाय धर्मदाय धर्मदेशकाय धर्मनायकाय धर्मसारथये धर्मवरचातुरन्तचक्रवर्तिने व्यावृत्तच्छद्मने अप्रतिहतसम्यग्ज्ञानदर्शनसद्मने ॥ ३ ॥

ॐ नमोऽर्हते जिनाय जापकाय तीर्णाय तारकाय बुद्धाय बोधकाय मुक्ताय मोचकाय त्रिकालविदे पारङ्गताय कर्माष्टकनिषूदनाय अधीश्वराय शम्भवे जगत्प्रभवे स्वयम्भुवे जिनेश्वराय स्याद्वादवादिने सार्वाय सर्वज्ञाय सर्वदर्शिने सर्वतीर्थोपनिषदे सर्वपाषण्डमोचिने सर्वयज्ञफलात्मने सर्वज्ञकलात्मने सर्वयोगरहस्याय केवलिने देवाधिदेवाय वीतरागाय ॥ ४ ॥

ॐ नमोऽर्हते परमात्मने परमाप्ताय परमकारुणिकाय सुगताय तथागताय महाहंसाय हंसराजाय महासत्त्वाय महाशिवाय महाबोधाय महामैत्राय सुनिश्चिताय विगतद्वन्द्वाय गुणाब्धये लोकनाथाय जितमारबलाय ॥ ५ ॥

ॐ नमोऽर्हते सनातनाय उत्तमश्लोकाय मुकुन्दाय गोविन्दाय विष्णवे जिष्णवे अनन्ताय अच्युताय श्रीपतये विश्वरूपाय हृषीकेशाय जगन्नाथाय भूर्भुवःस्वःसमुत्ताराय मानंजराय कालंजराय ध्रुवाय अजाय अजेयाय अजराय अचलाय अव्ययाय विभवे अचिन्त्याय असंख्येयाय आदिसंख्याय आदिकेशवाय आदिशिवाय महाब्रह्मणे परमशिवाय एकानेकानन्त-

स्वरूपिणे भावाभावविवर्जिताय अस्तिनास्तिद्वयातीताय पुण्यपापविरहिताय सुखदुःखविविक्ताय व्यक्ताव्यक्तस्वरूपाय अनादिमध्यनिधनाय नमोऽस्तु मुक्तीश्वराय मुक्तिस्वरूपाय ॥ ६ ॥

ॐ नमोऽर्हते निरातङ्काय निःसङ्गाय निःशङ्काय निर्मलाय निर्द्वन्द्वाय निस्तरङ्गाय निरूर्मये निरामयाय निष्कलङ्काय परमदैवताय सदाशिवाय महादेवाय शङ्कराय महेश्वराय महाव्रतिने महायोगिने महात्मने पञ्चमुखाय मृत्युञ्जयाय अष्टमूर्त्तये भूतनाथाय जगदानन्दाय जगत्पितामहाय जगद्देवाधिदेवाय जगदीश्वराय जगदादिकन्दाय जगद्भास्वते जगत्कर्मसाक्षिणे जगच्चक्षुषे त्रयीतनवे अमृतकराय शीतकराय ज्योतिश्चक्रचक्रिणे महाज्योतिर्द्योतिताय महातमःपारे-सुप्रतिष्ठिताय स्वयंकर्त्रे स्वयंहर्त्रे स्वयंपालकाय आत्मेश्वराय नमो विश्वात्मने ॥ ७ ॥

ॐ नमोऽर्हते सर्वदेवमयाय सर्वध्यानमयाय सर्वज्ञानमयाय सर्वतेजोमयाय सर्वमंत्रमयाय सर्वरहस्यमयाय सर्वभावाभावाजीवाजीवेश्वराय अरहस्यरहस्याय अस्पृहस्पृहणीयाय अचिन्त्यचिन्तनीयाय अकामकामधेनवे असङ्कल्पितकल्पद्रुमाय अचिन्त्यचिन्तामणये चतुर्दशरज्ज्वात्मकजीवलोकचूडामणये चतुरशीतिलक्षजीवयोनिप्राणिनाथाय पुरुषार्थनाथाय परमार्थनाथाय अनाथनाथाय जीवनाथाय देवदानवमानवसिद्धसेनाधिनाथाय ॥ ८ ॥

ॐ नमोऽर्हते निरञ्जनाय अनन्तकल्याणनिकेतनकीर्तनाय सुगृहीतनामधेयाय (महिमामयाय) धीरोदात्तधीरोद्धतधीरशान्तधीरललितपुरुषोत्तमपुण्यश्लोकशतसहस्रलक्षकोटिवन्दितपादारविन्दाय सर्वगताय ॥ ९ ॥

ॐ नमोऽर्हते सर्वसमर्थाय सर्वप्रदाय सर्वहिताय सर्वाधिनाथाय कस्मैचन क्षेत्राय पात्राय तीर्थाय पावनाय पवित्राय अनुत्तराय उत्तराय योगाचार्याय संप्रक्षालनाय प्रवराय आग्रेयाय वाचस्पतये माङ्गल्याय सर्वात्मनीनाय सर्वार्थाय अमृताय सदोदिताय ब्रह्मचारिणे तायिने दक्षिणीयाय निर्विकाराय वज्रर्षभनाराचमूर्त्तये तत्त्वदर्शिने पारदर्शिने परमदर्शिने निरुपमज्ञानबलवीर्यतेजःशक्त्यैश्वर्यमयाय आदिपुरुषाय आदिपरमेष्ठिने आदिमहेशाय महाज्योतिःस(त्त)त्त्वाय महार्चिघनेश्वराय महामोहसंहारिणे महासत्त्वाय महाज्ञामहेन्द्राय महालयाय महाशान्ताय महायोगीन्द्राय अयोगिने महामहीयसे महाहंसाय हंसराजाय महासिद्धाय शिवमचलमरुजमनन्तमक्षयमव्याबाधमपुनरावृत्ति महानन्दं महोदयं सर्वदुःखक्षयं कैवल्यं अमृतं निर्वाणमक्षरं परब्रह्म निःश्रेयसमपुनर्भवं सिद्धिगतिनामधेयं स्थानं संप्राप्तवते चराचरं अवते नमोऽस्तु श्रीमहावीराय त्रिजगत्स्वामिने श्रीवर्धमानाय ॥ १० ॥

ॐ नमोऽर्हते केवलिने परमयोगिने (भक्तिमार्गयोगिने) विशालशासनाय सर्वलब्धिसम्पन्नाय निर्विकल्पाय कल्पनातीताय कलाकलापकलिताय विस्फुरदुरुशुक्लध्यानाग्निनिर्दग्धकर्मबीजाय प्राप्तानन्तचतुष्टयाय सौम्याय शान्ताय मङ्गलवरदाय अष्टादशदोषरहिताय संसृतविश्वसमीहिताय स्वाहा ॐ ह्रीं श्रीं अर्हं नमः ॥ ११ ॥

लोकोत्तमो निष्प्रतिमस्त्वमेव, त्वं शाश्वतं मङ्गलमप्यधीश ! ।
त्वामेकमर्हन् ! शरणं प्रपद्ये, सिद्धर्षिसद्धर्ममयस्त्वमेव ॥ १ ॥

त्वं मे माता पिता नेता, देवो धर्मो गुरुः परः ।
प्राणाः स्वर्गोऽपवर्गश्च, सत्त्वं तत्त्वं गतिर्मतिः ॥ २ ॥

जिनो दाता जिनो भोक्ता, जिनः सर्वमिदं जगत् ।
जिनो जयति सर्वत्र, यो जिनः सोऽहमेव च ॥ ३ ॥

यत्किञ्चित् कुर्महे देव !, सदा सुकृतदुष्कृतम् ।
तन्मे निजपदस्थस्य, हुं क्षः[1] क्षपय त्वं जिन ! ॥ ४ ॥

गुह्यातिगुह्यगोप्ता त्वं, गृहाणास्मत्कृतं जपम् ।
सिद्धिः श्रयति मां येन, त्वत्प्रसादात्त्वयि स्थितम् ॥ ५ ॥

इति श्रीवर्धमानजिननाममन्त्रस्तोत्रम् । प्रतिष्ठायां शान्तिकविधौ पठितं महासुखाय स्यात् ।

इति शक्रस्तवः ।

१ इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणाकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशतसहस्रशुश्रूषितं भवान्तरकृतासंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां, भव्यजीवानां चराचरेऽपि (जीवलोके) सद्वस्तु तन्नास्ति यत् करतलप्रणयि न भवतीति । किं च—

२ इतीमं० पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं इत्यादि यावत्सम्यग्समनुप्रेक्षमाणानां भव्यजीवानां भवनपतिव्यन्तर-ज्योतिष्क-वैमानिकवासिनो देवाः सदा प्रसीदन्ति । व्याधयो विलीयन्ते ।

३ इतीमं० भव्यजीवानां पृथिव्यप्तेजोवायुगगनानि भवन्त्यनुकूलानि ।

४ इतीमं० भव्यजीवानां सर्वसंपदां मूलं जायते जिनानुरागः ।

५ इतीमं० भव्यजीवानां साधवः सौमनस्येनानुग्रहपरा जायन्ते ।

६ इतीमं० भव्यजीवानां खलाः क्षीयन्ते ।

७ इतीमं० भव्यजीवानां जल-स्थल-गगनचराः क्रूरजन्तवोऽपि मैत्रीमया जायन्ते ।

८ इतीमं० भव्यजीवानां अधमवस्तून्यपि उत्तमवस्तुभावं प्रपद्यन्ते ।

९ इतीमं० भव्यजीवानां धर्मार्थकामा गुणाभिरामा जायन्ते ।

---

१ हुं क्षः अे क्षपणमाटेना मंत्राक्षरो होय, एम लागे छे ।

१० इतीमं० भव्यजीवानां ऐहिक्यः सर्वा अपि शुद्धगोत्रकलत्र-पुत्र-मित्र-धन-धान्य-जीवित-यौवन-रूपाऽऽरोग्य-यशःपुरस्सराः सर्वजनानां संपदः परभागजीवितशालिन्यः सदुदर्काः सुसंमुखीभवन्ति । किं बहुना ?

११ इतीमं० भव्यजीवानां आमुष्मिक्यः सर्वमहिमास्वर्गापवर्गश्रियोऽपि क्रमेण यथेष्टं(च्छं) स्वयं स्वयंवरणोत्सवसमुत्सुका भवन्तीति । सिद्धिः(द्धः) श्रेयः समुदयः ।

यथेन्द्रेण प्रसन्नेन, समादिष्टोऽर्हतां स्तवः ।
तथाऽयं सिद्धसेनेन, प्रपेदे संपदां पदम् ॥ १ ॥

इति शक्रस्तवः ॥

---

## परिचय

श्री जैनधर्मप्रसारक सभा, भावनगर तरफथी प्रकाशित 'श्री जिनसहस्रनाम स्तोत्र' नामक पुस्तकमां अंते श्री सिद्धसेन दिवाकर कृत 'शक्रस्तव' आपवामां आव्युं छे, ए पुस्तकमांथी प्रस्तुत संदर्भ अहीं आपेल छे ।

आ रचना अर्थनी दृष्टिए परम गंभीर होवाथी एनो अनुवाद विशेष प्रयत्न मागे छे, अत्यारे केवळ मूळ ज अहीं प्रगट करीए छीए, भविष्यमां तेने अर्थ सहित अलग पुस्तक तरीके प्रगट करवानी भावना राखीए छीए ।

श्री अरिहंत परमात्मानुं स्वरूप शब्दोथी पर छे । शब्दो ते रूपने संपूर्णरीते व्यक्त करी शके तेम नथी । पूर्वना महर्षिओए ते रूपने शब्दोवडे समजाववा माटे स्तोत्रादिरूपे अनेक प्रयत्नो कर्या छे । ए शब्दोना आलंबन वडे ए महान् रूपनी कांइक झांखी थाय छे । पछीनुं स्वरूप तो केवळ अनुभव वडे गम्य छे । शब्दरूपे अरिहंतना स्वरूपने व्यक्त करनारां भक्ति प्रधान स्तोत्रोमां 'शक्रस्तव' नुं स्थान मोखरे छे । ग्रंथकारे ते दिव्यरूपने शब्दोमां लाववानो सर्वश्रेष्ठ प्रयत्न कर्यो छे ।

आ स्तोत्र मंत्रराजगर्भित छे । एना अगिआर आलावा ए अगिआर मंत्रो छे । ए स्तोत्रना जपन, पठन, गुणन अने अनुप्रेक्षणनुं फळ पण ग्रन्थकारे बहु ज सुंदर रीते बताव्युं छे ।

आ स्तोत्र अद्‌भुत छे, प्रत्येक मुमुक्षुमाटे ते अत्यंत उपयोगी छे । एनुं रहस्य अने एनाथी प्राप्त थता लाभो एनी आराधनाथी वधु स्पष्ट थाय तेम छे ।

अंतिम श्लोक उपरथी एम लागे छे के इन्द्रे प्रसन्न थईने श्रीसिद्धसेनसूरिने आ स्तोत्र आप्युं हशे ।

श्रीसिद्धसेन दिवाकर पछीना स्तोत्रकारोए आ स्तोत्रनुं ओछा वत्ता अंशे अनुकरण कर्युं छे ।

कलिकालसर्वज्ञकृत **योगशास्त्रना** बीजा श्लोकनी टीकामां आ स्तोत्रना केटलांक विशेषणो अनुष्टुप् छंदमां गूंथवामां आवेला छे ।

# आचार्यश्रीपूज्यपादविरचितः सिद्धभक्त्यादिसंग्रहः

(स्रग्धरा)

सिद्धानुद्धूतकर्म्मप्रकृतिसमुदयान् साधितात्मस्वभावान् ,
वन्दे सिद्धिप्रसिद्धयै तदनुपमगुणप्रग्रहाकृष्टितुष्टः ।
सिद्धिः स्वात्मोपलब्धिः प्रगुणगुणगणो(णा)च्छादि दोषापहारा-
द्योग्योपादानयुक्त्या दृषद इह यथा हेमभावोपलब्धिः ॥ १ ॥
नाभावः सिद्धिरिष्टा न निजगुणहतिस्तत्तपोभिर्न युक्ते-
रस्त्यात्मानादिबद्धः सुकृतजफलभुक् तत्क्षयान्मोक्षभागी ।

---

## अनुवाद

जेम भट्ठी, धमण वगेरे योग्य कारणोनी युक्तिपूर्वक योजना करवाथी सुवर्णपाषाणमांथी मेल दूर थई जाय छे अने शुद्ध सुवर्णनी प्राप्ति थाय छे, तेम आत्माना ज्ञानादिक सर्वोत्कृष्ट गुणोना समुदायने आच्छादन करनारा ज्ञानावरणीयादि दोषोने ध्यानरूपी अग्निवडे दूर करवाथी शुद्ध आत्मज्ञाननी प्राप्ति थाय छे, ते सिद्धि कहेवाय छे। ते आत्म-सिद्धि जेमणे प्राप्त करी छे— अथवा जेओने ते शुद्ध आत्म-स्वरूपनी प्राप्ति थई छे अने जेओ कर्मोनी प्रकृतिना समुदायथी रहित छे एवा सिद्ध भगवंतोने तेमना अनुपम गुणरूप सांकळना आकर्षणथी तुष्ट थयेलो हुं शुद्ध आत्मस्वरूपनी सिद्धि माटे वंदन करुं छुं ॥ १ ॥

बौद्धो मोक्षनुं स्वरूप अभावरूप माने छे। आ श्लोकमां एनुं निरसन करतां आचार्य कहे छे के—मोक्षनुं स्वरूप अभावरूप नथी। कारण के एवो कोण बुद्धिमान पुरुष होय के जे पोतानो नाश करवा प्रयत्न करे ?

वैशेषिक दर्शनकार कहे छे के—बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म अने संस्कार आ आत्माना विशेष गुणो छे। ए गुणोनो नाश थई जवो तेनुं नाम मोक्ष छे। तेनुं निरसन करतां आचार्य कहे छे के—मोक्षनुं स्वरूप आत्माना गुणोनो नाश थवा रूप नथी। कारण के जो एम मानवामां आवे तो तेओनुं तप अने व्रतपालन पण नहीं घटी शके। कारण के आत्मगुणोना नाश माटे कोई तप के व्रत पालन करतुं नथी।

चार्वाको कहे छे के आत्मा जेवी कोई चीज ज नथी। केटलाक आत्माने माने छे परन्तु भूत अने भविष्यत्काल साथे तेनो संबन्ध मानता नथी। ते बन्नेनुं निरसन करतां आचार्य कहे छे के आत्मा छे अने ते अनादिकालथी चाल्यो आवे छे। अर्थात् अनादि कालथी आत्मा कर्मोथी बंधायेलो चाल्यो आवे छे।

ज्ञाता द्रष्टा स्वदेहप्रमितिरुपसमाहारविस्तारधर्म्मा,
ध्रौव्योत्पत्तिव्ययात्मा स्वगुणयुत इतो नान्यथा साध्यसिद्धिः ॥ २ ॥

स त्वन्तर्बाह्यहेतुप्रभवविमलसद्दर्शनज्ञानचर्य्या,
संपद्धेतिप्रघातक्षतदुरिततया, व्यञ्जिताचिन्त्य सौरः (सूरः) ।

---

सांख्य दर्शनकार माने छे के आत्मा कर्मोनो कर्ता नथी । तेनुं निरसन करतां आचार्य कहे छे के आत्मा स्वयं ज पोताना कर्म करे छे अने तेनुं शुभाशुभ फल भोगवे छे अने कर्मोनो सर्वथा नाश करी मोक्षमां जाय छे । तथा आ आत्मा ज्ञाता अने द्रष्टा छे–ज्ञानोपयोग अने दर्शनोपयोगथी युक्त छे।

सांख्य, मीमांसा, वेदान्त अने योग मतवाळाओ आत्माने सर्व-व्यापक माने छे । तेनां निरसनमां आचार्य कहे छे के—आत्मानुं परिमाण पोताना शरीर प्रमाण ज होय छे ।

सांख्य, मीमांसक, वेदान्ती अने वैशेषिक आत्माने सर्वथा नित्य माने छे । बौद्धो आत्माने उत्पाद अने विनाशमय माने छे । तेना निरसनमां आचार्य कहे छे के आत्मा उत्पाद, व्यय अने ध्रौव्य स्वरूप छे।

आत्मा पोताना ज्ञानादि गुणोथी युक्त छे । पोताना गुणोथी सुशोभित होवाना लीधे ज तेने पोताना स्वरूपनी प्राप्ति अर्थात् मोक्षनी प्राप्ति थाय छे । ए रीते पूर्वोक्त गुणोवाळो आत्मा मानवामां आवे तो ज मोक्षरूप साध्यनी सिद्धि थाय, अन्यथा नहि ॥ २ ॥

दर्शनमोहनीय कर्मनो उपशम, क्षय अने क्षयोपशम थवो ए सम्यग्दर्शन उत्पन्न करवा माटे अंतरङ्ग कारण छे, तथा गुरुनो उपदेश, जिनबिंब दर्शन, जातिस्मरण वगेरे बाह्य कारण छे। आ अंतरङ्ग अने बाह्य कारण मळवाथी सम्यग्दर्शन प्रगट थाय छे । सम्यग्ज्ञान उत्पन्न थवा माटे दर्शनमोहनीय अने ज्ञानावरण कर्मनो क्षयोपशमादिक थवो अंतरङ्ग कारण छे अने गुरुनो उपदेश, स्वाध्याय, वगेरे बाह्य कारण छे। सम्यक्चारित्र उत्पन्न थवा माटे मोहनीय कर्मनो क्षयोपशमादिक थवो अंतरङ्ग कारण छे अने गुरुनो उपदेश, स्वाध्याय, वगेरे बाह्य कारण छे। आ अंतरंग अने बहिरंग कारणोना मळवाथी सम्यग्दर्शन, सम्यग्ज्ञान अने सम्यक्चारित्र प्रगट थाय छे। अने कर्मोनो विशेष क्षय के क्षयोपशम थवाथी आ सम्यग्दर्शन, ज्ञान अने चारित्र अत्यन्त निर्मल थाय छे । निर्मल सम्यग्दर्शन, ज्ञान अने चारित्र आत्मानी संपत्ति छे। कर्मोने नाश करवा माटे आ ज रत्नत्रयरूप संपत्ति आत्मानुं शस्त्र* छे । आ रत्नत्रयरूप शस्त्रना प्रबल प्रहारथी घाति कर्मरूपी पाप अतिशीघ्र नष्ट थई जाय छे ।

---

* बीजो अर्थ—

रत्नत्रयरूप संपत्ति ते (आत्मसूर्यना) किरणोनो समूह छे । ते वडे दुरितांधकारनो नाश करेल होवाथी आत्मा देदीप्यमान अचिन्त्य सूर्य (सदृश) छे । ते केवलज्ञान, केवलदर्शन, श्रेष्ठ सुख, महावीर्य, क्षायिक सम्यक्त्वलब्धि, क्षायिक दान, क्षायिक लाभ, क्षायिक भोग, क्षायिक उपभोग (ज्योतिर्वातायनादि ?) आदि स्थिर (क्षायिक) अने अद्भुत एवा परम गुणोवडे (सदा) प्रकाशे छे ।

कैवल्यज्ञानदृष्टिप्रवरसुखमहावीर्यसम्यक्त्वलब्धि-
ज्योतिर्वातायनादिस्थिरपरमगुणैरद्भुतैर्भासमानः ॥ ३ ॥

जानन् पश्यन् समस्तं सममनुपरतं संप्रतृप्यन्वितन्वन् ,
धून्वन् ध्वान्तं नितान्तं निचितमनुसभं प्रीणयन्नीशभावं ।
कुर्व्वन् सर्व्वप्रजानामपरमभिभवं ज्योतिरात्मानमात्मा,
आत्मन्येवात्मनासौ क्षणमुपजनयन् स स्वयम्भूः प्रवृत्तः ॥ ४ ॥

छिंदन् शेषानशेषाभिगलबलकलींस्तैरनन्तस्वभावैः,
सूक्ष्मत्वाग्र्यावगाहागुरुलघुकगुणैः क्षायिकैः शोभमानः ।
अन्यैश्चान्यव्यपोहप्रवणविषयसंप्राप्तिलब्धप्र(स्व)भावै-
रूर्द्ध्वं व्रज्या स्वभावात् समयमुपगतो धाम्नि संतिष्ठतेऽग्र्ये ॥ ५ ॥

---

ए आत्मा पोताना रत्नत्रयरूप शस्त्रना प्रबल प्रहारथी जे वखते घातिकर्मोने नष्ट करी दे छे ते ज वखते ए आत्माने केवलज्ञान, केवलदर्शन, अनन्तसुख, अनन्तवीर्य, अत्यन्त निर्मल सम्यक्त्व, क्षायिक दान, क्षायिक लाभ, क्षायिक भोग, क्षायिक उपभोग, यथाख्यात चारित्र, भामण्डल, चामर, छत्रत्रय वगेरे अनेक अनुपम विभूतिओ प्राप्त थाय छे। आ विभूतिओमांथी ज्ञान, दर्शन, सुख, वीर्य, सम्यक्त्व वगेरे विभूतिओ तो आत्म-स्वभावरूप होवाथी शाश्वत छे अने भामण्डल, चामर, छत्र, सिंहासन, वगेरे विभूतिओ देवोपनीत छे अने ते शरीरना संबंध सुधी रहे छे। आ बधी विभूतिओ अद्भुत छे अने एमनुं अचिंत्य माहात्म्य स्पष्ट देखाय छे।

ज्यारे आ आत्मा घातिकर्मोनो नाश करवाथी उपर लखेला अचिन्त्य अने परम गुणोथी देदीप्यमान बने छे त्यारे ए आत्मा स्वयम्भू अथवा अरिहंत कहेवाय छे।

ए आत्मा समस्त लोकालोकने एकी साथे निरंतर जाणे छे अने जूए छे, कृतकृत्य बनेलो होवाथी निरंतरपणे पूर्ण तृप्तिने अनुभवे छे, ज्ञान–प्रकाशने विस्तारे छे, मोहरूपी घोर निबिड अंधकारनो नाश करे छे, समवसरणरूप सभामां अमृत समान दिव्य ध्वनिरूप वचनोथी कल्याणमय उपदेश आपीने भव्य जीवोने अत्यन्त संतुष्ट करे छे, तेमने अत्यन्त आनंदित करे छे, सर्व प्रजाओना ईशभाव (शासन)ने करे छे, सूर्यादि अन्य ज्योतिओ करतां अधिक तेजस्वी छे, तथा स्वयं पोतामां ज पोतावडे पोताने क्षणवार उत्पन्न करतो ए स्वयम्भू प्रवर्त्ते छे ॥ ३–४ ॥

अंते बेडीओनी समान अत्यन्त कठीन एवा वेदनीय, नाम, गोत्र अने आयुः आ चार अवशेष अघाती कर्मोनी मूल अने उत्तर समस्त कर्मप्रकृतिओने छेदीने अनन्त स्वभाववाळा सूक्ष्मत्व, लोकाग्रावगाह, अगुरुलघु वगेरे परम गुणोथी पण ते भगवान् मुक्तिमां शोभे छे। ए सिवाय समस्त कर्म प्रकृतिओनो नाश थवाथी (?) प्राप्त थयेला (अथवा अन्य व्यपोह'नेति नेति' वडे वर्णवाता) अनेक अन्य गुणोथी पण ते सिद्ध भगवंत शोभे छे। शुद्ध आत्मानो स्वभाव ऊर्ध्वगमन करवानो होवाथी समस्त कर्मोनो नाश थया पछी ते ज समयमां भगवान् लोकाकाशना अग्रभाग उपर जईने विराजित थाय छे ॥ ५ ॥

अन्याकाराप्तिहेतुर्न च भवति परो येन तेनाल्पहीनः,
प्रागात्मोपात्तदेहप्रतिकृतिरुचिराकार एव ह्यमूर्त्तः ।
क्षुत्तृष्णाश्वासकासज्वरमरणजरानिष्टयोगप्रमोह-
व्यापत्त्याद्युग्रदुःखप्रभवभवहतेः कोऽस्य सौख्यस्य माता ॥ ६ ॥
आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं,
वृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वन्द्वभावं ।
अन्यद्रव्यानपेक्षं निरुपममभितं शाश्वतं सर्वकालं,
उत्कृष्टानन्तसारं परमसुखमतस्तस्य सिद्धस्य जातम् ॥ ७ ॥

---

सिद्ध अवस्थामां आत्मानुं परिमाण केटलुं रहे छे, अंतिम शरीरथी ओछुं रहे छे के अधिक? ते बतावे छे :—

जे मनुष्यशरीरथी आ जीव मुक्त थाय छे, तेने ज चरम शरीर कहे छे। मुक्त थया पछी आ जीवनो आकार चरम शरीरना आकारथी भिन्न आकारनो न होई शके, अथवा न तो ते समस्त लोकमां व्यापक होई शके छे, अथवा न तो वटवृक्षना बीजनी माफक अणुमात्र होई शके छे, कारण के त्यां आकार बदलवानुं कोई कारण नथी। परन्तु अंतिम शरीरना परिमाणथी कंइक ओछो आकार होवामां कारण छे अने ते ए के संसार परिभ्रमणमां आ जीवनो आकार कर्मोने कारणे बदलतो रहेतो हतो। हवे कर्मोना नष्ट थवाथी आकार फेरववानुं कोई कारण नथी। तेथी मुक्त अवस्थामां जीवनो आकार अंतिम शरीरना आकारे ज रहे छे। तेनुं परिमाण अंतिम शरीरथी कंइक ओछुं ज रहे छे, कारण के शरीरना जे जे भागोमां आत्माना प्रदेशो नथी तेटलुं परिमाण घटी जाय छे। शरीरनी अंदर पेट, नाक, कान वगेरे पोला भागोमां जीव प्रदेशो होता नथी। तेथी ए सिद्ध थाय छे के मुक्त जीवोनुं परिमाण अंतिम शरीरना परिमाणथी कंइक ओछुं छे। आ ओछापणुं आकारनी अपेक्षाए नथी परन्तु घनफलनी अपेक्षाए छे। तथा मुक्त अवस्थामां जीवनो आकार अंतिम शरीरना आकार समान अत्यन्त देदीप्यमान रहे छे। तथा मुक्त अवस्थामां आत्मा अमूर्त्त होय छे। सिद्धोमां स्पर्शादिरूप मूर्त्तत्व नथी, तेथी ते अमूर्त्तस्वरूप कहेवाय छे।

तथा क्षुधा, तृषा, श्वास, कास (दम), ताव, मरण, वृद्धावस्था, अनिष्टयोग, मोह, अनेक प्रकारनी आपत्तिओ अने बीजा पण दारुण दुःखो जेथी उत्पन्न थाय छे एवा भव (राग-द्वेष) नो भगवाने नाश कर्यो छे। आ भव नष्ट थवाथी सिद्ध भगवंतोने जे अनन्त सुखनी प्राप्ति थई छे, ते सुखना परिमाणने कोण मापी शके? अर्थात् कोई न मापी शके ॥ ६ ॥

सिद्धोनुं सुख केवुं होय छे ते बतावे छे :—

सिद्ध परमात्माने जे सुख होय छे ते केवल आत्माथी ज उत्पन्न थयेलुं होय छे; अन्य कोई प्रकृति आदिथी उत्पन्न थयेलुं नथी, तेथी ते अनित्य नथी। ते सुख स्वयं अतिशय युक्त होय छे, समस्त बाधाओथी रहित होय छे, अत्यन्त विशाल-अनन्त होय छे अने आत्माना समस्त प्रदेशोमां व्याप्त थईने रहे छे। ते सुख न क्यारेय ओछुं थाय छे के न तो वधे छे। सांसारिक सुख विषयोथी उत्पन्न थाय छे, सिद्धोनुं सुख विषयोथी उत्पन्न थतुं नथी, परन्तु स्वाभाविक होय छे। सुखनुं प्रतिद्वन्द्वि दुःख छे। ते दुःखथी तेओ सर्वथा रहित छे। संसारी जीवोनुं सुख दुःखोथी मिश्रित छे, परन्तु

नार्थः क्षुत्तृड्विनाशाद् विविधरसयुतैरन्नपानैरशुच्याः,
न स्पृष्टेर्गन्धमाल्यैर्नहि मृदुशयनैर्ग्लानिनिद्राद्यभावात् ।
आतंकार्त्तेरभावे तदुपशमनसद्भेषजानर्थतावद्,
दीपानर्थक्यवद्वा व्यपगततिमिरे दृश्यमाने समस्ते ॥ ८ ॥
तादृक्सम्पत्समेता विविधनयतपःसंयमज्ञानदृष्टि-
चर्य्याः सिद्धाः समन्तात्प्रविततयशसो विश्वदेवाधिदेवाः ।
भूता भव्या भवन्तः सकलजगति ये स्तूयमाना विशिष्टैः,
तान् सर्वान् नौम्यनन्तान् निजिगमिषुरहं तत्स्वरूपं त्रिसन्ध्यम् ॥ ९ ॥

---

सिद्धोनुं सुख हंमेशा सुखरूप ज होय छे । संसारिक सुख वेदनीय कर्मना उदयथी थाय छे । तथा पुष्पमाला, चन्दन, भोजन वगेरे बाह्य सामग्रीनी अपेक्षावाळुं छे। परन्तु सिद्धोनुं सुख बीजा कोई द्रव्यनी अपेक्षा विनानुं होय छे । ते सिद्धोनुं सुख उपमा रहित छे, अपरिमित छे, शाश्वत छे अने सर्व समय रहेनारुं छे। ते सुखनुं सामर्थ्य परमोत्कृष्ट छे अने अनन्त छे। ते सुख परमसुख कहेवाय छे। आवुं सुख सिद्धोने होय छे ॥ ७ ॥

जेम कोई जीवने प्राणांत व्याधिनी कोई पीडा अथवा दुःख न होय तो तेने माटे पीडाने शान्त करवा माटे कोई औषधिनी जरूर नथी, अथवा जे वखते अंधकारनो सर्वथा अभाव होय अने बधी वस्तुओ स्पष्ट देखाती होय तो ते वखते दीपकनी कोई जरूर नथी, ते ज प्रमाणे ते सिद्ध भगवंतोनी भूख अने तरस चाली गई छे तेथी तेमने अनेक प्रकारना रसोथी परिपूर्ण एवा अन्नजलनुं कोई प्रयोजन नथी । तथा सिद्धोने कोई पण जातनी अपवित्रतानो स्पर्श नथी होतो तेथी तेमने केसर, चन्दन अथवा पुष्पमाला वगेरेनुं पण प्रयोजन नथी । तेवी ज रीते ते सिद्ध भगवंतोने ग्लानि, निद्रा, वगेरेनो सर्वथा अभाव होय छे, तेथी तेमने कोमल शय्यानुं पण कोई प्रयोजन नथी ॥ ८ ॥

ते सिद्ध भगवंतो अनन्तज्ञान वगेरे अनेक उत्तम संपत्तिओथी सहित छे अने सर्व नयोनी दृष्टिए विशुद्ध एवा तप, संयम, ज्ञान, दर्शन अने चारित्रथी युक्त छे। तेमनो यश चारे तरफ फेलायेलो छे। तेओ विश्वना देवाधिदेव छे। त्रणे लोकना समस्त भव्य जनो तेओनी सदा स्तुति करे छे। ते भूतकालमां थयेला, भविष्यत् कालमां थनारा अने वर्त्तमान कालमां थता समस्त अनन्त सिद्धोने हुं सिद्ध स्वरूपने बहु जल्दी ज प्राप्त करवानी इच्छाथी त्रिसन्ध्य नमस्कार करुं छुं ॥ ९ ॥



# आचार्यभक्तिः

सिद्धगुणस्तुतिनिरतानुद्धूतरुषाग्निजालबहुलविशेषान् ।
गुप्तिभिरभिसम्पूर्णान्, मु(यु)क्तियुतसत्यवचनलक्षितभावान् ॥ १ ॥

मुनिमाहात्म्यविशेषान्, जिनशासनसत्प्रदीपभासुरमूर्तीन् ।
सिद्धिं प्रपित्सुमनसो, बद्धरजोविपुलमूलघातनकुशलान् ॥ २ ॥

गुणमणिविरचितवपुषः, षड्द्रव्यनिश्चितस्य धातॄन् सततं ।
रहितप्रमादचर्यान्, दर्शनशुद्धान् गणस्य संतुष्टिकरान् ॥ ३ ॥

मोहच्छिदुग्रतपसः प्रशस्तपरिशुद्धहृदयसुव्यवहारान् ।
प्रासुक्यनिलयाननघानाशाविध्वंसिचेतसो हतकुपथान् ॥ ४ ॥

---

## अनुवाद

जे आचार्यो सिद्धोना क्षायिक सम्यक्त्व आदि गुणोनी स्तुति करवामां सदा लीन रहे छे। क्रोध, मान, माया, लोभरूपी अग्निना समूहना जे अनन्तानुबंधि वगेरे अनेक भेदो छे अर्थात् कषायोना भेदो छे ते बधा जेओए नष्ट करी नाख्या छे, जे मनोगुप्ति, वचनगुप्ति अने कायगुप्तिनुं पालन करे छे, अने जेओ निस्पृहता (युक्ति) थी युक्त एवा सत्य वचनवडे जगतना पदार्थोने ओळखावे छे, एवा आचार्योने हुं नमस्कार* करुं छुं ॥ १ ॥

मुनिओमां जेमनुं माहात्म्य विशेष छे, जेमनी मूर्ति जिनशासनने प्रकाशित करवा माटे दीपक समान देदीप्यमान छे, जेमना मनमां सिद्धिपद प्राप्त करवानी इच्छा छे अने जेओ ज्ञानावरणीय आदि कर्मोने बंधाववाना कारणरूप तत्प्रदोष, निह्नव, मात्सर्य आदि कारणोने नाश करवामां अत्यन्त कुशल छे, एवा आचार्योने हुं नमस्कार करुं छुं ॥ २ ॥

जेओनुं शरीर सम्यग्दर्शन वगेरे गुणरूपी मणिओथी सुशोभित छे, जेओ जीवादिक छए द्रव्यना निश्चयने जन्म आपनारा छे अर्थात् जेओ स्वयं षड्द्रव्य विषयक निश्चयवाळा छे अने बीजाओने निश्चय करावनारा छे, जेमनुं चारित्र विकथा आदि प्रमादथी रहित छे, जेमनुं सम्यक्दर्शन शंकादिक दोषोथी रहित छे अने जेओ गच्छनी संतुष्टिने करनारा छे, एवा आचार्योने हुं सदा नमस्कार करुं छुं ॥ ३ ॥

जेमनुं उग्र तपश्चरण मोह अने अज्ञाननो नाश करनारुं छे, जेमनुं हृदय प्रशस्त अने परिशुद्ध छे, तथा व्यवहार सुंदर–स्वपरकल्याणकर छे, जेमनुं रहेवानुं स्थान समूर्च्छिमादि जीवोथी रहित होय छे, जेओ पाप रहित होय छे, जेमनुं हृदय आशा–स्पृहाथी सर्वथा रहित होय छे अने मिथ्यादर्शनरूपी कुमार्गनो सदा नाश करनारा होय छे, एवा आचार्योने हुं सदा नमस्कार करुं छुं ॥ ४ ॥

---

* आ श्लोकमां तथा आगळना श्लोकमां नमस्कारसूचक कोई वाक्य नथी। ते वाक्य दसमा श्लोकमां छे। अने त्यां सुधी बधा श्लोकोनो सम्बन्ध छे। तेथी 'नमस्कार करुं छुं' आ वाक्य त्यांथी लेवामां आव्युं छे। आगळ पण एम ज समजवुं।

धारितविलसन्मुण्डान् , वर्जितबहुदण्डपिण्डमण्डलनिकरान् ।
सकलपरिषहजयिनः क्रियाभिरनिशं प्रमादतः परिरहितान् ॥ ५ ॥

अचलान् व्यपेतनिद्रान्, स्थानयुतान्कष्टदुष्टलेश्याहीनान् ।
विधिनानाश्रितवासानलिप्तदेहान् विनिर्जितेन्द्रियकरिणः ॥ ६ ॥

अतुलानुत्कुटिकासान् , विविक्तचित्तानखण्डितस्वाध्यायान् ।
दक्षिणभावसमग्रान् व्यपगतमदरागलोभशठमात्सर्यान् ॥ ७ ॥

भिन्नार्त्तरौद्रपक्षान् संभावितधर्म्मसुनिर्म्मलहृदयान् ।
नित्यं पिनद्धकुगतीन् पुण्यान् गण्योदयान् विलीनगारवचर्य्यान् ॥ ८ ॥

---

जेमनां मन, वचन अने काया, पांचे इन्द्रियो, अने हाथ-पग वगेरेनो व्यापार बधा पापोथी रहित होय छे अने तेथी जेओ अत्यन्त शोभे छे। जे मुनिओनो समुदाय अधिक दंडनो भागीदार बहुदोषवाळो आहार ग्रहण करे छे एवा मुनि-समुदायथी जेओ सर्वथा अलग रहे छे (?)। जे तपश्चर्यादि विशेष-अनुष्ठानोथी अनेक प्रकारना परीषहोने सदा जीतता रहे छे अने जेओ प्रमादथी सर्वथा रहित होय छे, एवा आचार्योने हुं सदा नमस्कार करुं छुं ॥ ५ ॥

जेओ अनेक परीषहो आववा छतां पोतानां अनुष्ठानो अने व्रतोथी क्यारेय चलायमान थता नथी, जेओ विशेषे करीने निद्राथी रहित होय छे, जेओ प्रायः कायोत्सर्गमां रहे छे, जेओ अनेक प्रकारनां दुःख अने दुर्गतिने आपनारी दुष्ट लेश्याओथी सदा रहित होय छे, जेओए विधिपूर्वक घरनो त्याग कर्यो छे, अथवा जेओना आगमानुसार कंदरा, वसतिका वगेरे अनेक प्रकारनां रहेवानां स्थान छे, जेओ तेल वगेरेथी मालीश करावता नथी अने जेओ इन्द्रियरूपी हाथीओने हंमेशा पोताना वशमां राखे छे, एवा आचार्योने हुं सदा नमस्कार करुं छुं ॥ ६ ॥

संसारमां जेमनी कोई उपमा नथी, जेओ उत्कटिकासन वगेरे कठण आसनोथी तपश्चरण करे छे, जेमनुं हृदय हंमेशा परभावोथी रहित छे, जेमनो स्वाध्याय सदा अखंडित रहे छे, जेमनुं दाक्षिण्य परिपूर्ण छे अने जेमना मद, राग, लोभ, अज्ञान अने मत्सरता चाल्या गया छे, एवा आचार्योने हुं सदा नमस्कार करुं छुं ॥ ७ ॥

जेओए आर्त्तध्यान अने रौद्रध्यान रूपी पक्षोनो सर्वथा नाश कर्यो छे, धर्मध्याननी शुभ भावनाथी जेमनुं हृदय निर्मल बन्युं छे, जेओए नरकादिक दुर्गतिओने सदाने माटे रोकी छे, जेओ अत्यन्त पवित्र छे, जेमनी ऋद्धिओ अने तपश्चरणनुं माहात्म्य अत्यन्त प्रशंसनीय छे अने जेओ गारव युक्त प्रवृत्तिओथी सर्वथा रहित होय छे, एवा आचार्योने हुं सदा नमस्कार करुं छुं ॥ ८ ॥

तरुमूलयोगयुक्तानवकाशातापयोगरागसनाथान् ।
बहुजनहितकरचर्यानभयाननघान् महानुभावविधानान् ॥ ९ ॥

ईदृशगुणसंपन्नान् युष्मान् भक्त्या विशालया स्थिरयोगान् ।
विधिनानारतमग्र्यान् मुकुलीकृतहस्तकमलशोभितशिरसा ॥ १० ॥

अभिनौमि सकलकलुषप्रभवोदयजन्मजरामरणबंधनमुक्तान् ।
शिवमचलमनघमक्षयव्याहतमुक्तिसौख्यमस्त्विति सततम् ॥ ११ ॥

---

जे आचार्यो वर्षाकालमां वृक्ष आदिनी नीचे योगसाधनामां रहे छे, ग्रीष्मकालमां आतापना योग धारण करे छे अने शीतकालमां अभ्रावकाशयोग (खुल्ली जग्यामां रहेवुं) धारण करे छे, जेमनी मन, वचन अने कायानी प्रवृत्ति हंमेशा अनेक जीवोना हितने करनारी होय छे, जेओ सात प्रकारना भयथी सर्वथा रहित होय छे, जेओ पापथी रहित छे, जेमना अनुभाव (प्रभाव) अने विधान (कार्यो) महान छे, एवा आचार्योने हुं सदा नमस्कार करुं छुं ॥ ९ ॥

जे आचार्यो उपर कहेला गुणोथी संपन्न छे, जेमनां मन, वचन अने काया अनेक परिषहो आववा छतां पण निरंतर विधिपूर्वक स्थिर रहे छे, अनेक गुणोने धारण करवाथी जेओ सदा अग्रय-प्रधान छे। अने अशुभ कर्मोना उदयथी प्राप्त थनार जन्म, मरण, जरा वगेरे सर्व दोषोना संबंधथी जेओ रहित छे, एवा आचार्योने हुं अति भक्तिथी विधिपूर्वक अंजलिबद्ध करकमलथी शोभता मस्तक वडे नमुं छुं। अेथी मने शिव, अचल, निष्पाप, अक्षय, बाधाओथी रहित अेवुं मुक्तिसुख प्राप्त थाओ ॥ १०-११ ॥

# पञ्चगुरुभक्तिः

श्रीमदमरेन्द्रमुकुटप्रघटितमणिकिरणवारिधाराभिः ।
प्रक्षालितपदयुगलान् प्रणमामि जिनेश्वरान् भक्त्या ॥ १ ॥
अष्टगुणैः समपेतान् प्रणष्टदुष्टाष्टकर्मरिपुसमितीन् ।
सिद्धान्सततमनन्तान्नमस्करोमीष्टतुष्टिसंसिद्ध्यै ॥ २ ॥
साचारश्रुतजलधीन्प्रतीर्य शुद्धोरुचरणनिरतानाम् ।
आचार्याणां पदयुगकमलानि दधे शिरसि मेऽहम् ॥ ३ ॥
मिथ्यावादिमदोग्रध्वान्तप्रध्वंसिवचनसंदर्भान् ॥
उपदेशकान्प्रपद्ये मम दुरितारिप्रणाशाय ॥ ४ ॥
सम्यग्दर्शनदीपप्रकाशका मेयबोधसंभूताः ।
भूरिचारित्रपताकास्ते साधुगणास्तु मां पान्तु ॥ ५ ॥
